
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

M-1931

पूर्व मीमांस अष्टमो ध्याय: प्रारभ्यते ॥

१

श्रीगणेशाय नमः॥ ॥अथ विशेषः॥ ॥ तदेवं त्रिविधोऽतिदेशो निरूपितः॥ तत्रापि प्रसक्तवचनामग्निदे
शयोः कार्त्स्न्येन विंशात्ता चोदनालिंगातिदेशस्य सामान्यतो निरूपितस्य प्रकृतिविशेषनिरूपणार्थं प्रघट्टक आ
रभ्यते· तत्रैकस्मिन्सौर्यादौ एककविध्यंते नैव निराकांक्षत्वात् सर्वविध्यंतसमुच्चयायोगेपि नियामकाभावात्।
अनियमे नानेकप्रकृतिकविध्यंतप्राप्तिरिति प्राप्ते अदृष्टदोषदुष्टाविकृत्यापत्तेर्यस्यैव साहृश्यविशेषे
ण शीघ्रोपस्थितिस्तत एव धर्मातिदेशः। तच्च सादृश्यं शब्दघटितमर्थघटितं वोत्तरत्र प्रपंचयिष्यते·
अत एव यत्र कथमपि न सादृश्यस्य नियामकता यथा द्यावापृथिव्य एकादशकपाले तत्राग्नीषोमीये
द्राग्नयोर्विकल्पेनैव प्रकृतित्वं॥ ॥प्रवृत्तत्वात्॥ ॥ यत्र द्रव्यदेवतासंनिपत्योपकारकांगसाम
ग्रीसाकल्यान्नानरूपकल्पनं विधानं तत्राग्निहोत्रदर्शपूर्णमासज्योतिष्टोमादीनां परस्परं धर्मातिदेशः हेरंब
।स्वसंनिधौ यावदाम्नातैरंगैरेवेति कर्त्तव्यताकांक्षाशांतेः साहृश्यस्यापि तादृशस्य नियामकस्याभा २

वाच्च· ज्योतिष्टोमे तु तस्यैकदेशातं प्रयाजानुयाजा इति प्रकृति प्राप्तप्रयाजाद्यनुवादेन देशातसंख्याविधानलिं
गाद्दीक्षणीयादिषु दार्शिकधर्माणां प्रवृत्तत्तयातन्मध्यवर्त्तिनि सोमेपि दार्शिकविध्यानप्राप्तिं मन्यमा
नस्योत्तरं· दीक्षणीयादिषु विधमानामेव प्रयाजादीनां परस्परया सोमसंबंधाद्वाजपेयस्य यूपद्दतिवत्त
स्यैतिषद्यनुवादोपपत्तेः। प्रवृत्तत्वस्य हेतोराकांक्षानिबंधनत्वेन तदभावे असाधकत्वान्न सोमे तिदेशः
।अत एव घृतं वै देवा वज्रं कृत्वा सोममघ्नन्नस्कंचीवाहृतस्मास्कंविसोममहाविनां साधृतेनाज्येनाभि
घारयतीति दार्शिकासादनाद्यभावानुवाद उपपद्यते· न ह्ययं पर्युदासविधिः। पुरा हां भ्रष्टुरं भुस्तेरे
वतत्राप्रसिद्धेर्विधिर्वैयर्थ्यात्· तस्मान्न कस्याप्यतिदेशः सोमे॥२॥ इष्टिषु॥ ॥ सौर्यादिष्विष्टिसमा
ख्याते युइष्टिसमाख्याकत्वसेमान्यान्निर्वपतिधातुमत्त्वाक्यसंबंधित्वात्तद्धितपदविहितदेवताकत्वा
च्च दर्शपूर्णमासविकारत्वमेव· अत एव प्रयाजे प्रपाजाद्य इति लिंगं· एवं पशावप्यग्नीषोमीये दैक्षसंज्ञकेत

२

श्रुतपदविहितदेवताकत्वादेवं नचतत्रयूपादिवद् इतरधर्मविधानादेव निराकांक्षत्वान्नातिदेशस्तथा

यावाहनासादनकुंभ्यादिवद् इह दृष्टार्थधर्माणामाम्नानेन साकांक्षत्वात् किंच क्रयसन्निधावाम्नातो निधं

र्मकोदेशः। प्रथमतावद् इतिदेशकस्यस्यैव ततश्च प्राकृतैर्धर्मैर्निराकांक्षस्य स एष औपवसथ्येह

नीसवनेन औपवसथ्येहन्यनुष्ठानविगतेनु स्थानसादेश्याद् उपहोमन्यायेन यूपादिग्रहणेपि नातिदेशक

स्यनाप्रतिबंधः। एकादशत्वमयाजान्यजंनिषोध मा आरमानत्त्वी सादिलिंगमप्येवमुपपद्यते अन्येषु

तु सवनीयादिपशुषु दैक्षस्यातिदेशः। आलभतिचोदनाकत्वपशुद्रव्यकत्वाद्यधिकतरसादृश्यात्

यूपाद्याधिकधर्मलाभाच्च अतएव च पयाप्रतः सवनेवरति औदुंबरो यूप इत्यादिलिंगाएकादशि

नेषु तु सत्सादिनस्यत्वस्याधिक्याम्यत्वाद्विप्रकर्षादि रूपधर्माधिक्याच्च सवनीयपशुविकारत्वं अग्नि

ष्टोमे हेमरशाने आदायदाभ्यां [illegible]भ्यां रशनाभ्यामैकैकं यूपं परिपयती सेत्स्यपिहे रशासरूपसवनीयधर्मो

हेरंब (margin)

२

नुवादकमुपपद्यते नह्ययं विधिः। अग्निष्टात्यूपात् इत्यभ्यविधेयत्वाश्लिंगत्वोपपत्तेः। पशुगणेषु तु

सौरस्य सौम्येष्वापशुगणांतर्गतत्वसादृश्याद् गुणधर्माधिक्याभावे का द्विरशिनवाक्यैकवाक्यतोप

पत्तेरंशत्रयविशिष्टविजातीयभावनाया एवविधानासार्थिकान्वयेवप्रकृतेरेव तद्भावनाकरणी

भूते यागे तु ग्राहकत्वकल्पनानसावोर्थत्वमौपदेशिकं उत्पत्तिवाक्ये इति कर्तव्यतासामान्यान्वया

त्तुनस्त्वेद्र्चरितस्याविरूपानेकवोधजनकता वाक्यैकवाक्यताजन्यबोधस्त्वनश्च तत्रांशद्वबोध

इतिनसरूपनानावोधजनकत्वमप्येकस्यः अतः पारिप्लववत्वाभावाद् धर्मकृपामैत्राग्नादीनां ध

र्माकांक्षायामतिदेशसिद्धिः यत्तु मूले अतिदेशसिद्ध्यर्थं यजिप्रयुक्तत्वं धर्माणामपूर्वप्रयुक्तत्वं वे

ति चिंतांतरं कृतं तद्यजिप्रयुक्तत्वेपि प्रकृतयजिप्रयुक्तत्वोपपत्तेरितरथापूर्वप्रयुक्तत्वेपि तदुपा

पत्तेर्नावमिकेनपौनरुक्त्यापत्तेश्चोपेक्षितं सचातिदेशो द्विविधो वचनातिदेशो नामातिदेशश्चेय

३

ति॰ आद्योपि प्रत्यक्षवचनातिदेशोनुमितवचनातिदेशश्चेति॰ अनुमितवचनातिदेशोपि त्रिविधः। सा
दृश्यकल्पितवचनातिदेशः स्थानापत्तिकल्पितवचनातिदेशः आश्रयोपस्थितिकल्पितवचनातिदेश
श्चेति॥ ॥ समाप्ते॥ ॥ तत्र प्रत्यक्षवचनातिदेशो निरूप्यते॰ इषुनामैकाहो ज्योतिष्टोमविकारः।
तत्र प्राकृते साप्तिवषट्कारनिधनमाम्नातं प्राकृतविधृतौ च इष्वाकारं स्तोत्रं प्राकृते समहाख्य
सामः ततः समानमितरच्छेनेनेति श्रुतं तत्किमनुवादरुत अतिदेशविधिरिति चिंतायामितरशब्दस्य सं
न्निहितवचनत्वेन लोके प्रसिद्धत्वान्नास्य असंन्निहितश्येनवैशेषिकधर्मवाचित्वं तेषामसान्निहितत्वा
त्॰ अपितु ये ज्योतिष्टोमातिदेशेन संन्निहितास्तत्परमेव॰ तेषां च श्येनेप्यतिदेशप्राप्तत्वेन श्येने साहश्यो
पपत्तेरनुवाद एवायमिति न श्येनवैशेषिकाणां वचनातिदेशादतिप्राप्तेरितरशब्दस्य संन्निहितवाचि
त्वस्य पूर्वोक्तेतरतेन सदृशवाचित्वमपि लोकसिद्धं मैत्रचैत्रयोः कंबलकोशेयेरयेइतरदिच्छुमित्रायेत्र ३

त्रसंन्निहितपूर्वोक्तेतरततसदृशास्यवस्त्रादेरेव प्रतीतेः। अतश्च वार्त्तिककारीयापूर्वोक्तसादृश्यस्यावाप्य
त्वोक्तिरुपेक्षणीयैव॰ ततश्च यत्संन्निहितं प्राकृतं न तत्पूर्वोक्तसदृशः अप्राकृतानां समहादीनां पूर्वमुक्त
त्वात्॰ यच्च सदृशं श्येनवैशेषिकं अप्राकृतत्वसाधर्म्यात्तन्न संन्निहितं॰ ततश्चावश्यं वक्तव्ये अन्यतरस्मि
न्वचनार्थत्वहाय संन्निधिं हित्वा सादृश्यपरिग्रहेण श्येनवैशेषिकाणामेवेतरशब्देन ग्रहणं॰ नह्यन्यथा
विध्यंतरशेषभूतस्यानुवादस्यार्थवत्त्वं संभवति॰ ततश्च श्येनसादृश्यवद्यत्पूर्वोक्तसदृशं सत्पूर्वोक्तमभि
न्नं तद्विधौ कुर्यादिति वाक्यार्थः। श्येनसादृश्यं च श्येनेन नियोनरस्मिसावद्यस्य सहस्रस्योत्तरा गौः समाहिनाभ
वति नावद्रस्माल्लोकादसौ लोक इति सहस्रं दक्षिणां दशेयारातिः सा घस्के च पूर्वस्मिन्सोऽसौ मक्रयणं
विधायोत्तरस्मिन्नस्यामसौ स्त्री गौः सोमक्रयणीव्याहत्ताद्विषांस्यद्भिते सनेन स्त्रियो विधानं स्यद्धित्वं व्याहृय
नुवादश्च संगच्छते॰ ३ कर्मणः॥ ॥ एवं प्रकृतिविशेषेण निरूपिते फलनियमकर्त्तृसमुदायांशेनेषां प्र

४

कृतित्वं यतस्तेषामनतिदेशः॥ तथाहि प्रकृतिफलं तावत्प्रकृतेरनतिदेशादेवनातिदिश्यते नहि प्रकृ
तेरर्थातिदेशः शक्याविकृतिभावनायाविकृतिकरणेनैवनिराकांक्षत्वात् नचसौर्यादिवाक्ये द्रव्यदेवताभा
वविशिष्टभावनाविधौ कृतेसादृश्येन प्राकृतभावनोपस्थितौ तत्संबंधिकरणस्येव प्रयाजादिवदतिदेशो
पपत्तिरिति वाच्यं अनुमितिसामग्र्यावलवत्त्वेन सूर्यादिदेन तयायागानुमानस्यावश्यकतया शाब्द
बोधे विजातीययागस्यापि भावनाविशेषणतयाविधेरावश्यकत्वेन करणाकांक्षाभावादतिदेशानुप
पत्तेः। नचतथापि तद्धिताये आग्नेयत्वभेदकल्पने गौरवं तद्यागे आग्नेयत्वापत्तिः। विनिगमनाविरहसह
कृतविधिपुनः श्रवणेन वैजात्यसामान्याभेदसिद्धिः। अन्यथाग्नेयेपि सौर्यत्वापत्तौ सूर्यादीनां सांकर्यापत्तेश्च
अतः सौर्यादीनां भिन्नामेवकरणोनां लाभान्नतेषामतिदेश इतिसिद्धम्॥ अतएवतदभावान्नतत्फल .... हेरंब
तातिदेशः। नचतदभावेप्यंगवद्धि कृतेः फलाकांक्षास्ति ब्रह्मवर्चसादिश्रुतफलेनैवनिराकांक्षत्वात् यत्र ४

पिविश्ववजिदादौ नफलश्रवणं तत्रापि न तदतिदेशः। सहि अंगातिदेशकेन प्रकृतिवद्भावेन भवेत्कै
त भिन्नेनवा नाद्यः। एकेनैव प्रकृतिवद्विकृतिः कार्येति वाक्येन विकृतसुदेशेनांगविधानं फलोद्देशेनवि
धानमिति वैरूप्यापत्तेः। यद्यपि चप्रकृतिवद्भावमात्रस्याविकृतिविधिवाक्यशेषत्वकल्पनया अंशान्त
यविशिष्टविकृतिभावनाविधाने नावैरूप्यमिसाशांकनेनतथाप्येकप्रकृतिवद्भावस्यांगांशेविधेयस
मर्पकत्वं फलांशेउद्देश्यसमर्पकत्वमिति वैरूप्यापत्तिसाद्यस्यैव। नांत्यः। स्वविध्युपस्थापितविश्वजि
तापेनैव फलकल्पनोपपत्तावतिदेशकल्पने प्रमाणाभावात् अतोन फलस्यातिदेशः। नियमोनिमि
त्तं तस्यतु विकृतिभावतया अनपेक्षितत्वादेवानतिदेशः। नहि निमित्तमंगं येन प्रयाजादिवदतिदेशोभ
वेत् प्रमाणाभावाकारकत्वाभावाच्च नतस्यांगत्वं एवंसत्यपि यदि प्रकृतिरतिदिश्येत ततनोभेदनवद्वि
कृतावेवनिमित्तसंनिपाते नैमित्तिकं विकृत्यंगतया प्रकृतसन्नुष्ठानं प्रसज्येत भेदनहोमानुष्ठानवत् न

त्वेतदस्ति· सर्वथा न निमित्तानिदेशो नैमित्तिकत्वं वा विकृतेः। कर्त्ता अधिकारी· तस्यापि प्रकृतावनंगत्वा
त्· अत एव तद्विशेषणानां स्वर्गकामत्वाहिताग्नित्वादीनामनतिदेशः। अत एव स्वपत्नीक्ष्यादावाहित
त्वस्यानतिदेशः। राजत्वादेस्तु कर्तृविशेषणत्वात्तस्य च प्रकृतावंगत्वाद्विकृतावतिदेशाद्दृष्ट एव· नहित
त्प्रकृतावधिकारिविशेषणं· अधिकारिणः शाब्दविधिबोधितत्वपक्षे उद्देश्यविशेषणस्य राजत्वादेर्विवि
क्षापत्तेः। वस्तुतस्तु प्रथमापेक्षितत्वेन स्वाराज्यकामपदस्य फलपरत्वादधिकारिपरत्वानुपपत्तेरधि
कारी आर्थिकविधिबोध्य एवेति तत्र न शाब्दस्य राजत्वादेरन्वयसंभव इति राजत्वादेः कर्तृविशेषणत्वमे
व· अत एवाहिताग्नित्वादेर्यौक्तिकस्यार्थिकोधिकारिविधौ विशेषणत्वकल्पनं· याज्ञिकास्तु राजत्वा
देरधिकारिविशेषणत्वमंगीकृत्यानतिदेशं मन्यंते· समुदायो अग्नीषोमीयादिप्रधानांतरसाहित्यं· तत्
स्य प्रकृतावंगत्वेपि परप्रयुक्ताग्नीषोमीयादिप्रतियोगिकत्वात्तदभावे विकृतौ नातिदेशः॥४॥ गुण

कामेषु॥ ॥येप्रकृतौ गोदोहनादिगुणजन्याः कामास्तेषामनंगत्वादनुपकारकत्वाच्च यद्यपि नातिदेशः
स्तथापि तज्जनकीभूतगोदोहनादिगुणानां प्रणयनोपकारकत्वे नातिदेशो विकृतावपि कामनायां सत्यां
फलोत्पत्तौ न किंचिद्बाधकं· नवांगमेव विकृतावतिदेष्टव्यमिति नियमे प्रमाणमस्ति· करणोपकारसा
कांक्षाया विकृतिभावनायास्तज्जनकापेक्षायामुपकारकमात्रस्यैवातिदेशात्· नहि विकृतिभावनान्य
गमपेक्षते प्रमाणाभावात्· अतः स्वादिरत्वादिवदेव गोदोहनादीनामप्यतिदेशः फलोत्पत्तिश्चेति प्राप्ते
सत्यं विकृतिभावनोपकारकमेवापेक्षते तथापि सौर्यादौ द्रव्यान्यप्रकृतिचोदना तदर्थे एव प्रथमत उपतिष्ठ
ते परत्वाच्च तदन्वितमुपकारकं· तत्र चोदनां येभूतायां प्रकृतिभावनायां यदन्वितं तदतिदिश्यते·
अनन्वितस्योपस्थित्यभावेनातिदेशायोगात्· अन्वितं चापशुकामप्रयोगे चमसेन विशिष्टं प्रणयनं· प
शुकामप्रयोगे प्रणयनमात्रं· तत्र प्रयोगे प्रणयनस्य परप्रयुक्तगोदोहनोपजीवित्वेन द्रव्यानाक्षेपकत्वेन

६

स्वरूपेणैव प्रधानभावनान्वयात् अंगमेव प्रधानभावनायामन्वेतीत्यभिप्रायेण तस्यैवातिदेश इति भवा
दः। अत एव फलार्थगुणानामनतिदेशः। नावातिदेशाभावे थाश्रयस्य प्रणयनस्याविकृतावपि सत्त्वात्तत्रै
वकामनायां सत्यां गोदोहनानुष्ठानोपपत्तिः। प्रकरणपाठवैयर्थ्यापत्तेर्गुणफलसंबंधविधेराश्रयप्र
योजकत्वशक्तिकल्पनागौरवप्रसंगाच्च प्रणयनमात्रस्याश्रयत्वानुपपत्तेरवश्यं दर्शपूर्णमासापूर्व
साधनीभूतप्रणयनत्वेनैवाश्रयत्वात् विकृतौ तदभावेन गोदोहनानुष्ठानानुपपत्तेः। अत एव खादिर
त्वादेः संयोगपृथक्त्वन्यायेन क्रत्वर्थत्वस्यापि सत्वादतिदेशोपपत्तावपि अग्नीषोमीयापूर्वसाधनीभू
तयूपाभावात्तेन वीर्यादिफलोत्पत्तिः। भाष्यकारस्य तु एतादृशविषये फलोत्पत्तिं मन्यमानस्याभि
प्रायेण विघ्नः यत्र तु नाश्रयापेक्षा विजातीयप्रस्तरप्रहरप्रहरणत्वादिनैव चायुरादिफलप्रतिसाधन
त्वं आयुरादिप्रकाशकमंत्रस्य च स्वप्रकाश्यकफलजनकत्वेन प्रहरणांगत्वं तत्रमेव सैवंविधत्वावपि

हेरंब
६

तस्मात्फलोत्पत्तिः ५॥ एककर्मोपि॥ ॥ सौर्यादिशो षघ द्रव्यकत्वैकदेवताकत्वाभ्यामाग्नेयं विकार इ
ति वक्ष्यते। आग्नेयत्वाके चाग्नेयद्वयं पौर्णमास्यमावास्याय कालः तदत्राग्नेः कालकमित्युक्तौ स्तकर्भयो
र्णमास्यधिकरणे सौर्यश्च विनिगमनाविरहादुभयविकार इत्यप्यविवादः सौर्ये चरुपदं स्थितिवचनाद्दै
कल्पिकः पौर्णमास्यमावास्यायोः किं पौर्णमासीकालीनसौर्यप्रयोगे पौर्णमासीकालीनाग्नेयस्यामा
वास्याकालीनसौर्यप्रयोगे चामावास्याकालीनस्य व्यवस्थितं प्रकृतित्वमुत व्यवस्थितविकल्पेनेति
चिंतायां तत्तत्कालकत्वरूपावांतरसादृश्याद्व्यवस्थितः एवं च चतुर्होत्रा पौर्णमासीमभिमृशेत्संचहो
त्रामावास्यामिति विहिततत्तदंगमंत्रयोरपि व्यवस्था। अत्र हि पौर्णमास्यादिसंज्ञकप्रधानसंबंधिहि
विरेव पौर्णमास्यादिपदेन लक्षयित्वा तदुद्देशेन मंत्रमात्रविधिरभिमृशेन्मंतु आसन्नानि हवींष्यभिमृशे
तीति वाक्यांतरप्राप्ते आश्रयत्वेनानूद्यते इति साधितं तृतीये अतश्च मंत्रयोरपि व्यवस्थोपपत्तेः प्रकृति

७

त्वव्यवस्थेति प्राप्ते भावनायाविजातीययागत्वावच्छिन्नस्यवानुग्राहकरूपेतिकर्त्तव्यताकांक्षानुप
योगविशेषस्यः अतएवैकजानीयस्य सौर्यंस्यवैकल्पिः कोभयकालकत्वाद्वैकल्पिकोभयविका
रत्वावगतेरव्यवस्थयैवतत्तदाग्नेयप्रकृतिकत्वं मंत्राणांचाव्यवस्थेतिसिद्धं यत्तुपार्थसारथिनावार्त्तिक
स्वारस्यादाग्नेयैकत्वमभ्युपगम्यमंत्रयोर्दृष्टार्थत्वेनविकल्पादेकस्मिन्नाग्नेयेप्रधानातरसाहित्यानु
रोधेनप्रक्तेतौव्यवस्थायामपिविकृतौतदभावेनव्यवस्थाकारणाभावादव्यवस्थितविकल्पोमं
त्रयोरितिसिद्धांतितंतन्मंत्रविकल्पस्यचिंतायाः द्वादशसंगतयाअतिदेशविचाराभावेनाध्यायसं
गत्यभावापत्तेराग्नेयभेदस्यचस्यापूितत्वेमैकृपानुपपत्तेरुपेक्षितं ६ लिंगः॥ ॥इष्टिषुदर्शपू
र्णमासयोः प्रवृत्तिरिक्तं तत्रापिसौर्यादिषुऔषधद्रव्यकत्वाविशिष्टेकदेवताकत्वरूपविशेषसा दे॰रं॰
दृश्यादाग्नेयविकारत्वं अत्रचमानानायस्यैकदेवताकत्वेपिऔषधद्रव्यकत्वाभावादाग्नेयविशेषयं ७

अग्नीषोमीयादेरौषधद्रव्यकत्वेप्यनेकदेवताकत्वादपरं अत्रयद्यपिएकदेवताकत्वंनामनेक
देवताकत्वकत्वंअग्नीषोमीयादावपिव्यासज्यवृत्तेर्देवतात्वस्यैकत्वेनातिप्रसंगात् नाप्येकदे
वताव्याधिष्ठानकत्वं देवतात्वस्यद्रव्यद्विनिष्ठत्वेनदेवतात्वीपस्वरूपसंबंधेनप्रत्येकाश्रयाणामेवत
दाधिष्ठानतयाआग्नेयेप्यव्याप्तेः पर्याप्तिसंबंधावच्छिन्नाधिष्ठानत्वविवक्षायांअग्नीषोमीयेप्य
तिव्याप्तिरेव संबंधद्वयातिरेकेणपदमात्राधिष्ठानत्वस्यवक्तुमशक्यत्वाज्ज्ञातयापिदेवतात्वाश्रय
प्रतिपाद्यार्थैकत्वकत्वमेवैकदेवताकत्वंएकत्वं एकसंख्याकत्वं अर्थस्यदेवतापक्षेतुदेवतात्वाधि
ष्ठानैकत्वमेव तत अस्तिचेदमाग्नेयेसौर्येच प्रथमातिक्रमेकारणाभावानेकवचनांतेनैवत
द्धितविग्रहात् आग्नमेवस्वेनभावराधयेनसमर्द्धयतिअमुमेवादित्यंस्वेनभागधेयेनोपधावतीसाध
र्थवादाच्च अग्निर्मूर्द्धाउदुत्यंजातवेदसमितिमंत्रवर्णाच्च अग्नीषोमादावग्नयोरुक्ततदभावान्नैकदेव

८

ताकत्वं· अतएवमारुतं सप्तकपालमित्यादौ मरुतोपस्य हि सपे इति मंत्रवर्णादनेकदेवत्यत्वात्
गतेः सप्तपिपदैकदेवत्यानोग्नेयविकारत्वं· अग्नयेक्षामवतेवरुमित्यादौ वससप्तपिपद भेदेप्रमाणांत
रेणार्थैकत्वावगमादाग्नेयविकारत्वं· अनेकदेवताकेषुतु अग्नीषोमीयैंद्राग्नयेः। तत्राप्यग्नीषोम
देवत्यस्यसोमपदघटितानेकदेवत्यस्यचतुरक्षरानेकदेवत्यस्य वाग्नीषोमीयविकारत्वमेव· इं
द्राग्निदेवत्यतस्येंद्रपदघटितानेकदेवत्यस्य चैंद्राग्नविकारत्वमेवेति व्यवस्था· तथाऐंद्राग्ने
ऽगारवाभेदे नैकादशकपालत्वद्वादशकपालत्वयोर्विकल्याद्वादशकपालायांत दधिकसंख्यक
कपालायां वा विकृतौ ऐंद्राग्नविकारत्वमेव· अतन्न्यूनसंख्याकेकपालायामष्टाकपालभिन्ना
यांतु विकल्प एव व्यवस्थापक सामान्याभावे· अष्टाकपालकायांतु सप्तसंख्याथनेकदेवताकत्वेद्र हेरंब
व्यघटितसादृश्यस्यबलवत्वादाग्नेयविकारत्वमेवेत्याहुः· आज्यद्रव्यकायांमुपांशुयाजास्यादधिप ८

योरूपसान्नाय्यद्रव्यकायांतत्तद्रव्यकस्यैसादिविशेषतः प्रकृतित्वबोध्यं·७ विप्रतिपत्तौ॥ ॥ एवंसा
दृश्यस्यनियामकत्वे निरूपिते धुनात योर्विधेर्बलाबलं विमृतेतत्रापि द्रव्यघटितदेवताघटितसादृश्य
योर्यत्र विप्रतिपत्तिर्यथाऐंद्रः पुरोडाशआग्नेयं पयइत्यादौ तत्रकस्यबलवत्त्वमितिचिंतायांदेवता
याःप्रथमोपस्थितत्वेनमुख्यत्वात्प्रधानत्वाच्चतत्सादृश्यमेवबलवत्· तस्मएवैनमिंद्रःप्रजयाप
शुभिश्चतर्पयतीत्याद्यर्थवादवशाद्धि यागो देवताराधनार्थः आराधिताचसफलं ददातीतितस्याः
प्रधानत्वं· देवतासादृश्यं च यद्यपि निरुक्तैकदेवताकत्वरूपं द्रव्यसादृश्याविरोधितथापि समानशब्दा
र्थकत्वरूपं तद्विरोधीतितस्य बलत्वमिति प्राप्ने प्रथमोपस्थितत्वेपि कर्मविध्युत्तरकालमतिदेशाकल्प
नात्तदा वद्रव्यस्यैवप्रत्यासन्नत्वेन शीघ्रोपस्थितेस्तत्सादृश्यस्यैवबलवत्त्वं· यागोहित्यद्रव्यवहारा
द्देवतोद्देशविशिष्टद्रव्यत्यागरूपः। तत्र द्रव्यस्य प्राधानभूतेत्यागविशेषणत्वंदेवतायास्तुविशेष

८

णीभूते उद्देश्यो तो द्रव्यं याग प्रत्यासन्नं । यद्यपि च देवताप्रसादस्यैवार्थवादत्वञ्चाद्यागस्य फलसाधन
त्वेद्वाराकत्वं कल्प्यते तथापि देवताभिधाः शब्दो वाधेयागं प्रति द्रव्यं प्रति वा प्राधान्ये प्रमाणाभावात्प्र
श्रुत द्रव्यस्यैव पाष्ठिकान्वये विशेष्यत्वेन प्राधान्यावगतेर्न देवता सामान्यस्य वलवत्वाशंका
वस्तुतस्तु न देवताप्रसादस्य मध्यस्य द्वारत्वमिति जैमिनिमतं वक्ष्यत एव । अतो नांतरंगत्वत्वाद्देवद्र
व्यसादृश्यस्य वलवत्वं । एवं च धर्मानुग्रहोप्यांजस्येन संगच्छते । इतरथा पुरोडाशेष्वाशाखाछेना
दीनां वाधापत्तेः । एवमन्येत्राप्यंतरंगत्वादिर्नासर्वत्र सादृश्ययोर्वलावलं द्रष्टव्यं । यत्र तु न्याये
नोभ्यादृशं वलावलं कल्प्यसत्र याज्ञिकाचारादन्याद्दृशास्तत्र तन्मूलभूत श्रुतिरूपत्वं व भातिदे
शेतन्याय कल्प्याति देश्यस्यवाधद्रूसेवं द्रष्टव्यं । अत एव स्यैम्यश्चरुनुरिसादौ शब्दार्थे गतमासरू
पसादृश्यस्यनिरूपालं ? कैः कदेवताकत्वरूपसादृश्यपेक्षया अंतरंगत्वेनापि नाग्नीषोमीयवि

हेरंब
८

कारत्वमपि त्वाग्नेयविकारत्वमेव । एवमाग्नेय एकादशकपाल इत्यादौ देवतासामान्यस्य कपालसं
ख्यासादृश्यद्यपेक्षया अंतरंगत्वेपि नाग्नेयविकाकारत्वमपि त्वग्नीषोमीयादिविकारत्वमेव । केचि
त्वेतादृशविषये कपालैकादशत्वादीनां द्रव्यनिष्ठसाधनतावच्छेदककोटिप्रविष्टत्वाद्द्रव्यसादृश्य
घटकत्वमेवेत्यग्नीषोमीयविकारत्वं समर्थयंते ॥ ८ ॥ हिरंण्य ॥ ॥ द्रव्यनिष्ठत्वसादृश्ययोः परस्य
रविरोधे तु देवतासादृश्यो पष्टब्धस्यापि द्रव्यसादृश्यस्य श्रौतलिंगोपष्टब्धद्रव्यसादृश्यापेक्षया
दुर्वलत्वं । यथा प्राजापत्येषु घृते चरुं निर्वपेत् छत्तक्षुल्लमायुष्कामः इत्यत्र छत्तक्षुल्लानां दीप्तिमत्वलक्ष
णतेजस्वित्वसादृश्यस्य प्रजापतिदेवताकत्वसादृश्योपष्टब्धस्यापि कठिनत्वापरपर्यायविशदे
त्वसादृश्यापेक्षया दुर्वलत्वं । तेन नापि यागस्तेजस्वित्वसादृश्याद् उपांशुयाजविकारोपि तु कठिनत्व
सादृश्यादाग्नेयविकार एव चरुशब्दप्रयोगात् घृते श्रपतीति श्रपणविधानाच्च । यद्यपि नायं वि

चरुः

१०

क्लिप्तभावेन मुख्यत्वानुगतथापि अवरोचरुशब्दानुवादत्वचतुर्धर्मयोगादुपपद्यत इति औषधधर्म
प्रापकं भवति लिंगं न चाग्नेये चरोरभावादाग्नेयधर्माधर्मणां चरुगतत्वाभावेन कथं चरुशब्दस्त
त्रौषधधर्मप्रापक इति वाच्यं सोर्यचरोराग्नेयविकारत्वेनाग्नेयधर्माणामपि चरुगतत्वाच्च रुशब्द
स्यतत्प्रापकत्वसंबंधभवात् एवंश्रपणवाक्येपि यद्यपि नश्रपणानुवादेन घृतविधिः श्रयणस्याग्ने
यविकारत्वेपि विक्लिप्तिरूपप्रयोजनाभावेन बाधात् घृतस्योत्पत्तिवाक्येप्राप्तत्वाच्च तथापि अग्निसं
योगमात्ररूपं श्रयणशक्त्या लक्षणया वा पतिप्रसवविधिपा विधीयते तच्च घृतविशिष्टश्रयणे वेत्यन्य
देतन क्वचिच्छिष्टविधित्वमित्यत्र नियामकाभावात् उत्पत्तिवाक्ये घृतस्य परंपरासंबंधेन यागा हेरंब
न्वये तस्य विलंबोपस्थितिकत्वादत्रैव विशिष्टविधिरिति तु युक्तमुत्पश्यामः। यद्यपि च श्रयणस्या १०
पांशुयाजविकारत्वेपि प्रतिप्रसवविधिसंयुज्यत एव आज्येप्याग्निसंयोगसंभवात् तथापि द्रव्यांत

रसंयोगस्यासंताप्राप्तस्योपांशुयाजविकारत्वे विधेयत्वापत्तेराग्नेयत्वाविकारत्वे द्रव्यांतरस्य जलस्य याप्तौ
तत्र घृतविधाने लाघवमिति लिंगत्वोपपत्तिः। एतदक्षरसे नैव वा भाष्यकारेण तस्मिंश्च श्रयणश्रुतेरि
ति सूत्रस्य घृतद्रव्यकत्वसादृश्यादुपांशुयाजविकारत्वमाशंक्य घृतस्याधिकरणत्वश्रुतेः प्रदेयत्वाभा
वादिति व्याख्यानांतरं कृतं सर्वेषां श्रौतलिंगोपदिष्टव्यस्य सादृश्यस्य बलवत्वात् हिरण्ययाग औषध
विकार एव एवं च यत्र हिरण्ययागांतरे लिंगाभावस्तत्र देवतासादृश्यात्तदभावेपि आज्याधर्माणं
भयसामनुग्रहात्तेजस्वित्वसादृश्ये नाज्यविकारत्वमेव चरुशब्दस्य वा स्थालीपुलाकन्यायेन गम
कत्वादौषधविकारत्वं कृष्णलेष्टिविकारत्वं वा ॥ मधूदकं ॥ ॥ चित्रेष्टावनेके यायागा इत्युक्तं वि
त्राधिकरणे कोत्सभे तत्र दधिघृतपयोधानातंदुलयागानां निर्णीतैव प्रकृतिः। मधूदकयोरुक्तवर्णसा
म्यादुपांशुयाजविकारत्वं प्रकृतोदाहरणे देवतासामान्यसत्वाच्च ननु स्वाभाविकद्रव्यत्वसादृश्या

११

द्वयेर्लिंगेविशेषस्यनिर्णयकत्वाभावेवहुतरान्यधर्मानुग्रहस्यैवनियामकत्वात् नैमित्तिकद्रव्यत्वस्यान्ये
पिसत्वाच्च अतश्चसर्वयागानामेकफलकत्वेनैकतंत्रत्वान्द्रूयसामनुग्रहायत्र्याणांमधुघृतोदका
नांभुपांशुयाजधर्मास्तंत्रानुष्ठीयमानस्यविरुद्धधर्मविषयेकार्याः। अन्हसानुष्ठीयमानद्रव्यसंस्कारविष
येतुतत्तद्यागीयधर्मास्तत्रद्रव्येषुकार्याः॥ ॥इतिश्रीभाट्टदीपिकायांखंडदेवकृतौअष्टमस्यप्रथमः
॥ ॥९ वाजिने॥ ॥वाजिनयागस्यामिक्षानुनिष्पन्नवाजिनप्रातिपत्तिकर्मणोध्यंगापेक्षायांकिंसौमिका
तिदेशउतदार्शिकइतिचिंतायांसौत्रामण्यंगदेवतासंस्कारार्थसुराग्रहेषुचैवमेवचिंता तत्रसोमोवैवा
जिनंसुरासोमइत्यसोमेसोमशब्दः सोमधर्मातिदेशार्थः। नवोपशयोयूपोभवतीतिवदर्थवादस्यत्वा
दनातिदेशकत्वं तद्वदिहसिद्धसादृश्याभावेनेननोमातिदेशावश्यकत्वात् अतएवानुवषट्कारमत्रौसं हेरंब

मुपह्वपमक्षणउभयत्रदर्शयति सुरायांसीसेनक्रयणंद्वंद्वंसक्तुभिःभिश्रणंएकापुरोरुक्दउपयामे ११

तिमंत्रोग्रहेत्वासादमंसौमेवासस्यपनहनंदर्शयति ग्रहशब्दश्चैवंसतिसुतरामुपपद्यतइतिप्राप्तेआ
र्थवादिकस्यसोमशब्दस्यप्रकृष्टफलवत्त्वेरूपत्वेसिद्धसादृश्येनोपपत्तौवाक्यभेदापादकाविधिपरत्वेप्रमा
णाभावात् ग्रहशब्दस्यपायणीयवद्ग्रहणस्योपदेशिकत्वेनैवोपपत्तेर्लिंगानांचवाचनिकतयाप्युपप
त्तावप्रातिवद्धेनचोदनालिंगातिदेशेनदार्शिकविध्यंतएव तत्रापिवाजिनेपशुपभवत्त्वसादृश्याद्यसयोया
गविध्यंतः सुरायांपौरोडाशिकऔषधद्रव्यकत्वात् अतएवशाध्यैरेवद्वीक्षणीयामाप्नोतीतिदीक्षणी
माप्निवचनंसंगच्छते इतरथाहितस्याः प्रयसत्वेनप्राप्निवचनेनस्फुतिरसंगतेवस्यात् तथानैतेषांपुरो
डाशविध्यंतेग्रहपुरोडाशशब्दौतुपशावइतिग्रहेषुपुरोडाशशब्दानुवादस्तद्धर्मकत्वेसंगच्छते यद्य
पिचैतेषांग्रहयागानांतराणांवार्तिककारमतेपशुपुरोडाशकार्यापन्नत्वस्यदशमेवक्ष्यमाणत्वात्स्या
नापत्येवपुरोडाशशब्दोपपत्तिस्तथापिस्यानापत्त्यापितावन्यशुपुरोडाशधर्मप्राप्तेर्लिंगोपपत्तिः।

वस्तुतस्तु अंगापेक्षायां प्रागधात् इति तस्मात् सादृश्यैव पुरस्कूर्तित्वेन स्थानापत्यतिदेशापेक्षया चोदनालिंगातिदेश

स्य बलवत्वात् औषधद्रव्यकत्वेन सर्वप्रकृतिभूतदर्शपूर्णमासविकारत्वमेव । अत एवैषाम संभवे कुर्यादि

ष्टिं वैश्वानरीं बुधद्र्यादौ त्रेधा तव्यादीक्षणीयेसादौ चन ज्योतिष्टोमादिधर्माः । यदा तु दाशमिकसूत्रभा

ष्यकाररीत्या प्राकृतपशुपुरोडाशयागत्वसुरादिद्रव्यांतरमात्रविधिरिसात्त्री यनेतदा सोमादि

शब्दस्य नामातिदेशनिराकरणमात्रार्थमिदमधिकरणं न तु औषधद्रव्यद्रकत्वलिंगकातिदेशसि

ध्यर्थं एवं अभावेपि पशुपुरोडाशस्य दर्शपूर्णमासविकारत्वसिद्धेरितिध्येयं १० पशुः ॥ ॥ हेरं ॥ भु

दर्शपूर्णमासद्वविकार इत्युक्तं तत्रापि किं आग्नीषोमीयपुरोडाशविकार उत सान्नाय्यविकार इ

ति चिंतायां घनत्वसादृश्यान्पुरोडाशविकारः । न च पशुप्रभवत्वसादृश्यस्य द्रव्यगतस्य सान्नाय्ये

सत्वान्नियामकाभावः । घनत्वस्यालिंगोपष्टब्धत्वात् अग्नीषोमाभ्यां त्वा जुष्टं प्रो

क्ष्यामीति हि प्रोक्षणं पुरोडाशधर्मः । तथा पशुं पर्यग्निं करोतीति पर्यग्निकरणं पुरोडाशविकारत्वे लिंगं

न च पशुप्रभवत्वसादृश्यस्यापि उखादर्शनरूपलिंगोपष्टब्धत्वान्नियामकाभावः । तथात्वेपि देवता

सादृश्यस्यैवाग्नीषोमीयविकारत्वे नियामकत्वादिति प्राप्ते देवतासामान्यो पष्टब्धस्यापि द्रव्यसादृश्य

पि स्यान्यथासिद्धलिंगोपष्टब्धत्वेनानन्यथासिद्धलिंगोपष्टब्धसादृश्यापेक्षया दौर्बल्यात् सान्ना

य्यविकार एव पशुः । तथाहि नात्र प्रोक्षणानुवादेन मंत्रो विधीयते येनेदं लिंगं भवेत् । तस्यानुलिं

गादेव प्राप्तत्वात् प्रोक्षणभावेनैवात्रापूर्वो विधीयत इति विपरीतसाधकत्वं पर्यग्निकरणं तु प्रदे

यपुरोडाशधर्मत्वेन प्रकृतौ कुप्तेनेहप्रदेयप्रकृतिभूतपशुसंस्कारकतया दृश्यमानं प्राकृ

तं अपि त्वपूर्वमेवेति न तदपि लिंगं अतो घनत्वसादृश्यं नालिंगोपष्टब्धं । यदि पशुरूखायां पच्य

मानः स्कंदेदिति उखादर्शनं तु अनूद्यमानत्वादनन्यथासिद्धं अतो घनत्वसादृश्यं नालिंगोपष्टब्धं ।

१३

यद्विपशुरुखायां पच्यमानः स्कंदेदिति उखादर्शनं तु अनूद्यमानत्वादनन्यथासिद्धं लिंगं अतस्तदुप
स्थप्यं पशुप्रभवत्वमेव बलीयः ११ दध्नाः॥ ॥तत्रापि दधिविकारः पयो विकारो वेति विनायां घन
त्वसादृश्याद्दधिविकारत्वमेव नच सांनाय्या पशुप्रभवत्वसादृश्येन पयोविकारत्वशंका कारण
त्वस्य व्याप्तिरूपतया अतींद्रियस्यानुमानिकत्वे नूपसंगम्य घनत्वापेक्षया दौर्बल्यादिति मैह
दृष्यादीनां पयस्त्वे कदिनांतरितानां विकारदर्शनादेकदिनस्यापि त्वसादृश्यं स्वतो गतिमत्वसा
दृश्यं च प्रत्यक्षमेवेति तत्राह कृतेन सांनाय्यस्य पशुप्रभवत्वेनैकस्य घनत्वस्यैव बाधास्पयो विकार
त्वमेव॥ आमिक्षा ॥२॥ आमिक्षा तावन्नायोतरमपि तु दधिपयोन्यतररूपमिति साधितं चतुर्थे
अतश्च तदन्यतरविकार इति तावदविवादं तत्रापि तु विशेषचिंतायां तप्ते पयसि यत्र द्वितीयानिर्दि
ष्टदध्न एवसा वैश्वदेवीति द्वंद्वेन परामर्शोमितु समभ्यंत पदानि द्विहृष्टस्य पयसः ।गुणभूतत्वात्

हेरंब
१३

नवानपतेर्हिर्ह्रिमेकत्वायपसो व्याप्यमानत्वेतद्ध्यपेक्ष्यथापि प्राधान्यावगतिः द्विकर्मकधातुस्थले
अधिकरणत्वादिकारकांतराविवक्षायां कर्मकारकसंबंधमात्रविवक्षायां च संबंधसामान्ये षष्ठी
प्राप्तौ अकथितं चेति सूत्रेण कर्मसंज्ञाकरणं द्वितीयाविधानावगतावपि प्राधान्ये प्रमाणाभा
वात् प्रकृते सप्तमीश्रवणेनाधिकरणत्वविवक्षावगते द्वितीयकर्मप्रसक्त्यभावाच्च अतस्त्व
दधिरूपत्वादामिक्षाया दाधियागविकारत्वमेवेति लौकिकस्य पयसोधिकरणत्वमिति प्राप्ते म
धुरसभूयस्त्वदाध्यभावेपि च अम्लांतरेणामिक्षासंपत्तेरन्वयव्यतिरेकाभ्यां जुषतां युंज्यंयपद्
ति मंत्रवर्णाच्च पयस एवावस्थाविशेषापन्नस्यामिक्षापदवाच्यत्वावगतेस्तदनुरोधेन तच्छब्द
स्यापि समन्वेत पदनिर्दिष्टपयः परामर्शित्वस्यैवावगतेः पय एवामिक्षा अतश्च तद्यागविको
रत्वमेव एवं च तप्ते पयसीत्यत्र सप्तम्या प्राधान्यलक्षणा द्वितीये यो च सक्तुन्यायेन करणत्वलक्ष

णेऽप्यपि ध्येयः अवस्थाविशेषरूपामिक्षावनतापां विनेतिन तस्यापि विवक्षा यदि तु तां पं विनाप्यामिक्षो

लोके संभाव्यते तदा न सम्यक् प्राधान्य लक्षणापि तत्पयोविधिकरण त्वविशिष्टद्ध्यानं पुनस्यैवावस्था
विशेषविशिष्टपयोरूपामिक्षोद्देशेन विधेयत्वात् उद्देश्यवाचकपदकल्पनया वाक्यार्थपूर्तिः। तस्यैव
च तच्छब्देन परामर्शात् तच्छब्दलिंगोपपत्तिः। अधिकरणत्वस्यैव च दध्यानयनं प्रसंगतो पि पयसो नागत्वं कुत्सद्य
योजनत्वादिति ध्येयं अत आमिक्षाया अवस्थाविशेषविशिष्टपयोरूपत्वात् संयोगाग विकारत्वं तेन पयस्येव
प्रातर्दोहधर्माः। दाधितु लौकिकमेव संस्कारकं॥ ॥सत्रमहीनश्च॥ ॥अगर्हणेषु द्वादशाहस्य प्रवृ
त्तिरि स्फुक्तं द्वादशाहे चास्ति सत्रत्वाम हीनत्वं चेति धर्मद्वयं तत्रासीरन् उपेयुरित्यादिचोदनाचोदिते सत्रत्व
मखंडोपाधिः। अग्निपत स्वामिके यजति चोदनाचोदिते चाहीनत्वमंखंडोपाधिर्हेट्टव्यवहारात् तत्तद्धर्म

कत्वेन निमित्ते च तत्र धर्मविशेषा विहिताः। तथा अन्येपि सत्रसंज्ञका अहीनसंज्ञकाश्च चाहर्गणा अधर्मे

कासम्यङ्मा आम्नाताः। तत्र द्विविधेष्वपि द्वादशाहस्यैकस्य धर्मप्रवृत्तिः। अतो विरुद्धः समुद्भीयते विरुद्ध
श्च विकल्पने न ह्यत्र द्वादशाहभेदोस्ति येनावैतरसामान्यात्तत्तद्द्वादशाहवदि सुति देशाबाकंपकल्प्येत
भेदे प्रमाणभावात् द्वादशाहवदितिवाति देशाबाधकपकल्पने व्यवस्थैव युक्ते सेव प्राप्ते सत्स्वपि द्वादश
हत्वे नैषातिदेशस्तत्र त्वरूपनिमित्ताभावात्तरन्नैमित्तिका धर्मा नाहीने अहीनत्वरूपनिमित्ताभावाञ्च
तन्नैमित्तिकाधर्मा नु सत्रे प्रवर्तन्ते भेदनीभावदवहोमस्तंदुलयागादावितिफलतो व्यवस्थितं प्रकृतिलं
सत्रात्मके षगर्हणेष्व सत्रात्मकस्य द्वादशाहस्याहीनात्मकेष्व हीनात्मकस्येत्ति द्विरात्रादारभ्यैका
दशरात्रांतमहीनाः द्वादशाह उभयात्मा त्रयोदशरात्रादारभ्य सर्वे सत्रभूता एव तथैवोक्तलक्षणस
त्वात् हट्टव्यवहाराच्च अतस्तोष्युतेषु तत्तद्रूपस्य द्वादशाहस्य प्रवृत्तिः॥ ॥अन्यतरतोतिरात्रत्वात्
॥ ॥पंचदशरात्रस्य कुंडपायिनामयनस्य च न सत्रलक्षणत्वेन पंचदशरात्रादौ अहीनलक्षणसत्वे

नपंचदशरात्रादौ अहीनलक्षणसत्वेन तदनुपपत्तेः। अत एव न सत्राहीनयोर्भेदुक्तलक्षणं न वैकाद
शरात्रांतव्येवस्थुद्वाहीनत्वं अतश्च पंचदशरात्रादौ अहीनात्मकद्वादशाहस्यैव प्रवृत्तिरिति प्राप्ते अहीन
त्वाभावेपि प्रावृत्त्येणाहीनेन्यतरतोतिरात्रत्वादस्मिन्नपि पंचदशरात्रेन्यतरतोतिरात्रत्वेनाहीनत्वोप
चारस्य सत्कृयत्वेनोपपत्तेरभियुक्तप्रसिद्धानिरुक्तलक्षणाक्रस्यैव सत्रत्वात् गीकारात् संचदशरात्र
कुंडपायनामयनयोरपि सत्रत्वमेव अत एव गृहपतिर्गृहपतिरिति गृहपतिशब्दः सत्रैकांतवृत्तिः कुंड
पायनामयने अतः सत्रात्मकद्वादशाहप्रकृतित्वमेवानयोः॥ ॥इतिश्री खंडदेवविरचितायां भाट्टदी
पिकायां अष्टमस्य द्वितीयः॥ ॥हविर्गणो॥ ॥आग्नावैष्णवमेकादशकपालं सारस्वतं चरुं बार्हस्प
त्यं चरुमित्यादि हविर्गणे क्रमसामान्याग्रथमततीययोः आग्नावैष्णवबार्हस्पत्यसमारान्नेयाग्नीषो
मीयविकारत्वमिति प्राप्ते क्रमसामान्यस्याग्नावदस्यान्यापेक्षत्वेन विलंबोपस्थितिकत्वासन्निवाक्या

हेरंब

२५

गतदेवतासादृश्यस्यानन्यापेक्षत्वेनयागस्वरूपपरिचायकत्वेन च शीघ्रोपस्थितिपेक्षत्वे? कस्यबलवत्वा
त्तेनाग्नावैष्णवस्याग्नीषोमीयविकारत्वं बार्हस्पत्यस्य चाग्नेयविकारत्वं॥ ॥गणचोदनायां॥ ॥जूनकस
प्तरात्रे चत्वारि त्रिवृत्स्वहान्यग्निष्टोममुखानीति श्रुतं तत्र चतुर्ष्वहःस्वपि सु द्वादशाहिकदशाहांतर्गतप्राय
मिकस्य त्रिवृत्स्तोमकस्याहः प्रवृत्तिः त्रिवृत्वलिंगात्तु क्रमसहकृतगणत्वसामान्ये नान्यापेक्षेण द
शाहांतर्गतानामाद्यानां चतुर्णामहां प्रवृत्तिः। तत्तदहवृत्तित्रिवृत्वोस्यान्यानपेक्षत्वेन बलवत्वादिति प्राप्ते
स्वर्गकामो जनकसप्तरात्रेण यजेतेति वचनेनोसन्नानां सप्तानां कर्मणां मध्ये चत्वार्यन्यत्र त्रिवृत्वविधा
नेन त्रिवृत्वस्यायन्न द्विशिष्टत्वेन दुर्बलत्वादुत्पत्तिशिष्टेन गणत्वेनैव प्रथमस्य प्रथमाभित्यादिक्रमसहकृ
तेन सप्तानामप्यन्हां द्वादशाहिकदशाहांतर्गतसप्ताहविकारत्वं न च प्राप्तकमोनुवादेन त्रिवृत्वविधि
रग्निष्टोममुखः त्वस्य चाविधिरिति वाक्यभेदः। दशाहांतर्गतेचतुर्णां मध्ये प्रथमस्याग्निष्टोमसंस्थाके

१६

त्वेनाग्निष्टोमप्रमुखत्वस्य प्राप्तत्वात्: न चाद्येष्वेव चतुर्षु त्रिवृत्त्वविधौ प्रमाणाभावेनाग्निष्टोमप्रमुखत्वस्या
पि विधिरावश्यक इति वाच्यं प्रथमातिक्रमे कारणाभावात् त्रयाणामन्येषां विध्यंतरेण स्तोमविधानाद्वा
द्येष्वेव चतुर्षु त्रिवृत्त्वे प्राप्तेरिति भाष्यकाराभिप्रायः। व स्तुत स्तुत चतुः संख्याकोद्देशेन त्रिवृत्त्वविधौ योग्य
उक्त्या सस्य प्यहः सु आद्येषु चतुर्षु स्तोत्रेषु त्रिवृत्त्वविध्यापत्तेरहमात्रोद्देशेन तद्विधौ च सर्वत्र
तदापत्तेश्च चतुःसंख्याविशिष्टाहरुद्देशे च वाक्यभेदापत्तेरयमेव संख्याभिन्नत्रिवृत्त्वविध्यापत्तेश्च वि
शिष्टकर्मोपत्तिविधिः। त्रयाणां चान्येषां विध्यंतरेण विधिः। सर्वेषां च फलवाक्येन संबंधमात्रकरणं
एवं चोपत्तिवाक्ये चतुर्णां गत्वप्रतीतेस्तस्यान्यमिति गतत्वत्रिवृत्त्वस्याप्युपस्थितत्वेन सामर्थ्योपि त्रिवृत्त्व
स्यांगभूतस्तोत्रवृत्तित्वात् प्रधानवृत्तिगणत्वापेक्षया दुर्बलत्वेन गणत्वसाहचर्येनैवाद्यानां चतुर्णामति
देशः प्रसाध्यः। सर्वथानाद्यस्यैव चतुर्ष्वतिदेशः। एवं चाग्निष्टोमप्रमुखानीत्यत्र वाद्योपपत्तिः। इतरेषां त्रयाण

हेरंब
१६

मन्यसंस्थाकत्वात् इतरथाग्निष्टोमानीत्येवावक्ष्यत सर्वेष्वग्निष्टोमसंस्थाकत्वस्यैवातिदेशेन प्राप्तेः
॥ ॥कालाभ्यासे॥ ॥ षट्त्रिंशद्रात्रे षडहा भवंति चत्वारो भवंतीति श्रुतं द्वादशाहांतर्गतद्वादशाहे चाद्य
एकः षडहः सधर्मकः श्रुतः। तदिह तस्यैव वारचतुष्टयमत्र प्रवृत्तिहतद्वादशाहस्यावृत्तिरिति चिंतायां नता
वदत्र षडहशब्दो नामातिदेशकः। तस्य संख्याविशिष्टाहवाचकस्य गुणविशिष्टकर्मविधायित्वेन ना
मत्वाभावात् सर्वोपि वा यौगिकत्वेनोक्तविधायित्वासंभवेनो नामातिदेशकत्वायोगाच्च नापि प्राकृतषडहस्य
वादेन संख्याविधिः। द्वादशाहत्वानुपपत्तेः स्यात्तस्या अनिवेशात् अत एकमात्र एव संख्यायाश्चतुर्विंश
तिर्विधीयते तेन तत्षडहस्य चतुरावृत्तिः। तथा च सूत्रं: षडहा भवंतीति क्रियाभ्यावृत्तिर्विहितस्तु चमसस्या
पत्तेः। चत्वारो भवंतीति श्रवणाज्जुहूसंयुक्तत्वान्नैव विन्यासे संख्याभेद एव अतश्च गणत्वसामान्याद्दश
हंद्विरभ्यस्यावशिष्टेष्वेव चतुर्षु द्वादशाहाद्यानां चतुर्णां प्रवृत्तिरिति प्राप्ते यपि तंत्र रत्नरीत्या चतुर्विंशति

१७

शतिरेतानि कर्माणि तथापि षडुह शारद्वतसादृश्येन तस्यैव चतुर्वीरं प्रवृत्तिः। वस्तुतस्तु नात्रता
वंति कर्माणि चतुर्विंशतिसंख्यायाश्रवणात् षट्संख्यायाः चतुःसंख्या द्वैचकत्व द्वयमिति न्याये
न कर्मान्वयमंगीकृत्य समेदांगीकारेक कर्मद्वशकापत्तिः षट्संख्यातत्वश्रवणादिनापि भिन्नवाक्यत्वमे
व। तेन षण्णामेव कर्मणां चतुर्वीरमावृत्तिः। सुचूप्रत्ययाभावेपि च प्रमाणांतरेण वृत्तौ भी कल्पनेन कश्चि
दोषः॥ अतः सूत्रभाष्यस्वारस्येन षमेवावृत्तेः षट्संख्यत्वसादृश्यादिना षडुहस्यैव वारचतुष्टयं
धर्माः॥ ॥संस्थागणे॥ ॥अनारभ्य शतानिष्टोमं भवति शातो वषं शताति रात्रमिति श्रुतं। तत्राग्नि
ष्टोमादिशब्दानां ज्योतिष्टोमस्य एव प्रचुरप्रयोगात्तदनुवादेन शतसंख्याभ्यासापादिका विधीयते
। नह्यग्निष्टोमादिशब्दानां संस्थाविशिष्टक्रतुसामान्यवाचित्वं तथात्वे अथातोग्निमग्निष्टोमेनेत्यादौ हेरंब
प्राकरणिकोत्तरवेधवरोधेन चयनस्याविकृतौ निवेशापत्तेः। अतो ज्योतिष्टोमवाच्यात्र द्वादशाहेप १७

वृत्तिः। अथ वाग्निष्टोमादिशब्दानां नागृहीतविशेषणान्यायेन संस्थामात्रवाचित्वात् ज्योतिष्टोमेनिरूढ
लक्षणांगीकारेपि प्रकृते तदाश्रयणे प्रमाणाभावान्नित्यकाम्यसंस्थानुवादेनैव शतावृत्तिविधिः।
अस्मिन्नपि पक्षे ज्योतिष्टोमस्यैवाश्रयत्वादिना सत्वान्नगणातिदेशः। अस्तु वेदं कर्मांतरं तथापि अ
न्यपदार्थस्यैकवचनांतत्वादेकमेव तत् शतसंख्यायाश्च संस्थागतत्वेनाभेदकत्वात्। अतः श
तसंस्थाकमभ्यस्तमेकं कर्म ज्योतिष्टोमवृत्तिविकार इति नगणातिदेश इति प्राप्ते एकप्रसरताभं
गापत्तेर्नेतावज्ज्योतिष्टोमोद्देशेन संस्थोद्देशेन वा संख्याविधिः। अतो वषट्कर्तृभक्षवदेव कर्मा
तरं तदपि नैकं तथात्वे एकस्य कर्मणो नैकसंस्थाकत्वस्याभ्यासमंतरेणानुपपत्तेः श्रूतसंस्याभ्या
सकल्पनापत्तेः। अतोग्निष्टोमोक्थ्यादिपदानां त्रिवृदग्निष्टुदग्निष्टुदग्निष्टोम उक्थ्यो वैरूपसोमे
त्यादौ विकृतियज्ञसामानाधिकरण्येनापि क्वाचित्कप्रयोगेण सांप्रतिकलक्षणयात्र संस्थाक

यज्ञांतरपरत्वभंगीकृत्यसशात संख्याभिन्नतावद्य ज्ञविधिरेवायं एवंचान्मयदार्थोनकर्मापितुयज्ञांतउ
क्थ्यसंस्थाकायज्ञाकारणंयस्मिन्निति व्युत्पत्त्याफलमेवेति ध्येयं तदपिचनोदिज्ञयथयज्ञविधिरेकप्रस
क्तामगतादवस्थापत्तेः। अपितुतासयोगसाअंशत्रयविशिष्टतावभावनाविधिरेवेतियुक्तागणास्ये
वातिदेशादृशावारमावृत्तिर्द्धिगुणमाससाध्यानकश्चिद्दोषः। कर्मैकत्वेपिआवृत्तेरावश्यकत्वेनसहसा
गणत्वानपोयाद्वादशाहधर्मोविरोधः॥ ॥गणाद्युपचयः॥ ॥शृताग्निष्टोमादौद्वादशाहगतद्वश
रात्रप्रवृत्तिरिस्फुर्तेः द्वादशाहेचदशौप्रथमोत्तमावतिरात्रसंस्थाकौदशरात्रप्रथमोत्तमौचाग्निष्टो
मसंस्थाकौ मध्यतनानिचाष्टौउक्थ्यसंस्थाकानिकेषांचित्मते क्थ्यसंस्थानिएकः षोडशीतद्दिहश
ताग्निष्टोमेतावदतिदेशप्राप्तानामुक्थ्यादीनांवाधादग्निष्टोमसंस्थाकत्वेनकात्वेनकापिक्षतिःउ
क्थ्यातिरात्रयोस्तुयेपुअतिदेशेनैवोक्थ्यस्तोत्रादिप्राप्तंतेष्वपिनकाचिच्चिंता येषुतुअग्निष्टोमसं

हरेः ब

स्थाकत्वप्राप्तिस्तेषुवचनादेवोक्थ्येषुकर्तव्येषुद्वादशाहिकान्येवोक्थ्यातिरात्रस्तोत्राणिउपस्थितत्वात्क
र्तव्यानीतिमात्रेणतावदतिदेशेनतेषामुपस्थितिः। प्रथमम्युमपथमभिरेवक्रमेणप्रत्येकमेवतदहःसु
तत्तदन्हामतिदेशेनपान्यहानिउक्थ्यसंस्थाकप्राकृताहर्विकारालितेषुतदीयोक्थ्यप्राप्तावपिअग्निष्टो
मसंस्थाकप्राकृतहर्विकारेष्वुतत्यासोमप्रमाणाभावात् प्रथमोत्तमयोरवातिदेशात्रसंस्थाकत्वेनतयो
क्थ्यप्राप्तावपिअग्निष्टोमसंस्थकप्राकृतहर्विकारेषुतत्यासोमप्रमाणाभावात् प्रथमोत्तमयोर
वातिदेशात्रसंस्थाकत्वेनतयोः काप्यनतिदेशेनरात्रिपर्यायाणांसुतरामप्रसिद्धश्च अतः शृतोक्थ्या
दौतेष्वुक्तेष्वहःसुवाचनिकानिस्तोत्राणिनहिभिसुकोभिसुकांतरं पाचत इतिन्यायेनज्योतिष्टोमेस्था
न्येवकार्याणि अयंचनातिदेशोपितुकर्मांतरत्वेप्रमाणमोवाधत्रोक्थ्यप्रसिद्धिस्तत्रसानिवचनेनाविधी
यते किंचस्तोत्राणामुपस्तिज्योतिष्टोमएव द्वादशाहेतुअतिदेशप्राप्तस्तोत्रानुवादेनधर्मविशेषणोत्रं

१९

अतश्च ज्योतिष्टोमिकानामेवोपदेशेन विधानं· तत एव रात्रिपर्यायादीनां ज्योतिष्टोमे फलार्थसंस्थागत्वेने
हानतिदेशोपि न कावितत्सति रूपदेशेनैव तद्विधानांगीकारात्॥ ॥गायत्रीषु॥ ॥बृहस्पतिसवे प्रकृति
तो गायत्रत्रैष्टुभादिनानाछंदःसु प्राप्तेषु छंदोंतरपरिसंख्यार्थं गायत्रमेतदहर्भवतीति श्रुतं· तत्र गायत्र्यादिश
ब्दानां चतुर्विंशत्याद्यक्षरसंख्यामात्रवाचित्वान्न गृहीतविशेषणान्यथा न लक्षणयापि ऋक्षु प्रयोगोपपत्ते
स्तत्रापि न शक्तिः। अतश्च प्राकृतीष्वेव ऋक्षु अधिकाक्षरलोपं कृत्वा चतुर्विंशत्यक्षरा एव पठनीया
नि· अत एव ये हि द्विगायत्र्यो सैका जगतीति लिंगमपि संख्यावाचित्वपक्षेउपपद्यते न ऋग्वाचित्वपक्षे त्रि
स्रोनुष्टुभश्च तस्रो गायत्र्यो भवंतीति च· अतश्च शाताग्निष्टोमेउक्थ्यादिस्तोत्रलोपवदिहाप्यधिकाक्ष
रावलोपे प्रसक्ते न गायत्र्यादिशब्दानां संख्यामात्रवाचित्वं तथात्वे घटादिसंख्यायामपि प्रयोगापत्तेः।

हेरंब
१९

प्रयोगानुसारिण्याक्षरसंख्यावाचित्वेनैव ऋग्विशेषस्य वाच्यतापत्तेः। इतरथा तावदक्षरे गद्येपि प्रयोगा

पत्तेः। अतोष्टाक्षरपादत्रययुक्त ऋग्यमंत्रविशेष एव गायत्र्यादिपदवाच्यः। निरुक्तलिंगेषु तु संख्याम
त्रे लाक्षणिकः। ते न दाशतयीभ्य एवोत्पत्ति गात्र्य आनेयाना क्षरावलोपः। तथा सेवाक्यार्थपरिपूर्णभावे
नार्थप्रत्वानुपपत्तेश्च पूर्वोधिकरणोअधिकागमरूप उपचयश्चिंतितस्तत्त्यसंगादिहापचयश्चिंतित
स्तद्वृत्तिनात्र तथाध्यायसंगतोपपादितव्या॥ ॥इति श्री खंडदेवविरचितायां भाट्टदीपिकायामष्टमस्य तृती
यः॥ ॥दर्विहोमे॥ ॥तदेवं सिद्धातिदेशे दर्विहोमेषु तदपवादं वक्तुं दर्विहोमशब्दार्थो निरूप्यते· तत्र न
तावदस्यं दर्व्याख्यस्य गुणस्य विधिरितिशंकितुं शक्यं सोमादिवद्विधिवाक्ये श्रवणाभावेन विधायकता
शंकानुपपत्तेः। न च वास्तु होमीयगुणविध्यर्थवादे पदे कया जुह्वया दर्विहोमं कुर्यादिति तत्र श्रुतस्य द
र्विहोमपदस्य घृतादिपदवत्सदातरकल्पनया विधायकत्वसंभवः। पुरोनुवाक्यामनूच्य याज्यया
यजतीति ऋग्द्वयरूपगुणविधर्दर्शनेपेक्षाभावात्· न च सिद्धवन्निर्देशान्यथानुपपत्त्या प्रसिद्धिदेवेभ्यो

२०

धारयतीतिवद्वाक्यांतरकल्पनया होमोद्देशेनैव दर्विविधायकत्वं । वास्तु होमे तावत्तत्र च प्रत्यक्षश्रुतिवले
न विधातुमशक्यत्वात् । होमांतरेष्वपि स्मार्तेष्वपि कुविलयामूलदंडपाद्दर्व्या जुहोतीतिस्मार्तवचनेनैव त
त्प्राप्तेः । श्रौतेष्वपि स्रुवेणाजुहोति जुहा जुहोतीत्यादिना तत्रतत्र पात्रांतरसम्बन्धावगमात् अतएव तत्प्रख्य
न्यान्यायेन गुणविधित्वानुपपत्ते दर्विशब्दपात्रांतरस्योपलक्षणमंगीकृत्यैकदेशप्रवृत्तिनिमित्तेन तद्
वत्त्वसाध्यहोममात्रस्येवेदं नामधेयं । तत्रापि यथैव स्मार्तानां पार्वणस्थालीपाकादीनां कर्तरि दार्वि
होमिक इति योगदर्शनात् प्रवृत्तिनिमित्तसम्बन्धावगतेषां नामधेयं तथैव स्मार्तानां पार्वणस्थालीपा
कादीनां कर्तरि दार्विहोमिक इति क इति योगदर्शनात् प्रवृत्तिनिमित्तसम्बन्धावगतेषां नामधेयं तथैव वा
स्तुहोमेपि प्रयोगात् श्रौतानामपि । नच वास्तुहोमस्यैकया ऋचा करणे दर्विहोमत्वप्रसक्त्यभिधानाद्धेरं व
स्तुतो दर्विहोमत्वाभावप्रतीतेरस्य प्रयोगस्याविरुद्धत्वमितिवाच्यं दर्विहोमपदस्य स्मार्तमात्रनामत्वे वास्तु

होमे एकया ऋचा क्रियमाणेपि दर्विहोमत्वानापत्तेरस्यार्थवादस्य ज्ञापकविधया श्रौतेष्वपि होमेष्वपि द
र्विहोमपदप्रवृत्तिसाधकत्वात् । अतः सर्वनामधेयं । तत्रापि होमपदश्रवणाद्धोमानामेव न तु यागानां । नच
यागस्थलेपि चतुरवत्तं जुहोतीत्यनेन होमविधानात्तन्नामत्वोपपत्तिः । तत्र जुहोतिनाप्रक्षेपमात्रस्यैव प्रति
पत्तिरूपस्य लक्षणया विधेयत्वेन मुख्यहोमत्वाभावात् । अतो होमनामधेयमेवेदं । इदं चास्मिन् होमे वोत्तरविव
क्षार्थं प्राप्यते ॥ ॥ तस्मिन् ॥ ॥ तेषु अव्यक्तत्वासामान्येन सोमयागविकारत्वं । अव्यक्तत्वोपपत्तिवाक्ये देव
ताभावो रूपं तनु स्वागतया देवता भूश्रुत्यन्वयं तत्तयावेसिद्धांते दर्विहोमेष्वदेवताभावमसंगात् । अतएवोपांशु
याजस्य विकारत्वमपि शाक्यं । अथवा होमत्वसामान्याधिक्यानाष्टिहोमविकारत्वं । अतएवाग्निहोत्रे यदि कि
टोपवपधेतातः परिधिनिनयेत् इति परिधिदर्शनं परिधेर्हि अंगप्रधानार्थत्वेनारिष्टहोमांगत्वमपिसुल
भमेव । तथाग्नौ अंतर्वेदि तिष्ठन्सावित्राणि जुहोतीति वेदिदर्शनं नारिष्टहोमप्रकारत्वसाधकं । पशुमूलेप

२१

त्वीसंयाजविकारत्वं शंकितं तत्तेषां यागत्वादुपेक्षितं॰ यदि परमुपांशुयाजसाधरण्येन तदा सक्तपिष्टलेपफलीकरणाहोमयोर्वा विकारः। सर्वथा नापूर्वो दर्विहोमा इति प्रासद्द्रव्यदेवतादिसन्निपत्योपकारकांगसामग्रीसाकल्यरूपकृत्स्नविधानवत्वेन यावदुक्तेति कर्त्तव्यतयैव निराकांक्षत्वात्सोद्देश्यस्य चाविनिगमनाविरहेण नियामकत्वाद पूर्वाः। यत्तु परिधिवेदिदर्शनं तदेशोपलक्षणतयाप्युपपन्नं एवं च त्र्यंबकहोमेष्वौविधेनना त्रेधा वर्हिः संन्नह्यतेन पयाजानुयाजा इज्यंते न सामिधेनीरन्वाहेति सक्तिरप्युपपद्यते अतिदेशापक्षे स्वतंत्रपर्युदासकल्पने विध्यंतरैकवाक्यताभंगापत्तेः। सोमयागाद्यविकारत्वे इदमपरं लिंगं औदुंबरीहोमे घृतेन द्यावापृथिवी आपृणेति अंतराकर्णोऽनुहोति भूमिगते आज्ये स्वाहाकार इति॰ सोमयागादिविकारत्वे हि अतिदेशेन वषट्कारः प्राप्येत तत्र स्वाहाकारस्यापि विधिरपूर्वो विधिः स्यात्॰ अस्मन्मतेतु॰ स्वाहाकारेण वा देवेभ्यो हविः प्रदीयते वषट्कारेण वेति अनारभ्याधीतवाक्येन विहितयोः स्वाहाका

हेरंब
२१

रवषट्कारयोर्विकल्पेन प्रदानमात्रे प्राप्तौ याज्याया अधि वषट्करोतीति वचनेन याज्यावत्कर्मणि वषट्कारनियमात्तद्रहिते परिशेषादेव स्वाहाकारप्राप्तेस्तद्वनुवादेन भूमिगमनोपलक्षितकालमात्रविधानाल्लाघवं॰ न चैवमापि परिशेषादेव सर्वत्र स्वाहाकारप्राप्तौ अग्निज्योतिरित्यादौ क्वचित्पुनः स्वाहाकारपाठवैयर्थ्यं॰ तस्य मंत्रसिध्यर्थत्वेन सार्थक्यात्॰ यद्वितिदेशपक्षेपि औपदेशिकमंत्राम्नानादेव याज्यारहितयाद्वषट्कारमात्रभावेन परिशेषसिद्धस्वाहाकारप्राप्तिरूपन्याय्येत ततो नेदं लिंगमिति ध्येयं॰ सिद्धं दर्विहोमा अपूर्वा इति॥ ॥ इतिश्री खंडदेवविरचितायां भाट्टदीपिकायां अष्टमस्य चतुर्थः॥ ॥८॰

२२

हेरंब
२२

पूर्व मीमांसा खंडदेव भाष्य

अष्टमाध्यायः समाप्तः। ६ अध्यायतो १० व्या अध्याया पर्यन्त

સપ્તમાધ્યાયપ્રારંભઃ

अग्नि दे३॰ सप्तमाध्यायः

राम॰
१

श्रीगणेशायनमः॥ ॥प्रकृतिप्रमाणत्वात्॥ ॥एवंसाधिकारेऽपदेशोवगतेधुनातदधीनसिद्धिरतिदेशो
निरूप्यते॰ अतिदेशोनाममयःपदार्थोयादृशेपकारायदंगत्वेनावधारितस्तस्यपदार्थस्यतत्संबंधित्वे
नरूपेणतादृशोपकारद्वारैवान्यांगताबोधकंप्रमाणं।भवतिहिप्रकृतिवद्विकृतिःकर्त्तव्येत्येवमा
दिवाक्यंप्रयाजादिपदार्थानांयादृशोपकारद्वाराआग्नेयाद्यंगत्वेनावधारितानामाग्नेयादिसंबं।
धित्वेनरूपेणतादृशोपकारद्वारासौर्याद्यंगत्वबोधकं॰ एतद्ब्राह्मणान्येवपंचहवींषीत्यपिचतदीयब्राह्म
णवत्त्वज्ञापनद्वारातदीयधर्माणांब्राह्मणार्थभूतानामुक्तरीत्यैवविकृत्यंगत्वबोधकं।मासमग्निहोत्रमित्य
ग्निहोत्रनामापितदीयधर्मवत्त्वलक्षणयागोरायेवबोक्तविध्यंगत्वबोधकं॰ एवंस्यानापत्त्यतिदेशो
आश्रयतोधर्मातिदेशोपिचलक्षणसमन्वयोबाध्यः।अत्रचदर्शपूर्णमासादीनामपूर्वद्वारास्वर्गाद्यं
गत्वेनावधारितानांतेनैवद्वारेणपापक्षयार्थता॰प्रमाणाभावात्॰अपितुदर्शत्वादिलेवःप्रकृ-

हेरंब॰
१

सप्तमाध्यायः प्रारंभः (अतिदेशविचारः

ते तु प्रयाजादीनामाग्नेयेतिकर्त्तव्यता। तेनैवानुगमात्तदेवपिकृतिसंबधितावच्छेदकं॰पुरोडाशकपालादेश्च
पुरोडाशसंबंधित्वेनावधारितस्यतेनैवरूपेणतुषोपवापांगत्वात्तद्बोधकवाक्येऽतिप्रसंगवारणार्थंता
दृशोपकारद्वारेतिविशेषणं॰ पुरोडाशेस्वप्रयाजकीभूतश्रवणाधिकरणत्वेनतुषोपवापेस्वाप्रयो
जकीभूतोपवापकरणत्वेनेतितत्रद्वारभेदात्॰ केचित्तुसाक्षात्स्वकल्पितवाक्यत्वमतिदेशत्वमित्या
हुस्तदतिदेशांतरेष्वव्यापकत्वादुपेक्षितं॰ अतिदेशनिरूपणोपयोगित्वेनचेदंनिरूप्यते॰ किंप्रयाजा
दीनामुपदेशेनप्रकृतिमात्रार्थत्वमुतप्रकृतिविकृतिसाधारण्यमिति॰ साधारण्येहिअतिदेशवैयर्थ्य
मित्युपोद्घाततः॰ तत्रयद्यपिप्रयाजादिषुआग्नेयादिप्रकृतित्वविषयप्रकरणादेर्विशेषविषयत्वंत
थापितत्कल्प्यस्यवाक्यस्यप्रयाजादिभिर्यजेतेत्येतादृशस्यैवकल्पनात्तुप्रयाजादिभिराग्नेयादिःका
र्यइतिआग्नेयादिभेदेनानेकवाक्यकल्पनापत्तेः।नापिदर्शपूर्णमासौकार्याविति॰ तथात्वेनद्रव्यवा

द्वं

चकस्य विधिवाचकस्य च पदद्वयस्य कल्पनापत्तेः। तत्र च यागत्वस्यैवोद्देश्यतावच्छेदकत्वात्स्वर्गार्थत्वसिद्धिः। न
हि तत्र प्रयाजादिविशिष्टयागकरणकप्रकृतभावनाविधिर्येन विशिष्टक्रतुविधिवत्प्रयाजादीनां प्रकृत
भावनायामेवान्वयात्सार्थकाचरोपि प्रकृतयाग एवान्वय इत्याशंक्येत · भावनानां तु उत्पत्तिवाक्यादेव
प्राप्तत्वान्न विशिष्टविध्याशंका · उत्पत्तिवाक्ये घृतवत्तु प्रयाजादिवैशिष्ट्यं भिन्नवाक्यत्वादेवासंभवि · न हि
तत्र द्वावाक्यार्थबोधवेलायामस्ति तस्य प्रयाजादेर्वाक्यैकवाक्यतावेलायामन्वयः संभवी सद्भूदुच्चा
रितस्य विधेरेकरूप्येणैकशाब्दबोधजनकत्वनियमात् · अतो न प्रयाजादीनां प्रकृतिमात्रगामित्वं ·
अथवा दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति वाक्यं न स्वर्गसंबंधपरं · सार्वकाम्यवाक्येनैव प्राप्तेः।
अपि तु समिदादिवाक्यैकवाक्यतया यागोद्देशेन प्रयाजादिविधिपरं। अतश्च तत्र यागत्वस्यैवोद्देश्य। हेरंब·
तावच्छेदकत्वात्स्वर्गार्थता · न च तत्र दर्शपूर्णमासपदं न द्रव्यविशेषणं उद्देश्यसमर्पकमेव वास्त्विति शंक्य · २

विशिष्टोद्देशे वाक्यभेदापत्तेः। धातोरुद्देश्यपरत्वे संभवति उपपदस्यान्याय्यत्वाच्च · अतश्च तत्र त्यं दर्शपू
र्णमासपदं रूपघ्याकालपरमेव सत्सर्वयागेषु यद्दृष्टेति वाक्यप्राप्तकालानुवादकं अधिकरणप्राप्तिक
रणत्वाच्च तृतीयातया स्वर्गकामपदं चावश्यं सानुवादं [illegible] त्वयापि अनुवादस्य सति धर्माणां सर्व
फलवदर्थत्वमुपदेशेनैवेति न क्वचिदतिदेशः। एवं च समानमितरयोर्नैनेत्याद्यनुवाद एव · अग्निहो
त्रमित्यादिनामापि सिंहो देवदत्त इतिवत्सिद्धसादृश्यं तत्प्रख्यन्यायमेव वा द्योतयानुवाद इति प्राप्ते यद्य
पि यागानुवादेन धर्मविधिस्तथापि अनुवादस्य सति संभवे संनिहितगामित्वनियमाद्व्रीहिभिर्यजेतेति
वत्प्रकृतमात्रगामित्वं · विशेषतश्च नवमाद्यन्यायेन यागस्वरूपे आनर्थक्यादपूर्वसाधनत्वलक्षणा
र्थमपि प्रकरणानुप्रवेशः। वस्तुतस्तु उत्पत्तिवाक्येषु आकांक्षाबलेन दृष्टसामान्यस्य भाव्यत्वकल्पन
वदितिकर्तव्यतासामान्यस्यापीशमिति पदकल्पनयान्वयस्वीकारात्स्वर्गादिवाक्यवच्च प्रयाजा।

दिवाक्यानां विशेषसमर्पकतया तद्देवविकारत्वं॰ अत एवासोर्यात्येषुपयाराविप्रकर्षाद्यप्राप्तावपि
गुणधर्मातरप्राप्तिरविरुद्धा॰ अत एव सोत्रामण्यां प्रतिपश्वेकैकस्मिंके पूमाने कत्वे प्राप्ते तत्प्रतिविध्य
यूपैकत्वनियमविधिरेकयूप आलभेतेत्ययमुपपद्यते॰ उभिदादिषु तु अव्यक्तत्वसादृश्याज्ज्योतिष्टो
मविकारत्वं अव्यक्तत्वं च स्वांगतया अविहितदेवताकत्वं॰ ग्रहणां गभूतायाश्च ऐंद्रवायवादिदेवतायाः प्र
संगेन सोमयागोपकारकत्वेपि ज्योतिष्टोमांगत्वाभावात्॰ अतश्चाव्यक्तत्वेनातिदेशसिद्धे आतिदे
शिकग्रहणाद्यंगभूतदेवतायाउभिदाद्यपकारकत्वं कल्पनेन रूपलाभः सुलभः॥ अत एव श्येने दीक्ष
णीयादिप्राप्तौ दीक्षणीयायां द्वादशमानं हिरण्यं दक्षिणा चतुर्विंशतिमानं प्रायणीयायामिति दक्षिणा
दानविधिः संगच्छते॰ एवं गवामयनादिसत्रेषु द्विरात्रादिष्वहीनेषु च सत्त्यागणेषु द्वादशाहविकारत्वं॰ अहोरा
त्रसाध्यकर्मवाचिपदवाच्यत्वसामान्यात् अत्र द्विरात्रशब्दो हःशब्दश्चाहोरात्रसाध्यकर्मविशेषणः॥

हेरंब॰
३

सत्यागणानां वर्तित्वमादृश्या च द्वादशाहस्यैव प्रकृतिमिति वक्ष्यते॰ तत्रापि सत्रेष्वपुसत्रात्मकस्याहीनेष्वही
नात्मकस्य द्वादशाहस्यावांतरसादृश्यादित्यपि वक्ष्यते॰ सत्रेष्वपि यानि संवत्सरसाध्यानि सत्राणि तेषु
संवत्सरसत्रत्वसामान्याद्दयनशब्दवत्त्वसामान्याच्च संवत्सरनियमादिधर्मलाभाय गवामयनस्य वि
ध्यंतः॥ अत एव गवामयनांतर्गतमहाव्रतिकप॰ न्नपउपयायंतीति धर्मविध्यंतरस्तस्यार्थसंवत्सरसत्रा
तरेनुवदंति ये तु साहस्राः साध्यस्त्रादयस्तेषां एकसंज्ञायोगिनो यागास्तेसं घानरूपनिकाय योगान्निकापि
मुख्यत्वेन तदसंभवात्॰ एकत्र मुख्यस्याहि नाम्नोन्यत्र गौणत्वेनामातिदेशः॥ ननु सर्वत्र प्रवृत्तिनिमित्तस
त्वेन मुख्यत्वेपि॰ न यैवं प्रायणीयस्य लेष्वेकसंज्ञायोगादतिदेशापत्तिः॥ तस्य प्राथम्यसिध्यर्थत्वेन द्वादह
शाहिकद्विती यारूधर्मदर्शनेन चानतिदेशकत्वात्॰ अत एव प्रयोजनांतररहितएवैकसंज्ञायोगोतिदे
शसाधकः॥ अत्र पंचय एव धर्मचास्तस्यां धर्मकेषु प्रवृत्तिः॥ सपूर्वो वानुत्तरो वायुक्तिसाम्यात्॰ प्राय

ग्राः पूर्वएवतादृश इति सत्त्वादीनयोक्तिः। अतएव पूर्वपूर्वस्य किंचित्किंचिदधिकधर्मवत्त्वे उत्तरोत्तरेषु प्रवृ
त्तिः अतएव पूर्वस्मिन्साहस्रविधावष्टांगवृत्तित्रिधर्मसमानजातीयधर्मवत्त्वं भवति द्विश्येन निष्ठांगानां कं
टकवितोदनादीनां ये धर्माः कंटकवितोदनत्वादयः तत्समानजातीयास्तएव सत्तद्द्रुत्वं कंटकवितोदना
दौ अतएव श्येनपदं श्येनांगपरं नतु यथाश्रुतश्येनप्रतियोगिकसादृश्यं कंटकवितोदनादौ संभवति अ
तश्च फलतः श्येनधर्मा एव पूर्वोक्तसदृशाः पूर्वोक्तभिन्नाश्चकार्या इति पर्यवसितोर्थः। पूर्वोक्तसादृश्यं
चाप्रकृतत्वेन प्राकृतांगमुद्दिश्य विहितत्वेन वा तेन श्येने अपूर्वा धर्माः कंटकवितोदनादयस्तद्रूपाप्यतिदि
श्यंते येवाश्येने प्राकृतांगानुवादेन विहिता लोहितोष्णीषादयस्तएवातिदिश्यंते यत्तु अस्मिन्पक्षे नैतेषामेव
नियम इति तत्र श्लोक्तत्वदंतरसादृश्यत्यागे प्रमाणाभावादुपेक्षितं अस्मिन्पक्षे द्रुयागोद्देशेनानेकप्र द्देशेव
दार्थविधानायोगात्सद्दृशेन लक्षणपाश्येनीयप्राकृतांगसंबंधिविकारमात्रस्योद्देशेन विधानं यद्वा इ ४

तरपदे सन्निहितत्वत्यागे प्रमाणाभावात्प्राकृतांगानामपि चोदकस्य तथा पूर्वमुक्तत्वात्पूर्वोक्तप्राकृतांगभिन्न
तत्सदृश प्राकृतांगांतराणामेवेतरपदेन ग्रहणं तेषामतिदेशेन संनिहितत्वात् तादृश प्राकृतांगोद्देशेनैव
च श्येनसादृश्यविधिः। सादृश्यं चास्मिन्पक्षे श्येनीयप्राकृतांगवृत्तिधर्मसमानधर्मवत्त्वं स च धर्मः श्येनप्राकृ
तांगोद्देशेनैवाश्येन सादृश्यविधिदेन विहितो विकारो लोहितोष्णीषादिः अतएव सादृश्यं न श्येन निरूपितं अपितु श्येनी
यप्राकृतांगनिरूपितमेव उपमानतावच्छेदकसंबंधेन श्येनवृत्तिधर्मस्य लोहितोष्णीषादेः तेनैव संबंधेन प्राकृ
तांगेष्वभावात् उपमानतावच्छेदकसंबंधेनोपमेयवृत्तित्व एवोपमानियमात् अतएवास्मिन्पक्षे श्येनपदं श्ये
नीयप्राकृतांगपरं ततश्च फलतस्तादृशा धर्मा एव इषुपूर्वसाधनीभूततादृशप्राकृतांगोद्देशेन विधीयंते
अतएव विधेयसामर्थ्यानुरोधेन श्येने यो विकारो यत्प्राकृतांगे विहितस्तत्प्राकृतांग एव सोत्र विधीयते इत
रथा अप्राकृतकार्यकारितापत्तेः। अतोस्मिन्नपि पक्षे विवक्षितगत्या इषुसंबंधित्वेनैव तादृशश्येनीयविकारवि

धिः ॥ नचैवमस्यातिदेशस्य कल्पितत्वाभावादनुमानिकवचनातिदेशापेक्षया प्राबल्ये पिठ्रये नेनसमानमिति
पदद्वये तादृशविकारलक्षणाया आवश्यकत्वान्नामातिदेशापेक्षया प्राबल्येमानाभावः ॥ नामातिदे
शस्य लेग्निहोत्रपदेनानभिहितानामेव धर्माणां लक्षणावचनातिदेशेतु समानपदेनोक्तानामेव तादृशध
र्माणां विधेयतावच्छेदकीभूतश्येनीयप्रतावच्छेदकीभूतश्येनीयप्राकृतांगवृत्तिविकारत्वावच्छिन्नत्वसिध्य
र्थं लक्षणेति तस्य तदपेक्षया प्राबल्यात् ॥ ॥ पंचसंचरेषु ॥ ॥ चातुर्मास्येषु वैश्वदेवेपर्वणि आग्नानि पं
चहवींषि सधर्मकाणि विधाय वरुणप्रघासेषु विहितानि तेषां च विनिगमनाविरहेण अभ्यासात् कर्मांतरत्वं च
नात्यर्थः ॥ अत्र च ब्राह्मणस्यैवातिदेशः ॥ यद्यपि चान्यत्रोपकारस्यतात्स्पष्टभावेन पदार्थानामेवातिदेशो न तु पद
र्थबोधकशास्त्राणां प्रयोजनात्रावत्तथापि द्रव्यलक्षणायां प्रमाणाभावाच्छास्त्रस्यैवातिदेशः ॥ न च शास्त्रातिदे देशं च
५

शेन हृोधिन पदार्थानां प्राकृतोपकाराभावेऽपकारांतरकल्पनाद्दृष्टवाधानुपपत्तिः ॥ शास्त्रस्यापि विजातीयो
पकारजनकविजातीयपदार्थप्रतिपादकतया निरूपितरूपस्यैवातिदेशोद्दपकारांतरकल्पनानुपपत्त्योहवाधोप
पत्तेः ॥ वस्तुतस्तु ब्राह्मणपदं प्यर्थविधायकवाक्यस्योक्तत्वाल्लाघवादपेक्षितत्वाच्चात्रापि अर्थस्यैवातिदेश ॥
अत एवातिदेशात्लक्षणमपि नासंगतं तदि द्रव्यविधायकस्यैवेदब्राह्मणपदेनोक्तत्वात्सार्थवादकस्यैव वि
धायकत्वाद्दाकांक्षाभावेन प्रधानातिदेशाभावेपि स्तुतिमात्रेस्यानिदेशेन लेगानां तेषां स्वस्वांगविधिविशेषे
यत्वेन हविर्विधिविधेयत्वाभावात् ॥ अत एव वरुणप्रघासेषु अग्निं मंथंति प्रसुवो भवंति ॥ इत्यादि विधयोप्युपपद्यं
ते ॥ अन्यथा अतिदेशादेव प्राप्तत्वेन वैयर्थ्यापत्तेरिति प्राप्ते अंगविधीनामपि एतद्धविःसंबंध्यंगविधायकत्वेन तद्ब्रा
ह्मणलोपपत्तेः शास्त्रस्य महाविषयत्वसिध्यर्थं अंगानां स्तुतेश्चातिदेशः ॥ न चापेक्षाक्रमेणैव सर्वत्रान्वपादार्थभा
वनाया इतिकर्तव्यतापेक्षायामंगातिदेशोवगतेपश्चात्तद्विशिष्टार्थभावनाया विधिसंबंधावगमोत्तरं तस्य स्तुत्यपे

क्षायां स्कृत्यतिदेश इति विरम्य व्यापारत्वापत्तिः। दृष्टसामान्यवत्त्वेति कर्त्तव्यतासामान्याक्षेपादेवेति द्वितीयभावना
विधिसिद्धेस्तत्त्यपेक्षावेत्ता व्याप्तेवातिदेशप्रवृत्तेः। अतएवानुमानिकवचनाद्यतिदेशोपि अर्थवादातिदेशसिद्धिः।
याले वसति विश्वजिति आतिदेशिककार्थवादिकफलकल्पनाप्रसक्तिः साकांक्षस्य एव निरस्ता। वस्तुतस्तु वाच
निकातिदेशस्य भिन्नवाक्यविधेयाप्रमाणत्वादुत्पत्तिवाक्ये इति कर्तव्यतासामान्याक्षेप आवश्यक एव न च प्राक्
स्यातिदेशे तस्य निरुक्ताङ्गत्वे प्रमाणाभावादतिदेशलक्षणस्याव्याप्तिः। लक्षणे अंगत्वपदेन भावनेतिकर्त्तव्यताले
नान्वितत्वस्य विवक्षितत्वात्। अतश्चार्थभावनेतिकर्त्तव्यतात्वस्य तत्करणोपकारजनकत्वरूपस्य शाब्दभा
वनेतिकर्तव्यतात्वेनान्वितत्वस्य विवक्षितत्वात्। अतश्चार्थभावनेतिकर्त्तव्यतात्वस्य तत्के चतुर्विरूपतत्कर
णोपकारजनकज्ञानविषयत्वाख्यस्य द्विविधस्यापि संग्रहः। अन्विनमदोपादिदानाच्चार्थिकं प्रासं देरंब°
गिकेवोपकारजनके पिनातिदेशः। तस्य प्रकृतिभावनानन्वितत्वात्। तस्मादुभयातिदेशः। अग्निमंथ ६

नं तु दक्षिणविहारे प्राप्त्यभावाद्युक्तस्तदर्थं पुनर्विधिः। अतएव नवप्रयाजत्वादेरतिदेशाद्वाजिनोयजतिआहु
तीनां संप्रयैत्यन्निंशत्त्वायेति लिंगमप्युपपद्यते। इतरथा त्रिंशत्त्वानुपपत्तेरिति सूत्रकारभाष्यकारोः। वस्तुतस्तु
मारुतीयागस्यापि वैश्वदेविकामिक्षायागविकारत्वान्नवप्रयाजत्वादिवदेवाग्निमंथनादीनामपि प्राप्तिसंभवा
न्नायं वैयर्थ्यपरिहारः। आमिक्षैककपालानुरोधेनैव च न नवप्रयाजत्वादिसिद्धिस्त्रिंशत्त्वस्योपपत्तिः। नवभूया
सां दर्शपूर्णमासविकारत्वात्तदनुरोधेन पंचप्रयाजत्वं पशुपुरोडाशवच्च वार्त्रघ्नावपि पंचत्वाविरोधात्। अतो भाष्य
मनादृत्य सूत्रमेवं व्याख्येयं। अग्निमंथनादिवाक्यानामोवित्येनातिदेशविधिस्तु त्वर्थत्वान्नेतरार्थत्वादिति सूत्र
स्यार्थः। अतः सिद्धमंगनामप्यतिदेशप्रवृत्तिः। न चामिक्षैककपालयागानुरोधेनैव वैश्वदेविकधर्मप्राप्तिसिद्धेरतिदे
शविध्यानर्थक्यं। यत्र धाय्याविराजादिविरुद्धधर्मविषये मुख्यत्वभूयस्त्वाभ्यां दार्शिकधर्मप्रसक्तिस्तद्विषये वै
श्वदेविकधर्मप्राप्त्यर्थत्वेन सार्थक्यात्। ॥ ॥ एककपाल॥ ॥ एवं साकमेधेष्वपि तयोरैन्द्राग्नैककपालयोरपि एत

ब्राह्मणे ऐन्द्राग्नोय ब्राह्मणइतर एतद्ब्राह्मण एककपालोय ब्राह्मणइतरे इति वाक्याभ्यां सार्थवादकसांगविधि
कोऽस्यातिदेशाद्युत्तरविवक्षयासमर्थने ॥ ॥एककपालानां॥ ॥एककपालस्य प्रकृतिभूत एककपालो वारु
णप्रघासिक एव । न तु धर्मभूयस्त्वापि वैश्वदेविकः वक्ष्यमाणात्सर्वैककपालेषु चोदनालिंगातिदेशाद्वैश्वदे
विकधर्मप्राप्तिसिद्धेः । अनन्यलभ्य कतिपयधर्मप्राप्त्यर्थं वारुणप्रघासिक एव । एवं चैन्द्राग्नप्राय पाठोप्युपपद्यते । तत्र हि न
दार्शिके ऐन्द्राग्नातिदेशविधिः । चोदनालिंगातिदेशादेव सिद्धेः । नाप्यैन्द्राग्नं तत्र गतं अनुपस्थितत्वात् । अत एव चा
तुर्मास्यप्रकरणस्थत्वेनोपस्थितत्वाद्वैश्वदेवे ऐन्द्राग्नाभावाद्वारुणप्रघासिकस्यैव । अत एतन्न्याय पाठादपि साक
मेधे एककपालस्य वारुणप्रघासिके कपालप्रकृतिकत्वं । धर्माश्च हिरण्मय्यः स्रुचो भवंती त्यादयः सामान्यविहि
ता इति भाष्यकारः । वस्तुतस्तु साकमेधस्य पंचसंचरेषु अतिदेशविधिरस्ति न वा । अंसे दर्शपूर्णमासविका हेरंब
त्वापत्तेर्भूयोनुग्रहाय न हिरण्मयत्वादिप्रसक्तिः । आद्येपि तदधिकरणन्यायस्यान्यलभ्यत्वस्याभावाद्धर्म

भूयस्त्वलाभाय वैश्वदेविकपंचसंचराणामेव धर्मातिदेशात्तथैव वारुणप्रघासिकहिरण्मयत्वाद्यप्राप्तिः । वस्तु
तस्तु याज्ञिकाः चाराघत्र वरुणप्रघासेषु स्रुग्द्वयं तयोस्सत्तिप्रसक्तिस्तत्रैव हिरण्मयत्वशमीमयत्वादेर्विध्योर्वित्ये
न दक्षिणविहार एव तन्निवेशादैन्द्राग्नैककपालयोरपि न हिरण्मयत्वाद्यतिदेशः । अस्तु वा सत्त्यापि यद्यैन्द्राग्नाघ
तिदेशविधिवैयर्थ्यभियैव भूयसामनुग्रहमयनं गीकृत्य हिरण्मयत्वाद्यनुष्ठानमित्युच्येत तत ऐन्द्राग्नैककपाल
योर्मध्ये अन्यतरातिदेशेनैव तत्प्राप्तिसिद्धेरितरानर्थक्यं । अतो वक्ष्यं तत्तद्विशेषविहितधर्मप्राप्तिसिध्यर्थमेवेदमतिदे
शद्वयं । विशेषविहितधर्माश्चैन्द्राग्नेयाज्यादयः एककपालेपि केचिच्छास्त्रांतरेष्वनुसंधेया इति ध्येयं ॥ ॥इति श्री
खंडदेवकृतौ भाट्टदीपिकायां सप्तमस्य प्रथमः ॥ ॥साम्नः॥ प्रकृतौ ज्योतिष्टोमे अभि त्वामुत्स्नं रथंतरं विहि
तं विशेषे अविवाक्यादौ कवतीषु कर्तव्यत्वेन श्रूयते कवतीषु रथंतरं गायतीत्यादिना तथा यद्योन्यां गायति तदुत्तरस्या
मिति विशेषे ... विप्रयोगाद्विशिष्टवाचित्वे प्राप्ते आहत्यधि
गौपत्यांतो दिवक्ष्यतं । तत्र रथंतरादिशब्दानां गीतिविशेषविशिष्टार्थान्तर

करणन्यायेनैव गीतिविशेषमात्रे विजातीयगीतित्वमात्रं वा वाच्यं । एवं साम शब्दस्यापि गीतिमात्रं गीतित्वमात्रं
वा वाच्यं । न तु गीतिस्तद्विशिष्टा वा ऋक् उभयस्मात् व्यक्तिन्यायेनारुण्यपदवद्भूसति मुख्यार्थबाधे लक्षणया बोधोप
पत्तेः । आकृत्यधिकरणस्यैव तु प्रयोजनं कथनार्थानि सूत्राणि यदि हि ऋक् वाचित्वं भवेत् तदा ऋचः क्व गतिदेशासं
भवात् कवती शब्दः कार्यलक्षणार्थः । तत्कार्यमर्थप्रकाशनं लक्षणादिना अभिवत्या कुर्यादिति कवतीकार्ये अ
ऋगंतरस्यातिदेशः । देशलक्षणार्थो वा । कवती देशे अभिवर्तीयं वेदिति । जघन्यं रथंतरपदं वा तद्धर्मलक्षणार्थं सद्
मतिदेशार्थं । कवतीषु संमीलनादीन रथंतरधर्मान् कुर्यादित्यर्थः । अन्ये तु भाष्यस्याः पक्षा असंभवदुक्तिकत्वा
न लिखिताः । सिद्धांते तु लक्षणायां प्रमाणाभावाद् इच्छ इत्यबोधस्यैवाभावेन गीतिमात्रस्य वृ कवतीष्वतिदेश इतिप्रयो
जनं । प्रसंगादाकृत्याधिकरणसिद्धस्यैव गीतिवाचित्वस्योपोद्बलकानि कानि चिल्लिंगदर्शनसूत्राणि विद्रष्टव्यं । न
च पद्यो न्यांगायतीत्यादौ योनिसंबंधित्वेन रूपेण विधेयत्वादतिदेशलक्षणाप्रपत्ता वपि कवतीषु रथंतरं गाय

हेरंब ८

रीत्यादौ रथंतरत्वस्यैव विधेयतावच्छेदकत्वादतिदेशत्वानुपपत्तिरिति वाच्यं । तत्रापि धर्मग्राहककृतोपकारत्वा
भावार्थमभिवतीसंबंधित्वस्यैव विधेयतावच्छेदकत्वात् । वस्तुतस्तु ग्रहणमाधीये आज्यभागविधेरतिदेशत्वाभा
ववदस्याप्यतिदेशत्वाभावे न काचित् क्षतिः । लाघवेनाभिवतीषुपेन रूपेणोपकारकत्वं तेनैव रूपेण कवतीषु
उपकारकत्वस्वीकारेणोहोपपत्तेः ॥ ॥ इति श्रीखंडदेवकृतौ भाट्टदीपिकायां सप्तमस्य द्वितीयः ॥ ॥ उक्तं ॥ ॥
इदानीं नामातिदेशः प्रस्तूयते । मासमग्निहोत्रं जुहोतीत्यादौ नैष्पमिकाग्निहोत्रवाचिनो नाम्नो न तावत् कर्मांतर
वाचकत्वं । अनेकशक्तिकल्पनापत्तेः । द्रविहोमत्वेन चोदनालिंगातिदेशाभावो नाममातिदेशाभावे ग्निदेवताकत्वे
प्रमाणाभावेन तत्प्रख्यन्यायानुपपत्तेश्च । न च यदाहवनीये जुहोतीत्यनेनाग्नेः प्राप्तत्वादन्यधिकरणकत्वेन यागा
नुपपत्तिः । तस्यातिप्रसक्तत्वेन रुद्राद्यादिकल्पने पुनर्गौरवतादवस्थ्यात् । अतो दात्तस्वरस्य सप्तमी बहुव्रीहावनुपपत्ते
श्च । सप्तमी तत्पुरुषस्य शौंडादिगणे पाठाभावेनानुपपत्तेश्च । यदि तु नित्याग्निहोत्रपदस्य निरूढलक्षणया नि

राम.
९

त्याग्निहोत्रप्रयोगात्तस्याश्च शक्तितुल्यत्वेन मासाग्निहोत्रे तदसंभवाद्गौणत्वे भावनत्रयकं· अनयैव च दिशा मा
संदर्शपूर्णमासाभ्यामित्यादौ गौणत्वोपपादनं द्रष्टव्यं· अन्यथा पद्दृष्टेत्यादिना पौर्णमासीकालकत्वप्रा
प्तेरुभयत्र लाक्षणिकत्वाविशेषात्· दर्शादिकालाप्राप्तावपि वा एकत्र मुख्यस्यापूरत्र गौणत्वनियमात्प्रति
द्वदर्शादौ निरूढलक्षणावश्यकत्वे च सौमिकचोदनालिंगातिदेशेनैव रूपलाभोपपत्तौ तदभावस्याप्यत्रासाध
कत्वाच्चैतेन गौणत्वाभावेपि एकनामकत्वसादृश्येन चोदनालिंगातिदेशादेवाग्निहोत्रधर्मलाभ इत्यपास्तं·
उभयत्र निरूढलक्षणायां प्रमाणाभावेनैकनामकत्वासिद्धेः न च तथापि देवताकालादिरूपगुणविधायक
त्वेनैवोपपत्तौ गौणत्वे प्रमाणाभावः। तत्सख्याधिकरणोक्तकौस्तुभरीत्या समासासंभवेन देवताविध्यनुप
पत्तेः। कालस्य प्राप्तत्वादिना विध्यत्वानुपपत्तेश्च। अतश्चाग्निहोत्रादिशब्दाः कर्मान्तरे गौणाः। तत्र वत्यर्थ दैवं·
रूपधर्मलक्षणापूर्वकं कर्मान्तरे गौणीत्ति प्राञ्चः। तत्सिद्धिस्त्वोक्तकौस्तुभरीत्या तु गौणीज्ञानकार्यतावच्छेद ९

कमेवाग्निहोत्रीयधर्मविशिष्टकर्मान्तरस्यागब्दबोधत्वमित्यपि शक्यं वक्तुं। तत्र च सिंहो देवदत्त इतिवत्स्त्रणां मातरसि
द्भसादृश्येन गौणत्वासंभवेपि अस्मिन्नेव वाक्ये तदीयधर्मविशिष्टकर्मान्तरविधानेन साध्यसादृश्येन गौणत्वो
पपत्तिरिति सिद्धो नामातिदेशः पदार्थातिदेशोपि च निरूपितरूपस्यैवातिदेशाद्दूरुवाधसिद्धिः॥ ॥अपि वा॥ ॥
द्वादशाहे प्रथममहः प्रायणीयं सधर्मकविधायगरानयनेवैश्वानरो ज्योतिष्टोमः प्रायणीयमहर्भवतीति
श्रुतं तदेहं कर्मणि विनिगमनाविरहादिति निर्णीतं प्रकरणांतराधिकरणकौस्तुभे· तदत्र गवामयनिकप्राय
णीयपदपूर्वव्यायेनैव द्वादशाहिकप्रायणीयधर्मातिदेशार्थं· न च चोदनालिंगातिदेशादेव तत्प्राप्तिसिद्धेर्ना
मातिदेशवैयर्थ्यं· गणत्वसाम्येपि द्वादशाहांतशङ्कैरेवतानां साम्नां विधिरिति विनायोपष्टशब्दस्य स्तोत्रवावि
त्वात्सामपरत्वे विधौ लक्षणापत्तेर्ज्योतिष्टोमे च पृष्ठ्यस्तुवत इत्यनेन षण्णां पृष्ठस्तोत्राणां विधानस्य विश्वाधिकर
णे कौस्तुभे व्युत्पादितत्वाद्दिह्वातिदेशेन वहुत्वप्राप्त्युपपत्तेर्विशिष्टविधिगौरवाच्चानुवाद एवायमिति प्राप्ते तु या

द्वैवैयर्थ्यापत्तेः पवमाने रथंतरमार्भवे बृहन्मध्यतद्धतराणि वैरूपं होतुः पृष्ठे वैराजं मैत्रावरुणस्य रैवतं ब्राह्म
णाछंसिनः शाक्वरमच्छावाकस्येति सन्निवेशमात्रविधिरूपतात्पर्यग्राहकत्वेन सर्वपृष्ठशब्दस्य निरूढलक्षणे
प्यषाडह्निकं रथंतरादिसामपरत्वावगतेस्तेषामेव विधिः। निरूपितश्च शब्दस्य निरूढलक्षणत्वं व्याख्यानार्थार्थवादः
कौस्तुभे। अतएव सर्वपदेनातिदेशप्राप्तयोर्वैकल्पिकयोर्बृहद्रथंतरयोः समुच्चयविधिरित्यपास्तं। होतुः पृष्ठे वै
रूपस्योपदेशिकत्वेन तयोर्बाधात् सर्वशब्दस्य बहुत्वापेक्षत्वेन द्वयोरसंभवाच्च। अतः षाडह्निकानामपि वि
धिः। यन्मते तु एकमेव प्रकृतौ पृष्ठस्तोत्रं पृष्ठद्वयं वा तन्मते अप्राप्तत्वादपि नानुवादः। अयं च यद्यपि नामाति
देशः। सार्वपृष्ठशब्दस्य षडहवाचित्वाभावात्। विश्वजिति च बृहद्रथंतरादिपृष्ठप्रवृत्तेर्गौणत्वाभावाच्च न वाक्यं वचना
तिदेशः। न हेमधीये आज्यभागौ यजतीतीतिवदेव षडहीयत्वस्य विधेयत्वात्तानवच्छेदकत्वात्। तथापि उपदेश हेरंब
एवायं रथंतरादीनां अतएव न षडहधर्मांतराणामिह करणं अन्यकर्मांगत्वस्य तद्वाक्ये प्रवृत्तेः पूर्वावगमसी १०

पत्नो बर्हिषा पूषा पावटमवस्तृणाति आज्येन पशुमनक्तीति श्रुतं। तत्र पूर्ववदेवाग्नेर्मंथ्यशब्दो मथनक्रियावि
धानत्वेन गौणत्वाद्योगान्न पाशुकानां मथनधर्माणामतिदेशार्थः। बर्हिराज्यशब्दौ च द्रव्यविधित्वात्तद्दर्शपू
र्णमासिकबर्हिराज्यधर्मातिदेशार्थौ। न च त्रिकपालस्य नामातिदेशेन धर्मप्राप्त्यभावेपि लैंगिकधर्मातिदेशेन
निराकांक्षत्वाल्लगौणत्वांगीकारः। प्रकृते तु धर्माकांक्षयैव गौणत्वांगीकारान्नामातिदेशोपपत्तिरिति वाच्यं
। लोकतोपि मथनादिधर्मलाभेन नक्षत्रस्य त्यागे प्रमाणाभावात्॥ ॥सौमिकं तु॥ ॥चातुर्मास्येषु वैश्वदेव
रुणप्रघाससाकमेधशुनासीरीयाख्यानि चत्वारि पर्वाणि। तत्र द्वयोः प्रणयंतीति द्वाभ्यामेतीति श्रुतौ। तत्र भाष्य
कारः सप्तभिः सूत्रैरधिकरणद्वयमेवं व्याचख्यौ। तत्राद्ये तावत्सौमिकं सधर्मकं प्रणयनमिदं उत प्राकृतं तम
धर्मकं गार्हपत्यादाहवनीयं प्रतीति चिंतायां प्राह तस्य चोदकेनैव प्राप्तत्वेन विधिवैयर्थ्यापत्तेर्वचनार्थव
त्त्वाय प्रणायतिरयं सौमिकप्रणयनपरस्तद्विधानार्थः। अतएव तत्रोत्तरवेदिः सत्वेन तस्या सोनवैश्वदे

वउत्तरवेदिमुपवपंतिनश्रुनासिरीयइतितत्पर्युदासोपिसंगच्छते। तेनतयोरुत्तरवेद्यतिरिक्ताः सौमिक
प्रणयनधर्माः कार्याः। यत्तुउपात्रवपंतीत्युत्तरवेदेरुत्पत्तिवाक्यंयच्चोत्तरवेद्यामग्निंनिदधातीति। तस्याविनि
योगवाक्यंतन्मध्यमयोः पर्वणोः प्राकृतप्रणयनकार्यएवोत्तरवेदिमात्रविधायकमितिप्राप्तेनसायत्तिः सौ
मिकप्रणयनस्यैवविशिष्योपस्थापकः संनिहिततत्वात्तु प्राकृतमेवोपस्थापयति। अतस्यैवातिदेशप्राप्तेः
पूर्वप्रवृत्त्याविधिरनुवादएववा। तत्प्रयोजनंचपद्यपिनेतरयोः परिसंख्यात्रेधाप्याः पत्तेः प्रणयनाभावे
इतरपर्वणोरग्न्यभावेनयागानुपपत्तेश्च॥ नाप्यर्थवादोपपत्तिः। विध्यभावे अर्थवादत्वस्यैवानुपपत्तेः। त।
थापित्तउत्तरवेदिरूपगुणार्थंपुनः श्रुतिः। एतदभावेहिचतुर्ष्वपिप्राकृतप्रणयनप्राप्तोदेशापेक्षायामुत्तरवेदि
विधानंचतुर्ष्वपिप्राप्नुयात्। एतत्सत्वेतुपर्वद्वयवृत्तिप्रणयनस्यैवविशिष्योपदेशोनापेक्षितत्वात्तत्रैवोत्तरवे
दिस्तदीयाग्निविधानमेवचद्वारमितिसिध्यति। अतइतरपर्वणोरुत्तरवेदिपरिसंख्यैवानुवादप्रयोजन

हेरंब-
१२

मिति। द्वितीयाधिकरणेतुसोयमनुवादः प्रथमोत्तमयोर्मध्यमयोर्वेतिचिंतायांमध्यमविषयत्वेतत्रैवोत्तरवेदि।
प्राप्तेः प्रथमोत्तमयोस्तत्पर्युदासानुपपत्तिप्रसंगात्प्रथमोत्तमविषयत्वमेव। ततश्चतत्रैवोत्तरवेदिप्राप्तौतत्रैवायां
निषेधइतितयोरुत्तरवेदेर्विकल्पः। द्वाभ्यामेतुरुवाएतद्यज्ञस्ययद्वरुणप्रघासाः साकमेधाश्चेतिप्रणयना
र्थवादस्तत्रक्षेत्रेणयाप्रथमोत्तमपरइतिप्राप्तेलक्षणायाविकल्पस्यचन्याय्यत्वान्मध्यमविषयएवायमनुवा
दः। उत्तरवेद्युपसंहारार्थः। एवंचप्रथमोत्तमयोरुत्तरवेदिप्राप्त्यभावात्तत्रतत्प्रतिषेधोनित्यानुवादः। तत्प्रयोज
नंचोपात्रवपंतीत्यादेर्वरुणप्रघासावांतरप्रकरणबाधः। एतदभावेहितदवांतरप्रकरणपठितोयाउत्तरवे
देस्तन्मात्रांगत्वप्रसक्तौतदितरेषुत्रिषुपर्वसुनित्यानुवादः स्यात्तद्द्वयोः। अतोद्वयोर्नित्यानुवादबलाद्वांतरप्रक
रणबाधेनमहाप्रकरणात्सर्वांगत्वप्रसक्तौद्वयोः प्रणयंतीत्यनेनमध्यमयोरुत्तरवेद्युपसंहारोपित्रिषुपर्वसुनित्या
नुवादः। तत्प्रयोजनंचोपात्रवपंतीत्यादेर्वरुणप्रघासावांतरप्रकरणबाधः। एतदभावेहितदवांतरप्रकरणे

पठितायामुत्तरवेदेस्तन्मात्रांगत्वप्रसक्तौ तदितरेष्वपि पुपर्वसु नित्यानुवादः स्यात् द्वयोर्नित्यानुवाद
बलाद् वांतरप्रकरणबाधेन महाप्रकरणात् सर्वांगत्वप्रसक्तौ द्वयोः प्रणयंतीत्यानेन मध्यमयोरुत्तरवे
द्युपसंहारोयुज्यते। न चैवमपि प्रथमोत्तमयोः पर्युदासवशेनावांतरप्रकरणबाधवन्मध्यममात्रवि
षयत्वस्यापि उत्तरवेद्युत्पत्तिविनियोगयोः सिद्धेर्द्वयोः प्रणयंतीत्यस्य वैयर्थ्यमिति वाच्यं। उत्तरवेद्याम
ग्निं निदधातीत्यनेन नहि निविधानानुवादेनोत्तरवेदिर्विधीयते। अतिप्रसंगात्। नाप्यग्निविधानानुवादेन विशिष्टो
देशापत्तेः। नाप्यग्निमात्रोद्देशेन गार्हपत्यादावप्युत्तरवेद्यापत्तेः। किं त्वतिदेशप्राप्तेः पूर्वप्रहृत्याउत्तरवे
दिविशिष्टप्राकृतनिधानमेवाग्न्युद्देशेन विधीयते उत्तरवेदिमात्रफलकं। अत एवौपदेशिकप्रणयनविध्य
भावे प्रणीताग्निनिधानस्य कपालत्वापातार्थाग्निनिधानेपि तदापत्तिः। औपदेशिकप्रणयनविधिसत्वे तु तत हेरंब
स्यैवपुरः स्फूर्तिकस्य देशापेक्षायामातिदेशिकविधितः पूर्वमुत्तरवेदिरूपदेशाविधानान्नताद्यर्थाग्निनि

१३

धानेउत्तरवेदिप्राप्त्यापत्तिः। अत एवौपदेशिकप्रणयनसत्वे विधिसत्वेपीतरयोरातिदेशिकप्रणयनसत्वादुत्तर
वेद्यापत्तिरित्यपास्तं। औपदेशिकप्रणयनस्य पुरःस्फूर्तिकत्वेन तत्रैवोत्तरवेदिविधानात्। अतो भाष्यकार
मतेपि न वार्त्तिकोक्तदूषणावकाशः। वार्त्तिककारमतोपपादनं त्वेवं। समभिः सत्रेष्विपक्षे मेकमधिकरणं।
तत्र प्राकृतं सौमिकं वा प्रणयनमिति पूर्वपक्षद्वयं कृत्वा अपूर्वं प्रणयतोध्वर्युश्च प्रतिप्रस्थाता चेति शाखां
तरवचने अवश्यं प्राकृतप्रणयनोत्तरमाहवनीयापादानकप्रणयनांतरविधानावगतेः साकमेधपि वैबो
धायनादिकल्पसूत्रानुसारेणोत्तरसमानार्थकस्याहवनीयापादानकप्रणयनांतरविधायकविधेः कल्प
नेन प्रणयनांतरविधानावगतेस्तदुभयसमानार्थकतया द्वयोः प्रणयंतीत्यस्यापि आहवनीयापा
दानकप्रणयनांतरविधायकत्वस्यैव निश्चयेन प्राकृतप्रणयनानुवादकत्वानुपपत्तेः। अतः प्राकृत
प्रणयनोत्तरमाहवनीयापादानकं प्रणयनांतरमपूर्वं विधीयते। तच्चागत्यर्थवादान्मध्यमयोरेवातस्य

चापेक्षितोदेशविशेषउत्तरवेदिरुत्पत्तिविनियोगविधिभ्यांविधीयतइतितावपिमध्यमविषयाविव। एवंचप्र
थमोत्तमयोस्तत्प्रतिषेधोपिनित्यानुवादएव॰ भाष्यकारमतद्वावांतरप्रकरणबाधार्थइतिसर्वमनाकुलं।
पात्निकास्तु पशुबंधवत्सोमिकानेवधर्माननुतिष्ठंति। उत्तरवेदिपरिमाणंपरंशम्यामात्रेणोपदेशकं
कुर्वंति। तन्मतेप्रणयंतीतिबहुवचनमपिब्रह्मौद्गात्रादिसद्भावादुपपद्यतइतिध्येयं॥ ॥स्वरसाम॥ ॥पूर्वमु
त्तरवेदिप्रतिषेधरूपेणलिंगेनसौमिकप्रणयनातिदेशनिरस्तःधुनालिंगात्प्रतिदेशोस्तीत्येवंतद्द्युदाहः प्रस्तुयने॰
गवामयनेत्रयः स्वरसामानः सप्तदशस्तोमकत्वादिधर्मकायागाः समाम्नाताः। अन्यत्रापिद्वौस्वरसामाना
विति। तथावैश्वदेवपर्वणिवैश्वदेव्यामिक्षाद्यावापृथिव्यएककपालइतिसधर्मकौयागौ। अन्यत्रापिमैत्रा
वरुण्यामिक्षाकार्येएककपालइत्यादिआमिक्षैककपालद्रव्यकायागाः श्रुताः तेकिंस्वरसामानः गावाम
यनिकस्वरसामविहृतयः। अन्येआमिक्षायागाश्चवैश्वदेवि। कामिक्षायागस्यअन्येएककपालाश्चवैश्व

हेरंब

२८

देविकेकपालस्योतनेतिचिंतायांगणत्वेद्विनैवकल्पितेनातिदेशेनेतिकर्तव्यताकांक्षाशांतेः स्वरसामादिश
ब्दानांचस्वरास्यसामादिरूपगुणविधायकत्वेननैवेष्टवादिशब्दवद्। नतिदेशकत्वान्नोक्तयागप्रकृतिकत्व
मितिप्राप्तेगणत्वादिसादृश्यापेक्षयास्वरसामकत्वादिविशेषसादृश्येनलिंगोपबृंहितेनातिदेशकस्यम्ना
चोदनालिंगातिदेशेनतत्प्रकृतित्वं। लिंगानिचस्वरसामसुतावत्स्यः षडहोद्वौस्वरसामानावित्युक्त्वाषडह
यत्नतीयंसप्तदशमहस्तदंत्यस्यत्रयः स्त्रिंशस्तोमकस्यस्यानेभिपर्यावर्तितिरयोत्तांसप्तदशानामनूचीनतायां
इतिद्वयोः स्वरसाम्नोः सप्तदशस्तोमकत्वंदर्शतंमैत्रावरुण्यामिक्षायांचनवाजिनेनप्रचरंतीतिप्रतिषेधवच
नं। आग्रयणेद्यावापृथिव्यैककपालंविधायपत्सर्वहुतंजुहोतिसात्वेकापरिचक्षाहुतोहुतः पर्यावर्तते
द्वितीयाआज्यस्यैवद्यावापृथिव्योयजेतेतिककपालयागेसर्वहुतत्वादिप्रयुक्तंदोषमभिधायवैकल्पिका
ज्ययागविधिपरंवचनं॰ नहिउक्तातिदेशाभावेसप्तदशस्तोमकत्ववाजिनेत्यांसर्वहुतत्वादीनांप्राप्तिः संभ

वत्तितस्मादतिदेशः। अयं च तत्र दसाधारणधर्माणां साधारणधर्माणां नवप्रयाजत्वप्रसञ्जमयत्वादीनां
चातिदेशः। मुख्यानां भूयसां च प्रधानांतराणामनुरोधेन तु क्वचिद्विरोधे साधारणधर्माणां बाधः। याज्ञिका
स्तु असाधारणानामेवातिदेशमन्यंते॥ ॥कर्मजः॥ कर्मनामधेयानामग्निहोत्रादिपदानामतिदेशः कल्प
मुक्तं। तद्वदेव च संस्कारनाम्नामपि यूपादिशब्दानां खदिरे वाल्लीयूपो भवतीत्यादौ सिद्धमेवातिदेशः कृतं तद्व
तु अनोवाहः प्रभृतीनां पदानां किं तत्तद्दुत्पादक क्रियानिमित्तत्वमुत जातिनिमित्तत्वेति अतिदेशसिध्यर्थं विचार्य
ते। तत्र तक्षणादिक्रियाभावे तच्छब्दप्रयोगाभावात्तत्क्रियानिमित्तका एवैते शब्दाः। निर्मंथ्ययूपादिशब्दवत्। ए
अनड्वाहं ददाति वाससी ददातीत्यादौ तक्षणवानरूपक्रियाविशिष्टद्रव्यस्य वहनांगतया विधानात्तक्ष
णवानं च प्रयोगमध्ये कृत्वा अनोवाहश्च देयं। अत्र च तत्तत्क्रियाया वस्तुतः उपदेशोपि अन्यत्र लोकादौ क्लृप्तायो
एवंविधानादतिदेशत्वव्यवहारो भाक्त इति ध्येयं। सर्वथा तक्षणादिप्रयोगमध्ये नुष्ठेयमिति प्राप्ते क्रियानाशे

नंतरमपि जातिदशायां प्रयोगाच्छ्लाघया यौगिकत्वाभावाच्च जातावेव शक्तिः। जातिस्तु परं क्रियाभिव्यंग्या तन्न
नितसंयोगविशेषादिरूपक्रियाभिव्यंग्या वेति तदुत्तरमेव शब्दप्रयोगः। न त्वेतावता शब्दः क्रियावाचीति तस्या अ
विधेयत्वेनानंगत्वाल्लौकिकमेव सिद्धमनोवाहश्च देयं। निर्मंथ्यशब्दस्तु यौगिक इति युक्तं तस्य मथनक्रियाविधा
यकत्वं। पूर्वशब्दे तु क्रियानाशोत्तरं प्रयोगेपि तज्जन्यादृष्टविशिष्टकाष्ठवाचित्वान्न गुड जातिवाचित्वमिति यु
क्तं एव तत्र संस्कारातिदेशः। वस्तुतस्तु यूपकार्ये खदिरे वाल्लीविधानाद्यूपशब्दस्य न संस्कारातिदेशकत्वं। संस्का
रातिदेशस्तु स्थानापत्त्यैव सिद्ध्यति यूपपदं दृष्टांततोप्यसंगतमेव॥ ॥विषयः॥ ॥गर्गत्रिरात्रे आज्यदोहानि सामा
नि प्रकृत्याग्निमुपनिधाय स्तुवीतेति श्रूयते। तत्राग्निः किं लौकिको वैदिको वेति चिंतायां यद्यपि ह्यादौ आहवनीया
दीनां याग्यत्वात् लौकिक पाकाद्यर्थस्य निरस्य वैतत्तथापि रस्याधिकृतायां श्रुतौ स्य प्रयोक्तुमिति सामान्य
वचनेन वैदिककर्ममात्रार्थत्वावगतेर्वैदिक एवेति प्राप्ते आहवनीये जुहोतीत्यादिविशेषवचनानामुपलक्षण

त्वेप्रमाणाभावाद्येरस्त्यधिकृतद्रव्यस्य च होमादिमात्रविषयत्वेपि मार्यकर्त्रोदुपधानविधेश्च लौकिकाग्निग्रहणेपि
चरितार्थतया आहवनीयादीनां विचार एव इंद्रियेण वीर्येण ऋध्यते यस्याहिताग्नेरग्निरपक्षायतीति वचने न निषिद्धत्वा
यतनाच्चलनस्याक्षेतुमशक्यत्वाल्लौकिकाग्नेरेव ग्रहणं॥ अत एव धिष्ण्याग्नीनामपि व्याघारणमात्रप्रयोजनत्वाद्ग्र
हणं। यद्दिपरं व्याघारणात्तरं लौकिकत्वाविशेषादुपस्थितत्वात्तेषामेव ग्रहणमित्याशंक्य तत तदास्तु नाम तत्॥ ॥
संस्कृतं॥ ॥यूपैकादशिन्यां यूपसमीप एकैकां पशुं स्थापनीयमिति विधायोपशयो यूपो भवतीति श्रुतं। तत्रोपशये
काष्ठे यूपशब्दोपि यूपधर्मान्नजोषणादीन्संस्कारनिमित्तत्वादसत्यपि स्थापनीयमिति [illegible]
तिश्रुतं। तत्रोपशये काष्ठे यूपशब्दोयं यूपधर्मान्नजोषणादयमिति विधायोपशयो यूपो भवतीति श्रुतं। तत्रोपशये
दितिप्राप्ते अस्य गौण्या वृत्त्यो विवाधर्मविधायित्वे वाक्यभेदापत्ते रूपशयपस्तुत्यर्थत्वेन तद्ध्येकवाक्यतापत्ते हेरंब·
स्यास्य पृथक्विधित्वानुपपत्तेः अर्थप्राप्तकतिपयच्छेदनादिधर्मप्रयोजनगौण्यावृत्त्यो पशयस्तुतिरेवेदं न तु न २६

मातिदे·शकं॥ ॥कर्मणः॥ ॥अग्नौ पृष्ठैरुपतिष्ठत इति श्रुतं। तत्र पृष्ठशब्देन किं विधीयत इति चिंतायां पृष्ठशब्दस्य
स्तोत्रविशेषवचनत्वात्तस्य च बहुत्वाभावेन चयनांगतया विधानानुपपत्तेः प्रत्ययाभिहितभावनांतर एव पृष्ठध
र्मकाणि धातूपात्तसमीपावस्थानेतिकर्तव्यताकानि विधीयंते· पृष्ठधर्मकत्वाच्च तेषां स्तोत्ररूपतासिद्धिः। धातूपा
त्तमपि च समीपावस्थानमकृतकार्यत्वात्कर्मांतरागमेव। अथवा पाशाधिकरणन्यायेन बहुवचनानुरोधेन पृ
ष्ठप्रातिपदिके गौण्यंगीकारस्यायुक्तत्वाद्बहुवचने नैकत्वादिरूपपत्वाच्चयनांगतया ज्योतिष्टोमिकपृष्ठविधि
रेवायोसमीपस्थितिस्तु पूर्ववत्पृष्ठस्तोत्रस्यैवांगं। वस्तुतस्तु पृष्ठबहुत्वस्यापि ज्योतिष्टोमेसाधितत्वात्सर्वाण्ये
व पृष्ठस्तोत्राणि चयनांगतया विधीयंते। न तु पृष्ठमंत्राणां रथंतरादिसाम्नां वा विधानं· उपक्रमस्य पृष्ठपदे ल
क्षणाप्रसंगात्· एवं च जघन्यमात्मनेपदमेव बाहुलकत्वयोः साधुत्वार्थं व्याख्येयमिति प्राप्ते पृष्ठशब्दस्य शरीर
वयवे प्रिशक्तत्वेन तत्कारणक समीपावस्थितेरपि विधिसंभवेन स्तोत्रविधावेव नियामकाभावेन संदिग्धत्वान्निः सं

द्विधात्मनेपदानुरोधेन पृष्ठपदमेवान्यथानेतुमुचितं· तथाहि· उपान्मंत्रकरणइति स्मृत्याआत्मनेपदबला
त्समीपावस्थानेमंत्रस्यकरणत्वावगतेः साक्षात्तत्संबंधेनाभिधानातिरिक्ते व्यापारे मंत्रस्य करणत्वासंभवेपिस
मीपावस्थानप्रयोजनीभूताभिधानद्वारासमीपावस्थानः प्रतिकरणत्वांगीकारात्तदनुरोधेनपृष्ठशब्दस्य
मंत्रपरत्वावगतिः। अतएवसमीपावस्थानजन्याभिधानजनकत्वसंसर्गेणमंत्राणांसमीपावस्थानं प्रति
करणत्वमितिनाभिधानलक्षणापि वस्तुतस्तु। ऐंद्र्यधिकरणस्थकौस्तुभोक्तन्यायेनलक्षणयाअभिधा
नमेवप्रहृताग्निकर्मकंधातुनाविधीयते· तत्रैवपृष्ठपदार्थस्यकरणत्वं। समीपावस्थानंपरमत्रअभिलेत्यादि
मंत्रलिंगादेवप्राप्तमनूद्यते। पृष्ठपदेनतुआत्मनेपदानुरोधेनपृष्ठस्तोत्रसाधनीभूतामंत्रालक्ष्यंते। वस्तुतस्तु·
षाडहिकेपुरस्तात्तराद्विषुषघ्नसुसाममुपृष्ठशब्दस्यान्वाख्यानार्थार्यवादवशेननिरूढलक्षणापात्रिका, हेरंब·
धिकरणकौस्तुभेव्यवस्थापितत्वात्तान्येवाभिधानंप्रतिकरणत्वेनविधीयंतोसंभवातिरश्चस्तोत्रइवाभिधानं २७

प्रतिसाम्नः करणत्वंऋगक्षराभिव्यक्तिद्वारा। अतएवतदाधारभूतानांयोनिऋचामप्यभिधानांगत्वं। उत्तरयोस्तु
एकंसामतृचेक्रियतेस्तोत्रीयमितिस्तोत्रएवविनियोगान्नाभिधानांगत्वप्रसक्तिः। अतश्च योन्याधारकरथंतरा
दिषाडहिकसामविशिष्टाभिधानमेवात्रस्थंडिलक्षीसंस्कारकत्वेनविधीयतइतिसिद्धं। सामांशेउपदेशोप्ययम
न्यांगत्वस्यपूर्वावगममात्रेणोहविंतितः॥ ॥इतिश्रीखंडदेवकृतौभाट्टदीपिकायांसप्तमस्यतृतीयः॥ ॥
इतिकर्तव्यता॥ ॥तदेवंसप्रसंगोनामातिदेशोनिरूपितः। इदानींकाल्पितवचनातिदेशोनिरूप्यते· यत्रउद्भिदो
र्यादौनैवेतिकर्तव्यताम्नाता यत्रवाद्रव्यदेवतोपहोमादिरूपासमाम्नातापिननिराकांक्षीकरणसमर्था तत्रभाव
नाख्याभाव्येनतस्याः करणानुग्राहकव्यापाररूपेतिकर्तव्यताकांक्षायांवक्ष्यमाणसादृश्येनप्रकृतिभा
वनोपस्थितौतदंशत्रयस्याप्युपस्थितिस्तत्रचफलकरणयोरनपेक्षितत्वादिनातिदेशस्यनिरा
करिष्यमाणत्वादिकर्तव्यतैवप्रकृतिवदित्येवंकल्पितेनविकृतिवाक्यशेषरूपातिदेशेनविकृ

संगतया विधीयते· नच प्रबलप्रमाणेन प्रकृतसंगतया वगतायाः कथं विकृतसंगतत्वमिति वाच्यं· प्रबलस्यापि विकृति
विधेरिति कर्तव्यताकांक्षारूपं गत्यभावेनानर्थक्यप्रसंगाद्दुर्बलप्रमाणबाधकत्वानुपपत्तेः। अतः सर्वत्रानाम्नातेतिक
र्तव्यताकस्थले आम्नातेतिकर्तव्यताकस्यातिदेशः। आम्नातेतिकर्तव्यताकाश्च सोमदर्शपूर्णमासाद्यः श्रौता
स्त्रेताग्निसाध्याः। पार्वणस्थालीपाकादयश्च स्मार्ताग्निसाध्याः एतस्यमूले लौकिकपदेनोच्यंते· तत्राविशेषा
त्सौर्यादावुभयोरप्यतिदेशः यदि तु प्रकृतावेकैकस्याः प्रत्येकं निराकांक्षीकरणसमर्थायोऽहसमुच्चयेनमि
लितायानिराकांक्षाकरणसामर्थ्यकल्पने प्रमाणाभावादेकस्याएवातिदेश इत्याशंक्येत· ततो रक्तलौकि
कयाएवातिदेशः। तस्याः कल्पसूत्रकारादिवचनैराग्रहायणीकर्मादावतिदेशस्पष्टत्वेन दृष्टप्रवृत्तिकतया
सौर्यादावपि तस्याएवातिदेशात्· यत्तु सौर्यादौ प्रयाजे प्रयाजे कृष्णलं जुहोतीत्येद्वावाहते अर्धं बर्हिषोलुना हेरंब·
तिपितत्पक्षेन होतारं वृणीते त्रदृमेधीपि आज्यभागौ यजति इत्यादिलिंगदर्शनं तद्यत्रन्नित्यानुवादवचनानि १८

स्युरित्येवं परिहर्तव्यं· तथाहि· यत्र प्रयाजादर्शपूर्णमासादौ तत्र कृष्णलहोमविधिरिति तत्र रलकारः। वस्तुतस्तु
प्रयाजोद्देशेन कृष्णलहोमांतरविधावावादुपकारकत्वेन सर्वप्रयाजार्थतंत्रेणानुष्ठानापत्तेः प्रयाजे प्रयाज इ जइ
ति वीप्सानुवादानुपपत्तिः। प्रयाजीयहोमोद्देशेन कृष्णलमात्रविधौ विशिष्टोद्देशः। होममात्रोद्देशेन तद्विधाव
ति प्रसंगः। अतः प्रयाजोद्देशेन कृष्णलमात्रं पूर्वपक्षे आज्येन सह विकल्पेन प्रतिनिधित्वेन वा विधीयते सिद्धांते
तु तद्वाधकत्वेन· प्रयाजाश्च पूर्वपक्षे दर्शपूर्णमासीया सिद्धांते सौर्यीया इत्येतावान्विशेषः। जुहोतिस्तु संस्कारक
तुतद्वाधकत्वेन· प्रयाजाश्च पूर्वपक्षे दर्शपूर्णमासीया सिद्धांते सौर्यीया इत्येतावान्विशेषः। जुहोतिस्तु संस्कारस्क
तेन प्राप्तोनूद्यते· अत एव भाष्यकारोक्तमस्य वचनोदाहरणत्वमपि चिंत्यं मविधिप्रकारापत्तेरयुक्त· यात्तिका
स्तु· आज्येनैव प्रयाजहोमे कृष्णलप्रक्षेपमथधिकं कुर्वीते· एवं अर्धं बर्हिष इत्यत्रापि यत्र दर्शादौ बर्हिर्लवनं तत्र
लवनानुवादेनार्धत्वविधिः। नहोतारमिति तु नित्यानुवादः। आज्यभागविधिस्तु अपूर्वविधित या वचनमि
ति द्रष्टव्यं· यत्र हि गुणोपादानं भवेत्तत्र सर्वत्र तृतीयाविधिप्रकारलोभेन यत्रेत्यस्यैवोदाहरणत्वं भवेदत्र व

चनस्य॥ २ अस्तु वा यत्र प्राकरणिकगुणावरुद्धगुणानां तस्य प्रतिनिधित्वादिनापि कथंचिन्निवेशासंभवस्तत्
द्व नोदाहरणं। सर्वथातिदेशाभावेपि लिंगोपपत्तिरिति प्राप्ते स्वप्रत्यक्षपृष्ठितवेदविहितत्वसादृश्याद्धेता
निकाग्निसाध्यत्वसादृश्याच्च वैदिक्या एवातिदेशः॥ अतिदेशाभावेपि दिसौर्यादीनां गृह्यसूत्रे चरुं कृत्वा
त्वस्मार्ताग्निसाध्यत्वं। अतः सामान्यविहितादवनीयादिसाध्यत्वे बाधकाभावात्सादृश्योपपत्तिः॥ अ
तएवं जातीयकेषु दर्शपूर्णमासादिधर्माणामेवातिदेश इति सिद्धं लिंगान्यथैवं सत्युपपन्नानि भवंति। इत
रथा प्रकरणबाधो वाक्यानर्थक्यं वा प्रसज्येत। द्वादशाहिकं। तदेवं निरूपितस्त्रिविधोतिदेशः॥ तत्र प्र
त्यक्षवचनातिदेशस्य द्विविधस्यापि देशात्प्राबल्यं धर्माणामुपात्तत्वादुपकारवैयर्थ्यापत्तेश्च पूर्वमेव प्र
संगादुपपादितं। अतस्तादृशविषये चोदनालिंगातिदेशस्य नैव कल्पना। नाम्नस्तु यदि समानविषयत्वं तदा प्र
त्यक्षवचनायादितासिद्धसादृश्यमादायैव नाम्नो गौणत्वोपपत्तेर्नातिदेशकत्वं। यदि तु भिन्नविषयत्वेनेन

हेरंब·
१९

सादृश्यसंपत्तिस्तदा नाम्नोर्थविरुद्धधर्मातिदेशकत्वमवधेयं। एवं नामातिदेशसत्वेपि समानेऽसमाने वा विषये चोद
नालिंगातिदेशस्य नैव कल्पना नाम्नः प्रत्यक्षत्वेन तेनैवेतिकर्तव्यताकांक्षाशांतेः। अतएव गवामयने ज्योतिर्गौ
रायुरित्येकस्मादिषडहः सु एकाहकांडपठितज्योतिरादिधर्माणां नाम्ना प्राप्तिः। नतु गणत्वसाधर्म्यात्तद्वादशाहधर्मा
णां। नच अहर्गणांतरार्थमवश्यकल्प्येन गणत्वसादृश्याद्गवामयने निष्टद्वादशाहिकातिदेशेनैव तद्धर्मप्राप्तिरेव
स्पष्टा· तत्तदहरुत्पत्तिवाक्येष्वेव भावनाया इतिकर्तव्यताकांक्षायां गणांतर्गतत्वसादृश्येन चातुर्मास्यांतर्गता
ग्नेः। दिवस्यैकैकमेवातिदेशकल्पनेन ज्योतिरादौ नामातिदेशसत्वेनेचोदनालिंगातिदेशस्य वा कल्पनात्। नचला
घ्यागवामयने एक एवातिदेशः॥ गवामयनत्वस्य प्रत्येकवृत्तित्वेन प्रत्येकमेव फलसंबंधात्साधनानां समुच्च
येपि तत्तत्साधनानां प्रत्येकमेवेतिकर्तव्यताकांक्षया प्रत्येकमेव तत्कल्पनात्। अतो ज्योतिरादौ नैव चोदनालिंगा
तिदेशः॥ नचैवं नेषुत्र्युपसत्वस्यैव प्राप्तिर्द्वाभ्यां लोमावद्यति द्वाभ्यां मांसमित्यादिषडहिकाननुक्रम्य पद्वादशो

पसंदोभवंतीति द्वादशादि कद्वादशोपसत्त्वदर्शनानुपपत्तिः। तस्य भूयो दूरं तरानुरोधे ननामातिदेशप्रापितत्रित्व
बाधकत्वोपपत्तेः। द्वादशसुतिसृणामप्युकारकत्वोपपत्तेश्च· तस्मात्ततस्त्याकालीनांगानामन्येषामवात्रित्वाद्य
तिरिक्तानामेवानाम्नातिदेशइतिसिद्धं· नन्वेवमप्येकादशिन्यां विहारदर्शनानुपपत्तिः। तथाहि· ज्योतिष्टोमेसौत्ये
ऽहनि वैकल्पिकी एकादशिनीसमाम्नाता तस्याश्च द्वादशाहे विहारः श्रुतस्तस्यातिदेशेन गवामयनेऽप्येकषष्ट्यधि
कशततत्रयस्तस्यालभेकेप्राप्ताविदं श्रुतं। यस्यातिरिक्तमेकादशिन्यामालभेरन्नप्रियं भ्रातृव्यं मतिरिच्येतायथ
दिष्ट्रो द्वे पश्चसमस्येयुः कनीय आयुः कुर्वीरन्यघेतेब्राह्मणवंतोऽनव पशव आलभ्यंते नाप्रियं भ्रातृव्यमिति
रिच्यते न कनीय आयुः कुर्वत इतिः गवामयने हि संपूर्णैकादशिन्या द्वात्रिंशद्वारमावृत्तौ द्विपंचाशदधिकशत
त्रयमहानिपर्यन्तं अवशिष्टानि नव· तत्र पुनरेकादशिनीकरणे अतिरेकः समासो वा आपद्येत अतो ब्राह्मण
वतां तेषु विधानं· तद्यदि चोदनालिंगातिदेशेन ज्योतिरादिस्वासु अपि विहारः प्राप्यते तत एतल्लिंगमुपपद्येत· प

हेरंब·
२०

दितुनामातिदेशप्राबल्यं तदा तद्बलेन ज्योतिरादिस्वासु संपूर्णायाएकादशिन्याएव प्राप्तेर्विहारदर्शना
नुपपत्तिरितिचेत्· एकादशिनीविहारस्यानारभ्याम्नातस्य गवामयने औपदेशिकत्वेन तद्देशेनामातिदेश
बाधात्· तथाहि· यथा हि प्रभवः पशवस्तुस्तानेतानन्वानाना लभेरन्नाग्नेयमेव प्रथमेऽहन्यालभेरन्सा
रस्वतीं मेषीं द्वितीये सौम्यं बभ्रुं तृतीये वारुणमंततोऽथ पुनर्ज्योतिरादीनां पर्यावर्तेषु आग्नेयमेव प्रथ
मेऽहनीत्याद्यनारभ्याधीतस्यैकादशिनीविहारस्य प्रवृत्तौ ज्योतिष्टोमे द्वादशाहे वा ज्योतिराद्यहःसम्
हाभावेन निवेशानुपपत्तेस्तत्तीयप्रवृत्तौ गवामयने निवेशः अतएव एकादशाहनिः अतश्चोपदेशिक
त्वान्नामातिदेशस्तद्देश एव बाध्यत इत्युपपन्नं लिंगं॥ ॥इति श्रीभाट्टदीपिकायां खंडदेवकृतौ सप्त
मेऽध्यायस्य चतुर्थः॥ ॥

हेरंब·
२०

२११९८

सप्तमाध्यायः समाप्तः

~~षष्ठोध्यायः~~

षष्ठाध्यायः समाप्तः

अष्टमः पाद

तथा न विरुध्येते ॥ इदं च सर्वं अन्योन्याश्रयो मा यदिति शाखान्तरवाक्यं नास्तीति कृ।
त्वा चिंतया बोध्यं ॥ तस्मिद्धं भागवतस्यैवाधिकार इति निरूपितोऽधिकारः ॥ ॥
इति श्रीखंडदेवकृतौ भाट्टदीपिकायां षष्ठस्याष्टमः पादः ॥ श्रीगणेशाय नमः ॥

यद्गुणाभिधानस्यैव स्तोत्रशस्त्राभिधेयत्वात् त्राप्रगीताया ऋचः साधनत्वासंभवेन पूर्वपक्षानुसिद्धेरिति ध्येयं तेषां चेति यद्यपि प्राकृत
साधनप्राप्तावपि तद्रूपेणैव कृतत्वात् ऋक्सामविधिसंभवात्प्राकृतसाधनत्राह्यभावप्रतिपादनमनुपयुक्तं तथापीह प्रसक्तप्रतिषेध्यश्रवणा
दर्थवादाद्विधिः कल्पनीयः तत्कल्पनं च स्तोत्राकांक्षामुपजीव्यैवेति स्तोत्रगणं प्राकृतेनैराकांक्ष्याभावप्रदर्शनाय प्रकृतसाधनाभाव
प्रतिपादनमुपपद्यत इति ध्येयं अप्राकृतेष्विति पृष्ठावटास्तरणबर्हिर्विधिवदर्धर्माणामिवेति भावः ॥ ॥ अन्वत्रायन्त्यागच्छन्ति सर्पाः
॥ ॥ ननु साम्नः ऋगनपेक्षस्य स्तुतिसाधनत्वाभावादृक्सामयोर्विकल्प इति पूर्वः पक्षः साम्नैव स्तुतिरिति सिद्धांतः तच्चानुपपन्न इत्यत
आह तत्रेति तथा चाप्रगीतया चासाम्नः विकल्पादिविचारः संभवतीति भावः ॥ अप्रगीतपरत्वमुपपादयति प्रगीताया इत्यादिना इयो
रिति ननु प्रत्यक्षविध्यश्रवणात् कल्पनायामेकवाक्यतानिर्वाहार्थं एकस्यैव विधिः कल्पयितव्य इति कथमुभयोर्वचनाद्विकल्प इति
चेन्नैवं इत्थमियं ऋक् प्रशस्ता यद् असुरा अप्यत्र वर्णे हताः संत आगच्छंति सामत्वनिंदकात् प्रशस्तमिव्येवं सामानिंदासहिता ऋक्स्तुत्या
ऋग्विधिः कल्पनीयः प्रतीयते तथा ऋगप्रत्राप्ता यद्विघातका असुरा आगच्छंति सामत्वनिंदकात् प्रशस्तमिव्येवं ऋद्विंदापूर्वक
सामस्तुत्या सामविधिः कल्पनीयः प्रतीयते तत्र विनिगमकाभावादुभयोरपि विधिः कल्पनीयो वाक्यभेदांगीकारेणेत्याशयात् तपुर

वं विद्वान साम्नास्तुवीतेति तु पक्षद्वये पवंधाद्धि ध्यक्षममिति विधिरवश्यंकल्पनीय एवेति भावः विस्पष्टेति असुराणां घात कत्वेनैव प्र
सिद्धेः ऋत्विनिंदा साम्नः प्रशंसा च विस्पष्टं प्रतीयत इत्यर्थः तथा च उपसंहारे श्रवणं विस्पष्टप्रशंसाचायेतिगमकमिति तत्स्यैव वि
धिः कल्प्य इति भावः सत्रार्थस्तु ऋक्सामयोस्तत्परत्वात् तत्स्तुत्यर्थत्वात् एककार्यकत्वे विकल्पः स्यादिति यद्वा तत्परत्वात् तत्पदत्वे स्यादि
वाक्यस्य स्तुत्यर्थं तपोभयविधिपरत्वादिति॥ ॥एवं वा॥ ॥पूर्वत्र विकल्पाभावे पीहविकल्प इत्याक्षिप्तेः संगतिः विशेषाभावादिति
प्रतीकेन प्रगीताप्रगीतयोरुभयोरपिग्रहणाविशेषादित्यर्थः प्रगाणार्थइति अप्रगीतायाः संहितायां येपठितत्वेन प्रगाणार्थएकत्वा
त् संहितायां यस्य ऋक् स्वरूपावधारण द्वारा प्रगाणार्थत्वादन्यया अदृष्टार्थत्वापातादिति भावः तदेवोपपादयति नहीति उपस्थान
इति अनन्यप्रयोजना प्रगीति च प्रतीकेन विनियुज्यत इत्यर्थः सर्वनाम्नेति अप्रगीतायाः पाठः प्रगाणार्थः इत्यनन्यार्थः सन्निधानमा
दाय प्रगीतैव सन्निहितार्थकसर्वनाम्नापरामृश्यत इत्यर्थः इदं चापाततः अयं सहस्रमान इत्यात तयेति निर्देशस्य पाठसन्निधानानपे
क्षणात् किं तु प्रतीकोपादानकृतसन्निधानमपेक्ष्यं तच्च प्रगीताप्रगीतयोः साधारणमिति तस्या अपि सर्वनाम निर्देशार्हत्वादिति ध्ये हेरंब
यं॥ ॥एवं वा॥ ॥क्वाचिदिति उदात्तानुदात्तस्वरितलक्षणैस्त्रिभिः स्वरैः ऋग्विछास्वाध्यायां मंत्राः पठ्यंते ऋक्त्विति प्रवचनेन सहस्वतुर्भिरि

तुरुत्तरशतसंख्याका इंद्रदेवताकाः बृहतीछंदस्काः प्रगाथाः प्रचर्या इत्यर्थः इहति स्तुगाने पि प्रगाथसमारव्या नादिकमुपपद्यते इत्यस
नात् संगतिः किमिति किं पठितेष्वेव प्रगाथेषु ऋक्कल्पनेनाति स्तुगानं उत पादं पुनरारभ्य तद्युक्तेन न्यायेन पाद प्रगथनेन द्वयोरेवेत्य
र्थः प्रगथन इति पादप्रगयन इत्यर्थः अत्र ति स्तुगाने पि प्रगाथसमारव्या उपपद्यत इति विशेषाशंकानिराकरणार्थमिदं वर्णकमित्या
शयेन तच्छंकामवतारयितुं पृच्छति असतीति विशेषाशंकामाविष्कुर्वन्नुत्तरमाह ऋगिति अन्याइति पादप्रगथनेन तु पादमात्र एव हि ग्रा
मं न तु कृत्स्नायामृचीति ऋगन्यतममुपपन्नमिति भावः अत्र वर्णके सूत्रं पादप्रगथनपरं योज्यं॥ ॥अर्थैकत्वाद्विकल्पः स्यात्॥ ॥गी
ति प्रकाराणामिति तेचाक्षरविकारो विकर्षणं अभ्यासो विराम स्तोभ इत्येवमादयो भाष्ये उक्ताः तदितिगुणानामनुसारेणार्थैकत्वाद्विक
ल्पप्रधानं वृत्तेरपि कृत्वादित्यर्थः सिद्ध इति एकार्थास्तु विकल्पेरन्निति हि दशमाध्यायादिति भावः॥ ॥अर्थैकत्वाद्विकल्पः स्यात् ऋक्सामयो
स्तत्परत्वात्॥ ॥पूर्ववदिहापि विकल्प इत्याक्षिप्ते संगतिः स्तोत्राणीति अत्र स्तोत्रशब्देन गुणाभिधानमात्रं विवक्षितं यथा स्कृते प्रगीतमंत्रे

साध्यगुणिनि

पूर्ववत्प्रगाथनस्त्वोपद्यते अपूर्वयोरनुष्टुभोरानयनेनुत्रप्रग्रंथयमिताभिरेवऋग्भिः संख्याः संपत्स्यभावात् पूर्वत्र देवलिंगमिदमनुपपन्नं
स्यादित्येतत्प्रदर्शनार्थमित्यर्थः तृतीयसवने आर्भवपवमानस्तोत्रं सप्तदशं पञ्चात्रियमेकविंशमिति एवं स्तोत्रद्वयस्याश्रयभूतास्त्र
चो ५३ त्रिंशत् तत्र षड्गायत्र्यः षडनुष्टुभस्तिस्रो जगत्यः एकोष्णिक् पंचदश ककुभः सप्तबृहत्यः तास्वक्षरगणनया चतुर्विंशतिः ज
गत्यः एका ककुप्च संपद्यंत इति द्रष्टव्यं लिंगं तत्प्रदर्शनार्थत्वाद्देवनप्रयक्संगतिः अत्र प्राभाकरैः पठितयोरनुष्टुभोः पठिताभ्यां गा
यत्रीभ्यां त्रिचगानसंपत्तेर्नात्र प्रगाथनेन कार्यमित्येवं विशेषाशंकानिराकरणार्थमिदमधिकरणं निराकरणं तु आनुष्टुभे त्रिचे भवत
इत्यानुष्टुभस्य पठितयोर्गायत्र्योर्गानेनुपपत्तेर्योन्यनुष्टुप्संबंधमात्रे गात्रिचे आनुष्टुभतस्य एकदेशसंबंधघटकत्वेन लक्षणिकत्वा
त् तस्मात्प्रगाथनेनैव कर्तव्यमित्येवमुक्तं तन्निराकरणाभिप्रायेणाहात्रेति भाष्यकारेणान्यागमनस्यैव पूर्वपक्षितत्वेन पठितयोर्गान
मिति पूर्वपक्षाशंकाशयः भाष्यविरुद्धत्वादिति भावः ॥ ॥एवं वा॥ ॥गवामयन इति अभीवर्तोग्न्य ब्रह्मसामप्रकृत्येति शेषः चतुरीति च

स्यैवेति भाष्योक्तमनधिकारप्रतिपादनमनादर्तव्यं ॥ ॥लिंग॥ ॥क्रतुषु पुंस एवाधिकार उत स्त्रिया अपीति
चिंतायां स्वर्गकाम इति पुल्लिंगश्रवणात् पुंस एव न हीदमधिकारिविशेषणं कर्तृसमानाधिकरणत्वेन तद्विशेष
णस्यास्याश्रुताधिकारिविशेषणत्वानुपपत्तेः अतश्चाख्यातोपात्तैकत्वविवदेव पुंस्त्वस्याप्यविवक्षाना
नुपपन्ना किंच अद्रव्यत्वादपि स्त्रिया नाधिकारः भार्या पुत्रश्च दासश्च त्रय एवाधनाः स्मृताः यत्ते समधिग
च्छति यस्यैते तस्य तद्धनं इति वचनात् शतमधि रथं दुहितृमते दद्यादार्षे विवाहे गोमिथुनमित्यादिना पित्रा भर्त्रे नो
त्येन दासवद्विक्रीतत्वाच्च अत एव गर्भेणाविज्ञातेन भ्रूणहेति यश्चसाधर्म्यं पुंगर्भहननशंकया भ्रूणपदवाच्यं
तात्वलिंगमवकल्पते अन्यथा स्त्रीत्वेन विज्ञातेपि गर्भे हंतृत्वाविशेषात् तथात्रेयीं हत्वा भ्रूणहेति लिंगं आ
त्रेयी सगर्भा अतः पुमानेवाधिक्रियत इति प्राप्ते यद्यपि कर्तृविशेषणं पुंस्त्वं तथापि प्रमाणांतरेण स्त्रिया अधि
कारावगते विधिलघिवानुरोधेन साधुत्वार्थमेव पुंसानुवाद एव पुंस्त्वं तथा [illegible] वसंते ब्राह्म

णइत्यादौ प्रकृते तत्त्वनपेक्षितत्वान्नास्य कर्तृविशेषणत्वमपि तु योग्यत्वादधिकारिविशेषणत्वमेव ततश्च तस्य
फलं प्रत्यप्राधान्यादुद्देश्यत्वेन तद्विशेषणाविवक्षा वस्तुतस्तु प्रथमापेक्षितत्वात्स्वर्गकामादिपदस्य फलपर
त्वमेवेति कथं पुंस्त्वस्य विवक्षाप्रसक्तिः। न चाद्रव्यत्वं कर्तृत्वं नादिभिरर्जनसंभवास्ति वादिदत्तस्य दायस्य वास्मृति
प्रकृतत्वाच्च धर्मे चार्थे च कामे च नातिचरितव्येति स्मृत्या पत्न्यार्जितस्याप्युभयसाधारणत्वाच्च भसदाबाएताः परगृ
हाणामैश्वर्यमवरुंधत इति स्मरणाच्च संपत्नीपत्न्या सुकृते न गच्छनाभिस्यादि मंत्रवर्णात्पाणिग्रहणाद्धि सह
त्वं कर्मसु तथा पुण्यफलेषु चेति स्मृतेश्च पत्न्या अप्यधिकारः। पत्युर्नो यज्ञसंयोग इति स्मृतेः पत्नीशब्दस्य त्वाभा
वेनुपपतेश्च यतु भार्यापुत्रश्चेति वचनं क्रीतत्वादिवचनं च तन्न स्त्रीस्वातंत्र्यमर्हतीति वचनांतरानुसारादस्वा
तंत्र्यपरं मौल्यदानं तु अदृष्टार्थकन्यालाभातिरिक्तस्वत्वाभावस्य वस्य भाणत्वेन तद्दानस्यार्थोपचारिकत्वाच्च आ
चेयि चात्रि गोत्रोसन्नानत्वास्वगर्भासत्यपि वस्त्रियाः क्वाचित्क कर्माधिकारे असति गमकांतरे जपादिसक

हृ.प्र.

॥४॥

लवैदिककर्मानधिकारादविज्ञातलिंगदर्शनं पुंवधप्रायश्चित्तविशेषविधानार्थं तस्मात्सिद्धं स्त्रिया अप्यधिकार
॥ ॥स्तवतो॥४॥ ॥सिद्धे द्वयोरधिकारे किं दंपती पृथक्पृथक्कुर्यातां उत सह इति चिंतायां स्वर्गकामपदोपात
स्यैकत्वस्य पुंस्त्ववद विवक्षितत्वेपि आख्यातोपात्तस्य तस्य गुणभूतोपादेयकर्तृगामित्वेन विवक्षितत्वाद्धैककर्तृः प्र
योग इति प्राप्ते प्रत्येकप्रयोगे अन्यतरकर्तृकाज्यावेक्षणान्वारंभादिपदार्थलोपेन वैगुण्यापतेरन्यतरेणान्यतरस्य परिक्र
यादिनोपादाने च फलभोक्तृत्वाभावात्स्वामित्ववाचिपत्नीयजमानशब्दप्रयोगानुपपत्तेरंगसाकल्यार्थं सहैव प्रयोगः
। न हि आज्यावेक्षणादीनां कर्तृसंस्कारकत्वं येन तत्तत्प्रयोगे व्यवस्था लभ्येत क्रतुधर्मत्वात् उभयकर्तृकमवेक्षणद
यं अदृष्टविधया क्रतोरंगं यत्र त्वन्यतररोग निरूपत्वमेव दर्शादिप्रयोगस्तत्रेतरस्य पत्नीत्वाद्यभावेपि गुणलोपे
चेति न्यायेन परिक्रयाद्युपात्तेतरकर्तृकाज्यावेक्षणेपि न सर्वत्र तथा कल्पनायां प्रमाणमस्ति साहित्यस्य पुण्यफ
लेष्विति स्मृत्यादिप्रमितत्वात् धर्मे चेत्यादि वाक्यपर्यालोचनया च तयोः संसृष्टद्रव्यत्वादविभागप्रतिषेधाच्च सहै

दम्प्रयोगः। अत एव उभयस्वत्वस्य संसृष्टत्वात् द्रव्यत्यागे दक्षिणादानादौ चोभयोरेव कर्तृत्वं यत्तु भाष्ये द्वादशशते षट्
पंचाशद्देकेनापरेणापि तावद्देवेत्येवं विभागः कथितः स द्वादशशतस्यैव विहितत्वात् तत्राप्युभयोः संसृष्टस्वत्वो
पपत्तेरपेक्षितं प्रदर्शितत्वात् रस्यास्तु स एव त्यागेपि कर्तृत्वं तस्यास्त्वनुमतिद्वारं तदितिकेषांचिन्मतं तदनुमतेः फल
संबंधाश्रवणात् तद्वारकत्वे प्रमाणाभावे नच द्व्यधिकरणव्युत्पादिताधिकारभंगापत्तेरपेक्षितं यत्वाख्यातोपात्तैक
त्वसहाधिकारेणावकल्प्यत इति तन्न एकवचनश्रवणादेव दंपत्योर्व्यासज्यवृत्त्येकस्यैव कर्तृत्वस्य कल्पनात् इतरथा
कर्तृभेदात्त्रिवद्बहुवचनापत्तेः। अत एव क्रियाक्षिप्तयोः कर्तृत्वतदाश्रययोर्मध्ये आवश्यकत्वात्कर्तृत्वांश
एव शाब्दत्वसिद्ध्यर्थं लक्षणामंगीकृत्य तत्रैव पार्ष्णिकैकत्वाद्यन्वयः। क्षौमे वसानाविति द्वित्वगत्याक्षिप्ताश्र
येपि अत्र च कर्तृत्वं कृत्याश्रयत्वसमनियतं अखंडोपाधिरूपं द्रष्टव्यं नतु कृत्याश्रयत्वमेव तस्य प्रत्याश्रयं कृतिभेदेन
भेदात् व्यासज्यवृत्तित्वानुपपत्तेः तस्मात्सहप्रयोगः॥ ॥द्याधानं॥ ॥आधानप्रकरणे क्षौमे वसानाव

हे

।।५।।

ग्निमादधीयातामिति श्रुतं। तेन चाधानेकर्तृत्वविधानात् द्वौ पुमांसौ सस्त्रीकावाधानेधिकारिणाविते नराजपुरोहि
तौ सायुज्यकामौ यजेयातामितिवत् नन्वत्र कुकुटावानयमियुनं करिष्याम इतिवत् पुमान् स्त्रियेत्याद्यनुशासमानु
रोधेन स्त्रीसद्वितीयतया विरूपैकशेषस्याप्युपपत्तेर्वाक्यस्य क्षौमविधिमात्रपरत्वेनाप्युपपत्तावुक्ततिशिष्टकर्तृ
कत्वबाधानुपपत्तिरितिवाच्यं सरूपैकशेषस्यासंभवे लक्षणापादकविरूपैकशेषस्यान्याय्यत्वात् तथाहि औका
रस्तावद्द्वित्वं पुंस्त्वं चाभिधत्त इत्यनुशेकहायनीवद्द्वित्वावच्छिन्ने पुंस्त्वं पुंस्त्वावच्छिन्ने च द्वित्वमिति परस्परनियमात्तु
द्वयप्रतीतिः मुख्याविरूपैकशेषे तु पितराविव्यादौ मातृत्वादेः कुकुटाविव्यादौ स्त्रीत्वस्य च प्रत्यायकाभावाल्लक्ष
णा आवश्यकीति तस्य ततो दौर्बल्यं न च भवन्मतेप्युपक्रमस्य क्षौमपदे मलिनत्वसादृश्यगौणी दुष्कर शब्द इत्यनु
सारात् द्वावयवयोग इति जघन्यवृत्त्याश्रयणमनुवादवैय्यर्थ्यं उत्पत्तिवाक्यस्यैकवचनस्य वसाधुत्वमात्रार्थत्व
मित्याद्यनेकत्वेनिमित्तेव दोषतादवस्थ्यमिति वाच्यं क्षौमेवाक्य एव उभयविशिष्टाधानविधानांगीकारात् व

संतादिवाक्ये तु ब्राह्मणादिकर्तृकत्वे निमित्ते वसंतादिकालविधानं अत एव ब्राह्मण इति एकत्वं पुंस्त्वं वा विवक्षितं आ
दधीतेत्यपि च ब्राह्मणो यदि शूद्रसहित आदधीत तदा वसंत इत्येवं कालाद्यविवक्षा ब्राह्मणेन कर्तव्या तु वा ह॥ तस्माद्द्वौ पुमां
सौ सस्त्रीकावधिकारिणौ। यत्तु भाष्याद्दौ सरूपैकशेषसाधकप्रमाणांतरमुपन्यस्तं द्वंद्वापवादत्वात्तेकशेषस्य द्वं
द्वार्थ एवार्थ इत्यवगम्यते द्वंद्वश्च युगपदधिकरणे द्वंद्वो भवतीति कात्यायनस्मरणात् युगपदधिकरणतावा
ची अधिकरणं शब्दप्रतिपाद्योऽर्थः स यत्रानेको युगपदेकेन पदेन बोध्यते तत्र द्वंद्वः। तथा च धवखदिरावित्यत्र
धवपदं लक्षणया खदिरसहितधवपरं इतरत्र सहितधवपरमेव वा इतरत्तु खदिरपदाल्लिणीयते एवं खदिरपद
मपि सेयं युगपदधिकरणता इतरेतरयोगोऽयमेव अस्मिन्नेव चार्थे द्वंद्वः। चकारस्य हि चत्वारोऽर्थाः॥ समुच्च
यान्वाचयेतरेतरयोगसमाहाराः॥ तत्र विभक्त्यर्थान्वये परस्परनिरपेक्षत्वेऽपि क्रियान्वये इं चक्रादिवत्पर
स्परसापेक्षत्वे सति समस्त्वं समुच्चयः॥ अतश्च नेतरेतरयोगेन विकल्पेनावा अन्वाचयेतिव्याप्तिः॥ यथा अहर
हर्नयमानो गामश्वं पुरुषं चेत्या हो। अन्वाचये तु एकस्य प्रयोजकत्वमपरस्य नेति न साम्यं यथा काष्ठान्याहर॥

द्वं
६

शाकं चाहरेति इतरेतरयोगे तु व्यासन्यवृत्तिविभक्त्यर्थे परस्परसाहित्येनान्वयः॥ यथाग्निश्च सोमश्च देवते इत्यादौ।
अत्र धवं च खदिरं चेत्यादावितरेतरयोगविवक्षायां युगपदधिकरणवचनता आवश्यकी अन्यथा प्रत्येकं विभक्त्य
र्थान्वये नेतरेतरयोगस्य समुच्चयाद्भेदो नापतेः॥ अत एव निरपेक्षयोरेकक्रियान्वयित्वं समुच्चय इति तंत्ररत्नोक्त
मपास्तं अमावास्यायां पौर्णमास्यां वा यजेतेति एकवाक्योक्तविकल्पेतिव्याप्तेः॥ इतरेतरयोगसमाहारयोस्तु सा
हित्यस्य पदार्थान्प्रति गुणत्वप्रधानत्वकृतो विशेषः॥ इतरेतरयोगत्वं तुल्यं एषु चार्थेषु इतरेतरयोग एव द्वंद्वः॥
अत एव चार्थानामनेकत्वेऽपि इतरेतरयोगरूपचार्थ एव द्वंद्व इति चार्थे द्वंद्व इति सामान्यसूत्रं महाभाष्यकारादि
भिर्विशेषपरतया व्याख्यातं अतश्च युगपदधिकरणतावाचित्वं द्वंद्वापवादत्वादेकशेषस्यापि तद्वाचित्वप्रतीते
र्वसानाविसत्रपुंद्वयप्रतीतिरिति तन्न विरूपैकशेषांगीकारेऽपि स्त्रीसहितपुंसः पुंसहितस्त्रियाश्च युगप
दभिधानोपपत्तेः॥ न चैवं पुंद्वयं स्त्रीद्वयं चेति चतुष्टयापत्तिः॥ धवखदिरद्वयवत् स्त्रीपुंद्वयोपपत्तेः॥ वस्तुतस्तु का
त्यायनोक्तं युगपदधिकरणतावाचित्वं पतंजलिनैव दूषितं तस्यायमाशयः॥ धवपदे खदिरपदे च लक्षणा

मांप्रमाणाभावात्। इतरेतरयोगस्य च शब्देनैव तात्पर्ये सति बोधोपपत्तेः। अतएव धवंखदिरंचेत्यादौ तात्पर्या
नुरोधेन धवखदिरवृत्तिव्यासक्तकर्मत्वे लक्षणेत्यपि बोध्येयं द्वंद्वे तु विभक्तेरेकत्वादेवेतरेतरयोगो लक्षणां
विनैव निरपवाधः। यत्तु प्रमित्रयोर्वरुणयोरिति वेदे क्वाचित्कं विग्रहप्रदर्शनं तच्छांदसं अतएव विभक्तेर्व्या
सज्यवृत्तिधर्मपरत्वे द्वंद्व एव तादृशस्थले तात्पर्यग्राहक इत्यपि बोध्यं किंच द्वंद्वापवादत्वेप्येकशेषस्य न तदुत्तर
विभक्तेर्व्यासज्यवृत्तिधर्मपरत्वं वचनान्वयस्य विभक्त्यर्थान्वयोत्तरकालीनत्वेन ततः पूर्वमेकशेषतत्पाहक
प्रमाणाभावात् वस्तुतस्तु एकशेषानुशासनमपि परिभाषामात्रमेव सरूपद्वंद्वनिराकरणार्थं एकप्रातिपदि
कार्थस्यैव द्विवचनादिवलेनानेकत्वप्रतीत्युपपत्तेः। विरूपैकशेषे तु तात्पर्यग्राहकानुरोधेनानुशासनिकी औका   द्वत्वः
रे लक्षणेति विशेषः। अतस्तन्द्रियासरूपैकशेषस्यैवांगीकारात्तृद्वयाधिकार इति प्राप्ते वसंतादिवाक्ये आद   ॥७॥
धीतेत्येकवचनस्य पाक्षिकानुवादापत्तेः ब्राह्मणद्वयकर्तृकाधाने वसंतप्राप्तसनापत्तेरन्यस द्वितपदाध्याहारा
पत्तेश्च वसंतादिवाक्येष्वाधानविधानं वसानवाक्ये तु एककर्तृविशिष्टाधानेकर्तृत्वद्वित्वसौमोभयविध्य

योगादानुशासनिकी लक्षणामंगीकृत्य विरूपैकशेषोधिष्ठानलक्षणया तस्मिन्द्वित्वान्वयोपि पार्ष्णिको यु
क्तः समाश्रयितुं अतएव तत्र सोममात्रं वसंतक्रियोद्देशेन विधीयते युक्तश्च वहुपात्तभावनायामपि
कारकसंबंधः विधायकस्तु आदधातिपद एव प्रत्यय उपक्रमस्य सोमपदे कृत्यर्थलाभाय च विप्रकृष्टार्थस्या
पि विधायकः। अन्यत्तु सर्वप्रकरणप्राप्तत्वादनुघतेः यद्यपि चोत्पत्तौ पुंस्त्वश्रवणात्स्त्रियमादाय द्वित्वं नप्रा
प्यते तथापि विशिष्टविधिगौरवपरिहाराय वसानवाक्ये वाक्यभेदपरिहाराय च धर्मे चेत्यादिवाक्यसंकोचपरि
हाराय च ब्राह्मणादेरधिकारित्वेनैवान्वयांगीकारात्तस्य चोद्देश्यत्वेन तद्विशेषणपुंस्त्वस्याविवक्षोपपत्तेः
स्त्रियमादाय द्वित्वप्राप्त्यविघातः द्विवचनं चात्राधिष्ठानानेकत्वमात्रपरं तेन पत्न्यनकत्वेपि न कश्चिद्विरोधः
।अंतएव पुमान्स्त्री सह द्वितीय आधानेधिकारी॥ ॥तस्याः॥ ॥स्थिते स्त्रियासहाधिकारे यत्र ताव
त्स्वत्वत्यागस्तत्प्रधानं दक्षिणादानादिव द्वाभ्यां कार्यमित्युक्तमेव अतएव वरणादिद्वारा आर्त्विज्येपि उभ
योरपि प्रयोजककर्तृत्वं। ये च फलिसंस्काराः। कर्तृसंस्काराश्च ते फलित्वकर्तृत्वयोरविशेषादुभयोरपित

त्रापियत्रयोक्त्रेणपत्नींसन्नह्यतिमेखलयायजमानमित्यादौप्रतिनियतनिर्देशस्तत्राद्दर्भंतर्बर्हिरितिवल्लक्षणया
प्रस्तादेरपिउद्देश्यांतर्भावांगीकारेणसत्स्वप्युभयोरेकादृष्टसाधनत्वेव्यवस्थैवविशेषनिर्देशाभावेपितुयत्रके
शश्मश्रुवपतइत्यादौकेशश्मश्रूणोःशरीरसंस्कारार्थंवपनंप्रतिउपादेयत्वेन दृष्टावगतसाहित्यविवक्षा
तत्रापिपत्न्याश्मश्र्वभावेनकेशानांनवपनंनहितत्केशश्मश्रुसंस्कारकंतेषामनुपयुक्तत्वात् अतस्तदपिय
जमानस्यैव अतएवयजमानानेकत्वेयद्विविधस्यापिप्रत्येकंकरणं यत्रतुक्रत्वर्थेष्वाज्यावेक्षणादिषुप्रतिनि
यतोनिर्देशस्तत्रोपादेयविशेषणस्याविवक्षितत्वात्तत्रतेनप्रतिनियतेनैकेनैवकर्त्राकरणं अतएवपत्न्यनेकत्वे
सन्निहितयाज्येष्ठयैव यत्रतुयाजमानमितिविशेषसमाख्ययाकर्तृनियमस्तत्रयजमानप्रातिपदिकस्योभयपरत्वा
पपत्तेर्विरूपैकशेषांगीकारेणद्विवचनबहुवचनांतविग्रहेणचोभयोरपिवैकल्पिककर्तृत्वमितिप्राप्तेयजमानश
ब्दस्यपुंस्येवप्रचुरप्रयोगाद्विरूपैकशेषद्विवचनांतादिविग्रहस्यचासतितत्तात्पर्यग्राहकप्रमाणेअनाश्रयणीयत्वा
त्सत्सुतदाश्रयणेतद्विषयज्ञानाक्षेपशक्तिकल्पनापत्तेश्चप्रसिद्धज्ञानवंतंपुमांसमादायैवसमाख्योपपत्तेस्तस्यैव

हृस्त्र॰
॥ ५१ ॥

कर्तृत्वं यद्यपिस्वाध्यायविधौलिंगविशेषानुपादानेननस्त्रियोव्यावृत्तिप्रतीतिस्तथाप्युपनयनवाक्येतदुपादा
नात्तत्रैवतस्योद्देश्यविशेषणत्वेपिअष्टवर्षत्वादिवद्देवतमध्यापयीतेत्यत्रतच्छब्देनपुंस्त्वोपादानादध्ययनेत
द्व्यावृत्तिः। अत्रहिअध्यापनस्यस्वार्थत्वेनरागप्राप्तत्वाल्लक्षणयाप्रयोज्यव्यापाररूपाध्ययनएवकर्तृविधिः।
अतएवोपनयनवाक्येतत्संस्कारकृतेनाचार्यकर्तृकमुपनयनंमाणवककर्तृकमुपगमनमेववानियम्यते तेनचाचा
र्यत्वसिद्धेरानुषंगिकत्वात्तामादायैवात्मनेपदोपपत्तेर्नचाचार्यकरणेनयतेर्धातोरात्मनेपदंभवतीत्यनुशासनबला
दुपनयनस्याचार्यत्वार्थत्वं। तस्यरागप्राप्तत्वेनविधिवैयर्थ्यात् अतउपनयनविधौलिंगस्याविवक्षायामप्यध्य
यनेतस्यविवक्षितत्वान्नस्त्रियोधिकारः। स्त्रीशूद्रद्विजबंधूनांनत्रयीश्रुतिगोचरेतिप्रतिषेधाच्चतथा अतश्च
ज्ञानाक्षेपकल्पनाभियायजमानस्येदमित्येवविग्रहात्तस्यैवतत्रकर्तृत्वं॥ ॥चातुर्वर्ण्यं॥ ॥यद्यपिकामश्रु
तयोविशेषप्रवृत्तास्तथापितासांलाघवायआधानाध्ययनविधिसिद्धाग्निविद्योपजीवकत्वस्यद्वितीयेसा
धितत्वाच्छूद्रस्यतदाक्षेपकल्पनानुपपत्तेस्तस्यवेदाक्षरश्रवणप्रतिषेधाच्चापशूद्राणांत्रयाणामेवाधिका

रोनम्शूद्रस्य अग्निसाध्येतदसाध्येचवैदिकेकर्मणि द्वितीयसिद्धस्यैवप्रयोजनाधिकरणमितिनातीवात्रपूर्वप
क्षादरः। अतएवसर्वत्रवेदेत्रयाणामेववर्णानामनुकीर्त्तनं यत्तुपयोव्रतंब्राह्मणस्येतिवर्णत्रयमनुकीर्त्य
मस्तुशूद्रस्येतिकीर्तनंतत् मस्तुशूद्रस्यानधिकारिणोमस्यमुचितंनतुब्राह्मणादेरितितन्निंदयापयआदि
स्तुतिः॥ त्रयाणां॥ ॥अग्निविधयोरिवद्रव्यस्यापिप्रतिग्रहादिपुरुषार्थोपायविधिबलादेवलब्धतयाक्रतुवि
धिभिरनाक्षेपात्सरप्रयुक्तसिद्धद्रव्यवतएवाधिकारोनत्वसिद्धद्रव्यस्यतदर्जयित्वेतिप्राप्तेप्रतिग्रहाद्युपा
यविधेरभ्यनुज्ञाविधिमात्रत्वस्यस्यापितत्वात् द्रव्यस्यस्वतंत्रविधिप्रयुक्तत्वाभावेनजीवनादिकार्येणेवक्रतु
नापितदाक्षेपोपपत्तेःप्रतिग्रहादेरपिसंयोगपृथक्त्वन्यायेनक्रत्वर्थत्वस्यस्यापितत्वात्प्रयाजादिवक्रतु
नापितदाक्षेपोपपत्तेश्चाद्रव्योपिद्रव्यमर्जयित्वाधिक्रियतएव॥ ॥अंगहीन॥ ॥एवंवक्षुराद्यं
गहीनोपिआज्यावेक्षणादिमतिकर्मणिप्रतिसमाधायवक्षुराद्यंगमधिक्रियते अप्रतिसमाधेयांगवैकल्येतु
काम्येनाधिक्रियतेनित्येतुयथाशक्तिन्यायादधिक्रियतएव यत्तुपार्थसारथिनाआहिताग्निश्चेन्नित्येधिक्री

कृ.प्र.१

॥२९॥

यतइत्युक्तंतदाधानस्यापिनित्यत्वेनोपेक्षितं॥ ॥अन्यार्षेयस्य॥ ॥दर्शपूर्णमासयोरार्षेयंवृणीत
एकंवृणीतेद्वौवृणीते। त्रीन्वृणीतेनचतुरोवृणीतेनपंचातिवृणीतइतिश्रुतः तत्रतावदेकंविधायकंअन्ये
नुवादाइत्युविवादंअन्यथासर्वेषांविधित्वेवाक्यभेदविकल्पयोरापतेः। अतस्त्रीन्वृणीतइत्येवविधिः एकं
वृणीतद्वौवृणीतइत्यवयुत्यानुवादस्त्रित्वस्तुत्यर्थः। नचतुरोवृणीतइत्याद्यनुवादस्तुत्यर्थएव अतस्त्र्यार्षेयस्य
संचार्षेयोपित्रीनेववृणुवयुत्यकद्व्यार्षेययोस्तुनास्मिन्पक्षेधिकारोपितुअयहैकेमनुवदित्येवैकार्षेयंसार्ववर्णिकं
प्रतिदिशंतीतिवचनांतरविहितमनुवत्सहाश्रयणएव तदेतन्मगवतोजैमिनेमतंकृष्णंतरैरप्युपगतं तथाच
कात्यायनः। अमुवदितिपरस्तादर्वांचित्रीणीतिआपस्तंबोपित्रीन्यथर्षिमंत्रकृतोवृणीतइति तेस्तुपक्षां
तराण्युक्तानियावंतोवामंत्रकृतइतिकात्यायनः अपिवैकंद्वौत्रीन्पंचवृणीतेनचतुरोवृणीतेनपंचातिवृणीत
इत्यायस्तंबः। यावंतःस्युःपरंपरंप्रथममित्याश्वलायनोपि तेषांचायमभिप्रायः। आर्षेयंवृणीतइत्ययंविधिरित
रेनुवादास्तत्स्तुत्यर्थाः। अतश्चत्रीन्वृणीतइत्ययनुवादएवइदृशोयंवरणसामान्यविधिर्यत्तदार्षेयंप्रतितत्तत्संख्याकृवर

णंमाप्य इतिस्तृतिः॥ इतरथाभवन्मतेपिसामान्यवाक्येनैववरणविधिमभ्युपगम्याथैकवाक्यताला भासंचार्षेयस्यैवाधि
कारापत्तेस्त्रयाणामप्येतेषामवयुत्यानुवादत्वापत्तिः॥ नयैवचतुःषडादीनामपिवरणप्रसक्तौतन्निषेधेनवाक्यभेदापत्तिः।
एकद्वित्रिपंचार्षेयाणामेवप्रवराध्यायेसमाम्नानेनचतुःषडादेरप्रसक्तेः॥ अतोस्मिन्नपिपक्षेवाक्यभेदाघनाप
त्तेरेकद्व्यार्षेययोरधिकारःपंचार्षेयस्यचपंचानांवरणंनविरुद्धंइति। यत्तुद्व्यामुष्यायणानामुभयतःकुलद्वयेपि
वरणविधानादस्तिचतुःषडादीनांप्राप्तिरितितन्नआश्वलायनेनद्व्यामुष्यायणाननुक्रम्यतेषामुभयतःप्रवरणी
तेएकमितरतोद्वावितरतःद्वावेकतरःस्त्रीनितरतइति आवश्यकस्त्र्यंतरमूलकेनैवतन्निषेधात् अतोभार्ग
वचावनेत्यादिविशेषरूपेणवरणपक्षेपिमनुवेत्सस्वदेवएकद्व्यार्षेययोरस्त्यधिकारइतिकृष्यंतरमतंवो
ध्यं॥ ॥वचनात्॥ ॥त्रयाणांवर्णानामाधानंविधायवर्षासुरथकारआदधीतेतिश्रुतं तत्रविधा

हृ.भ.४

॥२०॥

क्षेपशक्तिकस्यनेगौरवापत्तेर्ब्राह्मणादीनामेवरथंकरणेनिमित्तेआधानोद्देशेनवर्षाविधिरितिप्राप्तेर
थकारशब्दस्यप्रसिद्धिवलेनसौधन्वनापरपर्यायेजातिविशेषेरूढत्वात्तस्यै॥श्रीरामजी४॥

वायंकालविशिष्टाधानविधिः॥नचतत्रापियोगेनैवोपपत्तौरूढिकल्पनायांप्रमा
णाभावः॥रथमकुर्वत्स्वपिसौधन्वनेप्रयोगेणलब्धाधानःनवप्रोक्ष्णणोशब्दवयोग्यता
मात्रेणतदुपपत्तिः॥योग्योब्राह्मणादावप्रयोगेणरूढिकल्पनाया आवश्यकत्वात् र
थकरथकरणयोग्यतावच्छेदकमनुष्यत्वस्यकादाचित्कत्वानावेननिमित्तत्वानुप
पत्तेःरथकारपदवैय्यर्थ्यप्रसंगाच्च॥अतःप्रसिद्धिवलात्सौधन्वनएवरथकारः॥सु
धन्वाचव्रात्यात्तुजायतेवैश्यात्सुधन्वाचार्यएवचेत्यादिनोक्तःस्यैवर्णिकात्किंचि
न्यूनोवेदानधिकृतोजातिविशेषः॥ननुरथकारःयद्यपिवरथकारथकारपदंमाहिष्ये
णकरण्यांतुरथकारप्रजायते॥माहिष्योगौप्रजायेतेविट्स्त्र्यांशूद्रानयोर्नृपात्॥श्व
श्र्यांकरणोवैश्यादित्यनेनोक्तेपिरूढंतथापिश्रमणंत्वादेशानात्रतेपतेनादधाम।

तिरथकारस्याद्ध्यादिति बाव चिके मंत्रे ऋतुशब्दप्रयोगात्तस्य च सौधन्वना ऋभव इतिमं
त्रातरे सामानाधिकरण्यनिर्देशात्सौधन्वन एवात्र रथकारपदेनाभिधीयते॰ अतेश्ववत
स्याविद्दत्वादिघास्येपतां वन्मात्रविषयमंगीकृत्याधिकर्तृकालाभयविशिष्टमाधानांत
रमेव विधीयते॰ सर्वाधानेषु प्रकरणात्साधारण्येनैव धर्मविधानं॰ अघयिच विघातावा
दस्योत्तरकृतुष्वनधिकारस्तथाप्याधानमात्रमरणिभाव्यलौकिकाग्निगुणकं कस्यस्व
र्गफलकं सधर्मकमनुष्ठेयं एवं चाहवनीयादेरनुपयोगादभावेन तद्दशेन विहितानां तत
गार्हपत्यमाधातीत्यादीनां धर्माणां लोपेपि एकस्मिन्नेव कुंडे स्थंडिले वाग्निधुवात्स्वगन्यधा
नं इत्तरागयुक्तं कार्यमिति तंत्ररत्नाभिप्रायः। मनतु प्रलिनास्याधानस्यार्थकर्मत्वं प्रमा॥
णनाभावात्॰ अग्निमिनिहितीयां नपरे लक्षणदेरावश्यकत्वे रथकारपदे योगांगीकार

११

स्यैवान्याय्यत्वाच्च॰ अपितु आपितु आहवनीयाधत्यादकत्वमेव॰ नवतेषामनुपयोगः।छ
विहृतयात्रत्वाधिकाराभावेन तत्रानुपयोगेपि आहिताग्निमिर्दहंति यज्ञपात्रैश्चेति वचनवि
हिते दाहे उपयोगसंभवात्॰ नस्थपत्यदाहः कर्मोपयुक्ताहिताग्निशरीरप्रतिपत्त्यर्थोपेन कर्माभावे
नाभावः शक्येन तथात्वे आहिताग्निपदेनाधानस्यैवोपस्थितेस्मरणात्वस्यै तायतौकत्वं गत्वाना
पतेः। नवेष्टापतिः। तथात्वे प्रतिपत्तिविना आधानाफलाहवनीयादेरनिष्पेस्यापत्तेः। अतः फल
श्रवणं वर्थकमेवेरमिति युक्तस्तत्राहवनियादेरुपयोगः। पवमानेष्टपं गम्हतपात्रासत्त्वाच्चय
त्पात्रसमुच्चये विनष्टतिः। अतएव पवमानेष्टि अनन्तरप्राक्कृतुष्योमरणेग्निभिः पात्रै
श्चदाहः पवमानेष्टिभिः प्राक्मरणे तु केवलाग्निभिः रेवदाहः॥ ॥स्थपति॥ ॥रौद्रं वास्तु
मध्ये वरुद्रनिर्वपदिति प्रकृम्यैतया निषादस्थपतियाजमेदिति श्रुतं तत्रायघपि निषादंस्थपति

र्थस्येति बहुव्रीहौ पदद्वयोरन्यपदार्थलक्षणेति तस्मिन्नाश्रीयते तथा निषादानां स्थपतिरि-
ति षष्ठीतत्पुरुषे तद्भाववद्विधा सैव कल्पना भिद्या कर्मधारयानंगीकारेण स एवाश्रीय-
ते। न च तत्राधिपदर्थपदे निषादसंबंधिलक्षणाप्रमाणाभावात् यद्यपि हि कर्मावय-
वार्थयोगे नैवोपपत्तौ न समासे विशिष्टार्थशक्तिकल्पनाप्रामाणिकतया। धिक कर्मधा-
रये अभेदस्यैव षष्ठीतत्पुरुषादावपि स्वस्वामिभावादिभेदसंबंधस्य संसर्गविधयैव
भानोपपत्तेर्लक्षणाया अनुपपत्त्यभावः। न च नैयायिकवदस्माकं नामार्थयोरभेदान्व-
यस्वेत्यत्र प्रमाणमस्ति राजा पुरुषोस्तीत्यादौ सर्वधनामार्थस्य विभक्त्यर्थेन तस्य चाख्या-
तार्थेन्वयांगीकारेण परस्य राज्ञ्व यस्य समासानिरिक्ते क्वाप्यसत्त्वात् अतः स-
मास एव प्रसक्तस्य तस्य संसर्गविधयैव भानोपपत्तेर्न यत्न हेतो लोति प्रादेः समानाधि-

१२

करणपदस्थले राजा पुरुषोस्तीत्यादौ क्रियान्वयोत्तरं पार्ष्टिकान्वयस्याभेदसंबंधेनैवा-
नुभवात् अतः पुरुषोस्तीत्यादौ व्यधिकरणपदस्थलेन च भेदसंबंधेनैवानुभवात् लाघवेन ना-
मद्वयोऽन्यतरस्यान्वयबोधस्याभेदविशेष्यकत्वमेव नियमकल्पना स्वस्वामिभावा-
दि संबंधस्य षष्ठीतत्पुरुषादौ संसर्गविधया भानानुपपत्तेर्वस्य परपदे स्वार्थसंबंधि-
लक्षणांगीकृत्य तस्योत्तरपदार्थे अभेदेनान्वय इत्यंगीकार्यं। अत एव नामद्वयोऽन्य-
तरनामार्थविशेष्यकनामार्थप्रकारकाभेदसंसर्गकबोधत्वावच्छिन्नं प्रति एकाभिक-
रणत्वविभक्तिविपरिकार्थतावच्छेदकक नामद्वयसमभिव्याहारस्य हेतुः भिन्ननामद्वय-
समभिव्याहारस्य च तात्पर्यं तत्त्वमित्यपि बोध्यं। तेन धवखदिरौ नीलघटौ वेत्यादौ नाभेद-
बोध इत्यपि बोध्यं न चैव समासे संबंधिनो अभेदेनान्वयादिर्महेव राज्ञः पुरुष इत्यत्रवे

ष्यर्थसंबंधस्य भेदबोधनान्वयाद्धनिवाक्यभेदो भिन्नार्थत्वाय चेरेकविधानेनेतरविधिस्यना
पत्तौ विनापासस्त्रवैयर्थ्यापत्तिरिति वाच्यं । एकतरबोधेनेतरबोधस्यावश्यकत्वेनार्थैक्या
भिप्रायात् । अत एव षष्ठीतत्पुरुषे लक्षणापत्तेर्निवारणाय स्वासोऽस्य यस्मिन्देश इति कर्मधारय एवा
यं । तेन नाधिकृतियेयेविधानासिद्ध्या नाहिताग्नेरपि निषादस्येवाधिकारः । अत एव कूटरासिला
ख्यं हितन्निषादानामिति लिंगमपि संगच्छते । तत्र चूर्णरप्युक्तो पक्षो विस्तारादेवनाव्यापना
से येपि यच्च वचनेरूप्यं स्यास्मद्भ्र संस्कारान्न । तत्र लौकिकाग्निप्रतिष्ठायां येदिति स्मृतिवच
नेनाग्न्यंतराभावे सोम मात्रोद्देशेन लौकिकाग्निविधानात्तमेवतत्तमेवतद्देशस्यापि पित्वां
तस्मिन्निष्टिः कर्तव्येति बोध्यं ॥ ॥इति खंडदेवकृतौ षष्ठस्य प्रथमः॥ ॥पुरुषार्थेकः॥
अधिकाधमासत्रमासारन्तिस्यदावनेककर्तृकसंख्येयप्रयोगारेकंफलं सर्वैः कर्तृभिरवय

२३

वशोभुज्यते उत कृत्स्नमिति विचारे स्य यपि सर्वैर्यांप्रत्येकं कर्तृत्वं यदिवादेपत्नोरिवयासक्त
ऽभयया पिएकसत्रप्रयोगादनेकफलनिष्पत्तौ दर्शादावपि एकस्मादेव प्रयोगात्फलयग्र
मे लब्ध अनंतस्वर्गोत्पत्त्यापत्तेरेकप्रयोगादेकफलोत्पत्ति नियमस्यावश्यवाच्यत्वादेकमे
व फलं सर्वैरवयवशो भुज्यते इति प्राप्ते नतावदेकस्य फलावयविनो मुख्या अवयवाः संभ
वंति सुखादिरूपस्य तस्यावयवासंभवात् । सत्त्वेन्यतावच्छेदकमाहित्वादेः तावत्पुरुषनिष्ठत्व
हि पुमासज्यवृत्तित्वमात्रं परं वाच्यं । न च तत्र प्रमाणमस्ति । अत एव अधिकामादिशब्दानां तावत्फ
लमात्रप्रतिपादनपरत्वात् । अधिकामकर्तृनिष्ठफलभोगप्रतिपादके कल्याधिकारविधाव
पि अधिकामानांपाव्यासज्यवृत्तित्वस्य बाधितत्वेन व्यासज्यवृत्तिकामनात्वरूपातिरिक्तधर्मी
कारे प्रमाणाभावाच्च प्रत्येकमेव अधिकामत्वावसायात्प्रत्येकमेव फलावगतिः । न हि तत्र बहुव

चनांतरअधिकारमपदेन बहुत्वावच्छिन्नानां अधिकारमत्वं प्रतिपाद्यते येन व्यासज्यवृत्तित्वावगतिर्भ
वेत् अपितु अधिकारमत्वावच्छिन्नानां बहुत्वं परं नित्यादिवत् न च कर्तृत्वस्य व्यासक्तत्वात् फल
त्वस्यापरत्वस्य व्यासक्तत्वं फलादैककर्तृत्वसामानाधिकरण्यस्य प्रत्येकवृत्तित्वेप्युपपन्न
त्वेनैतादृशनियमे मानाभावात् अतएव रं पश्योर्व्यासज्यवृत्तिकर्तृत्वसामानाधिकरण्यस्यन्न
मेवजन्यत्वेनावच्छेदकधर्मपर्याप्ताधिकरणं वाच्यं प्रधानेतु बहुवचनप्रवणेन कर्तृत्वभेदस्यैवा
वगतेन फलत्वादेर्व्यासज्यवृत्तित्वकल्पनावसरः। न चैकप्रयोगाद्वनेकफलानुत्पत्तिः। समवा
यसंबंधेनैकफलत्वावच्छिन्नंप्रति बंधकत्वकल्पनाश्लांतरेतदुत्पत्तौ वाधकाभावात् न चैव
मपिप्रत्येकवृत्तित्वापेक्षया फलत्वादेर्व्यासज्यवृत्तित्वकल्पने गौरवादेरभावान्नियामकाभाव
जन्यतावच्छेदकअधिकत्वादेर्व्यासज्यवृत्तित्वकल्पनेतत्पर्याप्त्यधिकरणतवच्छेदकस्यसमपाविच्छे

१४

र्तनिरूपितजन्यफलकूटत्वादेः कल्पनीयत्वेन गौरवापत्तेः। तद्वरं सत्र जन्यफलत्वादेरेव तत्त्वकल्प्या
नायां लाघवात् प्रत्येकमेव फलं प्रयोजनं संकल्प्येतादृशानुसंधानं॥ ॥प्रयोगे॥ ॥स्वर्गकामोय
जेतेत्याद्येकवचनश्रवणोपस्थितेनाव—देकत्वमविवक्षितं स्वर्गकामपदस्य स्वर्गमात्रपरत्वात् अ
धिकारिपरत्वेपि वा तस्योद्देश्यत्वेन तद्विशेषणस्याविवक्षितत्वादिति अतएव तत्सामानाधि
करण्याद्दाख्यातेपि तदविवक्षितं किंचाख्यातस्य प्राप्तिमात्रमर्थः। ततश्च यागेन स्वर्गं पुरुषप्रा
प्नुयादित्यर्थः। तेन तत्राद्यपि तस्योद्देश्यत्वात् तद्विशेषणाविवक्षा अस्त्र वा कर्तानिनाविवरणालिङः प्र
वर्तनाभिधायित्वाच्च तस्य प्रवृत्तिरेवार्थः तत्राथापि फलोद्देश्यकाया तस्या लोकत एव प्राप्तत्वात् त्र्यागं
मात्रविधानेन तस्यानुवाद्यत्वात् तद्विशेषणस्य तत्कर्तृविशेषणस्य वैकत्वस्याविवक्षेतिलोकोद्धेन हवेत्या
कर्तारइति एवं पक्षः इतः स्वं फलोद्देश्यकस्या विजातीयपुरुषप्रयत्नस्यापा प्राप्तत्वेन विधेयत्वनतनन

त्रस्याधितत्वात्तद्विशेषणस्य कर्तृैकत्वस्य विवक्षोपपत्तेः स्वर्गकामपदे तद्विवक्षायामपि तत्सामानाधिकर
ण्येवाधकाभावात् द्वयेस्यान्यथा पूर्वपक्षारम्भाते आख्यातोपात्तस्यैकत्वस्य विवक्षायामपि अनेके
षां कर्तृत्वं तद्विकर्तृत्वे न्वेति न तु तदाश्रयो अन्यथा द्वंद्वस्यो व्यासज्यवृत्तिकर्तृत्वानुपपत्तेः । अत एव त
दाश्रयाणामनेकत्वस्य पत्नीराद्रायावश्यकत्वे पुरुषान्तरापत्तेः करणे बाधकाभावात् अनेकेषामधिकर्तृ
त्वानुमित्यश्चेसति विशेषणाद्रकप्रमाणे तदाश्रयस्यापि प्रथमातिक्रमे कारणभावादेकस्यैव प्रतीतिरा
नुभविकी । अत एव संध्यावंदनश्राद्धादावेकस्यैवाधिकारः ॥ तत्र धर्मैवेत्स्यादिवाक्यस्य प्रमाणांतरसिद्ध
त्यधिकारक कर्मसात्र विषयत्वे पत्न्या अपि — तद्वेणप्रमाणाभावे पुरुषांतरस्याप्रसक्तेः । यत्र तु
पत्नीग्राहकप्रमाणसद्भाव — स्तत्र सस्पत्नीकस्य कर्तृत्वाधिष्ठानत्वे पुरुषस्यैकस्यैवेतत् प्रथमाति
क्रमे कारणाभावात् स्वर्गकामो यजेत यजमानः धेश्मश्रूणि वपते मेखलया यजमानमित्यादौ वि

२५

नाकारणं सुवुपात्तैकत्वस्य पाक्षिकानुपपत्तेश्च । अतः पुरुष एवाधिकारी ॥ ॥ प्रक्रमात्तु ॥ ॥ काम्यक
र्मकामनायां प्रक्रांतं वा तत्रां फलेच्छयां अवान्तरे वा फलेप्रयोजकाभावान्न समापनीयमिति प्राप्ते स
संनास्ति फलरूपं प्रयोजकं तस्येच्छाविषयत्वेन प्रयोजकत्वात् तथापि प्रारंभ एव प्रयोगसमाप्तौ निमित्तं न
चतत्र प्रमाणाभावः । शिष्टविगर्हणस्यैव प्रमाणत्वात् शिष्टा हि प्रारब्धापरिसमापने प्राक्रमिति विगर्हंते तेन
शिष्टाचारमूलश्रुत्या प्रारंभे निमित्ते प्रयोगसमाप्तेर्नैमित्तिकत्वेन विधानात्तस्यावश्यकत्वं न च वस्तुतः
शास्त्रेण कामनाया एव प्रयोजकत्वावगमात् आरब्धारस्यास्य भ्रांतिमूलकत्वमिति वाच्यं सर्वेषां वं शिष्टानां भ्रां
तिकल्पने प्रमाणाभावात् देवतान्योवा एषा आलभ्यस्व ते यो सत्यस्य इत्युक्ता न यजते सत्रे धात्वर्थो येन
यनेति प्रत्यक्षश्रुत्यैवाकरणे निंदाप्रायश्चित्तयोर्विधानात्प्रारंभे निमित्ते प्रयोगसमाप्तेरावश्यकत्वावग
मात् । अतः प्रयोजकांतराभावे पि निमित्तवशात्समापनीय एव समापिते च तस्मिन्कारणसत्वात् फलमपि भव

स्येव। एकफलत्वप्रामाण्यविफलान्तरोपपत्तेः। न च कामनारूपांगाभावादेतु एव शंका। तस्याः प्रवृत्तिमात्रवच्छिन्नत्वं प्रति कारण
त्वमात्रत्वेनांगत्वे प्रमाणाभावात्। प्रवृत्तिपर्यवसाने तस्याः सत्त्वाच्च। अन्यथा समापनोत्तरमिच्छापगमेपि फलानुत्पत्तिप्रसंगात्।
॥लोके॥ लौकिकस्य तु गृहरथकर्मादेः शास्त्रीयासमापने च शिष्टविगर्हणाभावात्प्रयोजकाभावेनासमापनं। न च तस्याप्रशि
ष्टकृतिमत्त्वाख्यात्वं। तस्य अर्थसुखादिवदावश्यकमिति मालोकमत्त्वकत्वेन श्रुतिमत्त्वकत्वाभावात्। यत्तु गृहस्थकरणप्रा
प्तं पुरुषार्थत्वमिति किं वा सत्त्व। शास्त्रादिवं आरेनगेहं काहुर्वद्र्व्यः पापसंप्राप्तणे भोजयितव्य इत्यादिवत्तस्य शास्त्रीयत्वादिष्ट
मेव समापनं॥ ॥प्रतिषेधेषु॥ ॥नकत्वं जं नस्य ये दिव्यादिषु किं स्वर्गकामस्याधिकारः उत प्रवृत्तमात्रस्येति चिंतायां नञो
निपातत्वेन क्रियान्वयावैमात्याभावाकांक्षायांगाकारे च प्रधानभक्तायास्तस्यार्थवान्यथात्वापत्तेरानर्थक्यपत्तेरंग।
न्यायेन क्रियाविशेषणत्वेनान्वयाव मात्र चापि कल्पितान्वयेसु वंत संबंधेन नञ्समासायत्तेः कल्पितातिरिक्तभक्षणस्य वर
गप्रासत्वेनाविधेयत्वात्याशिशेष्येण धातुसंबंधावगते भक्षणाभावस्य वक्तुं मशक्यत्वेन प्रजापतिव्रतवदेव लक्षितस्य
भक्षणाभावसंकल्पस्य विश्वजिन्न्यायेन स्वर्गार्थत्वेन विधानमिति प्राप्ते तस्य व्रतमित्युपक्रमानुसारात्प्रजापति
व्रतेषु लक्षणांगाकारेपि प्रकृते लक्षणायां प्रमाणाभावात्प्रधानान्वयस्याभ्यर्हितत्वेन नञो भाववाचकस्य प्रतियोगितासं।

२६

६५

सर्गेण भावनायामेव स्वकारक विशिष्टायामन्वयः। न चान्यथात्वापत्तिः। पुरुषेणावनानुत्पत्त्यावपि प्र
त्ययेन तस्याएवबोधनेनान्यथात्वाभावात्। अत एव निषेधस्थले लिङ्र्थं मूलव्यापारस्य न विधिवा
क्यवतः स्वप्रयोज्यत्वसंबंधेन भावनान्वयोपि तु नञस्तात्पर्यग्राहकस्य सत्त्वात्स्वप्रयोज्याभावप्रतियो
गित्वेनेति तस्य निवर्त्तनारूपत्वसिद्धिः स्वप्रयोज्यत्व रूपत्वस्य भावे प्रवृत्तिविषयस्यानिष्टसाधनत्वज्ञा
नं विनानुपपन्नमिति तस्य प्रत्यवायजनकत्वं कल्प्यते। तेन पुरुषमात्रस्यैव रागतः प्रवृत्त्युन्मुखस्य
निषेधेष्वधिकारः। अत एव प्रत्यवायसाधनीभूतस्यानुष्ठेयस्य भक्षणस्य रागत एव प्राप्तत्वात्तदनु
ष्ठाने सति प्रत्यवायोत्पत्त्युपपत्तेर्नैतद्दर्शितन्निषेधोप्यध्ययनविधिसिद्धत्वानापेक्षापि। यत्तत्र
निवर्त्तनाप्रकारकथनं प्रकारांतरेण तंत्ररत्ने कृतं तदर्थवादाधिकरणे कौस्तुभे एव निरस्तं स्वाकु
रातिरेव विस्तरेणोपपादिता॥ तस्मिन्॥ श्रौतेषु स्मृत्युक्तेषु च निषेधेषु तथा स्मार्त्तेष्विवानग्निसाध्ये

पुत्रमंत्रसाध्येषु विधिषु उपनयनात्पूर्वमपि ज्ञातस्याधिकारः॥ स्मार्त्तविधानुपनयनादिनियमप्र
माणाभावात्। उपनयनस्य वेदमात्राध्ययनांगत्वात्। निषेधेषु तु जातमात्रस्याधिकारो ब्राह्मणो
न सुरां पिबेदिति वत्। परप्रेरणादिजन्यायां अपि न सेणादि भावनाया निषेधात्। तत्र च स्मृत्याध्य
यनस्यानुपयोगादिति प्राप्ते स्मृत्यध्ययनस्यापि ब्राह्मणेन षडंगो वेदोध्येयो ज्ञेयश्चेत्यादिस्मृत्या
उपनयनांगकत्वविधानात् स्मार्त्तविधानामपि उपनीताधिकारकत्वं। निषेधेषु तु प्रागुपनयनात्का
मचारकामवादकामभक्षा इति स्मृत्यैवाभ्यनुज्ञानादुपनयनोत्तरकालत्वं। अतएव वर्णपुरस्का
रेणाम्नातानां सुरापानादिनिषेधानां जातमात्राधिकारकत्वमेव स्मृतिसिद्धं। येषां तु शूद्राणामुप
नयनाभावः। तेषां विवाहविधितस्यतस्यानत्वेन विवाहविधानात्॥ अन्यास॥ जीवनादिनि
मित्तकाग्निहोत्रादौ निमित्तस्य प्रतिक्षणं भेदात्प्रतिनिमित्तं नैमित्तिकावृत्त्यासंततानुष्ठानप्रतीतेस्त

दनुरोधेन वाङ्गाक्यांगस्यागस्यपलक्ष्यमाणत्वात्कालस्यापि वांगत्वेन तस्यागोपपत्तेः काम्यविषयत्वेन तस्य
सार्थक्याच्च। सा तस्यानुष्ठानं। अतएव सोमेवसंतस्य निमित्तत्वात्तत्रैकैकस्मिन्सकृत्करणप्रतीतेः का
लानुग्रहेपि तत्प्रतिरिति प्राप्ते स्वाहारविहाराद्यनुरोधेन निमित्तस्य केनेरवश्यं संकोचनीयत्वादग्निवि
धाभ्यामिव कालेनापि संकोच्यते। नहि कालस्यांगत्वेपि यथाशक्त्युपबंधविषयत्वं यस्यैव हि प्रयोगवि
धिप्रयोज्यत्वेन शास्त्रावनुष्ठानप्रसक्तिस्तस्यैवाशक्तौ निमित्तस्य नुरोधेन त्यागः॥ ततश्चैव यत्रैवाग्नि
विधयोर्विध्यंतरप्रयुक्त्युपजीवकत्वेन प्रयोगविध्यप्रयोज्यत्वान्न तत्। तथा कालस्यापि स्वरूपेणा
ननुष्ठेयस्याप्रयोज्यत्वाद्यथाशक्त्युपबंधविषयत्वानुपपत्तेः कालविधिनापि निमित्तश्रुतिसंकोचान्न
सातत्येनानुष्ठानं। अतएवयोर्दर्शपूर्णमासयाजी सन्नमावास्यां पौर्णमासीं वातिपातयेदिति काले
नैमित्तिकातिक्रमएव प्रायश्चित्तं॥ तेषां॥ कालत्रयरूपेण निमित्तत्रयस्यस्य संकोचेपि यदा कालावच्छि

न्तस्यनिमित्तस्यपुनःसन्निपातस्तत्रनैमित्तिकावृत्तिः॥इतरथास्वोस्यंत्तोत्रवत्स्यानुष्ठायकत्वरूपनिमि
त्तत्वानुपपत्तेः॥अतएवयत्रतस्मिन्नेवनिमित्तेकालमात्रस्यावृत्तिस्तत्रननैमित्तिकावृत्तिः॥यथाएक
स्मिन्नेववसंतेपर्वावृत्तौ॥अत्रपूर्वपक्षस्यातितुच्छत्वासुहृत्भूतत्वोपदेशइतिमंतव्यं॥तथांतः॥
पुरुषार्थंनैमित्तिकवदेवक्रत्वर्थनैमित्तिकस्यापिभेदनहोमादेरेकस्मिन्प्रयोगेभेदेना नेकत्वेयदिता
वद्धोमास्पूर्वंतदनेकतातदात्रग्रह्यमाणविशेषत्वादस्वप्रतिग्रहेष्टिवत्सत्तावच्छेदाभावात्तंत्रेणैव
होमककरणेपिहोमोत्तरंतदनेकत्वेनैमित्तिकावृत्तिःस्यादेवः॥नचतंत्रक्रतुजन्यापूर्वोत्पत्तेःपूर्वंहोम
जन्यादृष्टस्यसत्त्वात्तेनैवप्रसंगपिध्यानुपांकानयात्वेनिमित्तेसतिनैमित्तिकाकरणेनिमित्तत्वव्याघा
तातः॥अतएवनिमित्ताभावेहोमाभावेपिक्रतूपकारसिद्धिस्तत्सत्वेतदनुष्ठानेनतदावृत्तौवावृत्तेने
त्यपिबोध्यं॥आचाराः॥आचारप्रमाणकेषुगुरुगमनादौशिष्यानुगमनादिषुत्र्यावृत्तस्यैवाचार

१९

स्यदर्शनात्तन्मूलभूतश्रुतौगुरुगमनादेर्निमित्तत्वकल्पनावगतेःप्रतिनिमित्तमावृत्तिः॥नचाचरि
तणामावृत्तेर्दृष्टंविधेयागुरुप्रीत्यर्थत्वेनाप्युपपत्तेर्निमित्तत्वेप्रमाणाभावः॥गुरुप्रीतिरूपापांतरे
णापिसिद्धेरधीतविधिनाप्यनुष्ठानान्नियतानुष्ठानवलेननैमित्तिकत्वप्रतीतेः॥यत्तुतंत्ररत्नेशास्त्रे
णैवसप्तम्यांशात्प्रत्ययादिनानिमित्तत्वावगतिर्गुरुगमनादेरित्युक्तंतत्तुश्रुतिस्मृतिरूपशास्त्रस्यसत्वे
सूत्रकारोक्तस्याचारप्रमाणकत्वस्यानुपपत्तेरुपेक्षितं॥ आलभ्यस्य॥सोमस्यवसंतेवसंतेज्योतिषा
यजेतेतिवचनादेवनित्यत्वेनचायंकालवधिः॥वसंतेज्योतिषायजेतेतिवीप्सारहितवाक्येनैवतद्वि
धानात्॥नचविनिगमनाविरहः॥गुणभूतकालानुरोधेनप्रधानावृत्तेरप्राप्ततयावीप्सार्थस्यापि
विधेयत्वेवाक्यभेदापत्तेःप्रतिनिमित्तंनैमित्तिकावृत्तिन्यायप्राप्तवीप्सार्थानुवादत्वलाभाद्वाक्यस्या
पारवसमत्वानिमित्तपरत्वावसायात्॥अग्निहोत्रादीनांतुनित्यत्वंस्थितमेवएवंविधायाअपिश्रुध

यनसहितायास्थाणुरयंभारहारःकिलायमधीत्यवेदंनविजानातियोर्थमित्यनधीयानाचाद्याभवंती
त्यादिनिंदोक्तानांकरणेप्रत्यवायवलेननित्यत्वंएवंतुपनयनस्यापिषोडशादिवर्षोत्तरमकरणेप्र
त्यवायश्रवणादेवनित्यत्वंयत्तुपष्ठेःआघकामस्योपनयीतेत्यादिफलश्रवणात्तदुपनयनाप्रितष
ष्टादिकालस्येतिज्ञेयंःयत्तुतंत्ररत्नेक्रतूनामावश्यकत्वात्तदपेक्षितविद्यादेरप्यावश्यकत्वेफल
तोनित्यत्वमुक्तंतच्चक्रतूनांविद्याप्रयोजकत्वस्यनिरस्तत्वात्तदितरएवावश्यकत्वकरणेप्रत्यवा
यावगतेर्विद्यादेरकरणेक्रतूनामनधिकारादेवानावश्यकत्वात्तदपेक्षितंएवंब्रह्मज्ञोसाररमपि अनु
त्याघसुतासोहास्मासमिछंन्त्वअस्यधइत्यविरक्तस्यप्रत्यवायश्रवणान्नित्यं। अतएवजायमानो
वैब्राह्मणस्त्रिभिर्ऋणवाजायतेयज्ञेन देवेभ्यःप्रजयापितृभ्योब्रह्मचर्येणऋषिभ्यइत्यपिसंगच्छ
तेःनचात्रब्राह्मणपदश्रवणात्तस्यैवेतिनित्याइतरयोस्त्वनावश्यकताइतिशंक्यं अस्यावदानविधे

१०

शेषत्वेनार्थवादस्यविधायकत्वाभावेनअत्रत्यब्राह्मणपदस्योपलक्षणत्वात्ः। इतिखंडदेवकृतौभाट्ट
दीपिकायांषष्ठस्यद्वितीयः।।सर्वशक्तौ।।नित्यनैमित्तिकानांकर्मणांकाम्यवत्सर्वांगोपसंहारेणैवप्र
योगःएकादशोसर्वेषामंगानांसाहित्येनक्रतूपकारजनकत्वस्यस्थापयिष्यमाणत्वात्।तिर्यग
धिकरणेयथाविनियोगंअधिकारंकल्पनस्यस्थितत्वाच्चःनचैवंनित्येपितथाकल्पनेसर्वांगोपसं
हारासामर्थ्येसतिअनुष्ठानानापत्तिर्निमित्तत्वव्याघातः।अवश्यानुष्ठापकत्वरूपस्यनिमित्तत्वस्य
कालाग्निविद्यादिनिरवच्छेदत्वच्छत्त्यापवच्छेदापत्तेः।अतएवयथैवकालाद्यवच्छिन्नजीवनादेरेव
निमित्तत्वात्कालादेर्निमित्ताभावादेवनैमित्तिकाकरणेनप्रत्यवायस्तथाशक्त्यभावेपातिवोध्यं
नचकदापिसर्वांगोपसंहारासामर्थ्येःकाम्येपितदापत्तेः नचासकृदेवसर्वांगकरणसामर्थ्यमिति
नियमेप्रमाणमस्तियेननवीभावाद्यनुवादानुपपत्तिराशंक्येतः काम्यस्याप्याहत्यनुपपत्तेः।।किंचनिमि

तस्यानुष्ठापकतया कालदेशादिवत्प्रयोगान्वयित्वाद्यथैवाङ्गत्वं न तथैतन्न चरं तीत्याद्यावपांदेशत्वादं
गप्रधानान्वयित्वं तथा निमित्तस्यापि। अतश्च न केषु प्रधानेषु यथाशक्त्युपबंधस्तद्वत्करणस्य प्रत्य
वायजनकत्वबोधनादेवमङ्गानामपीति न तेषु यथाशक्त्युपबंधः॥ अत एव तद्देवततृतीयानिर्दे
शोपि संगच्छते। प्रयोगान्वयितया च निमित्तश्रुतेरङ्गविनियोगोत्तरकालीनत्वाछ्रुत्यवच्छेदकल्पनापि
न दोष इति। एवं सत्यपि यदि निमित्तस्य प्राधान्यं स्यात्तदा तदनुरोधेनाङ्गेष्वपि शक्त्यवच्छेदः कल्प्येत
न त्वेतदस्तीति प्राधान्येन निमित्तस्यानुष्ठापकत्वं। अपि तु विधिबोधितस्यैवानुष्ठानस्यावश्यकता
बोधकत्वमात्रं। तद्बोधस्य च फलं नैमित्तिकाकरणस्य प्रत्यवायजनकत्वबोधः। अन्यथा वेतनप्रवृ
त्तेरावश्यकतानुपपत्तेः॥ एवं चोक्तावश्यकत्वमेव सम्पादितं नावबोध्यमानं नैमित्तिकान्वयि सुधायां
भुंजीतेत्यादौ तथा क्लृप्तत्वात्। अतश्च यथैव काम्ये प्रवर्त्तनाक्षिप्तेष्टसाधनत्वं प्रधानांश एव न तु सां

गे तथैव निमित्ताक्षिप्तप्रत्यवायजनकाकरणप्रतियोगित्वमपि प्रधान एव न तु सांगे। अत एव निमित्त
स्यापि विनियोगविध्यावेवान्वयः॥ अत एव विनियोगोपि प्रवृत्तिजनकीभूतज्ञानविषयीभूतधर्मस्व
रूपजन्यसाधारणावः (?) अत एवाङ्गान्वयोपि प्रधानस्यैतदुत्तरकालीन एव। तस्य प्रधानगतफलवत्त्वज्ञाना
धीनत्वात्। तत्र त्वयं विशेषः। यत्काम्यविध्याक्षिप्तेष्टसाधनत्वज्ञानोत्तरमेवाङ्गविनियोगः नित्ये तु विधि
सहकृतनिमित्ताक्षिप्तप्रत्यवायजनकाकरणप्रतियोगित्वज्ञाने जातेपि नाङ्गान्वयो नपेक्षितत्वात्। अ
पि तु तदेतरं प्रधानकरणकभावनायाङ्गान्वयापेक्षायां पूर्वकृतत्वात्पापक्षयस्य भाव्यत्वेवगते स इति बोध्यं
॥ अत्र हि पापक्षयस्यैव भाव्यत्वं नित्यस्थले धर्मेण पापमपनुदतीत्यादिवाक्येभ्यः प्रतीयते। अत एव
न विश्वजिन्न्यायेन स्वर्गकल्पनं न वा अपुरुषार्थस्यापि यागध्वंसस्यैव भाव्यत्वकल्पनं यागस्यैव वात
तः तृतीयानिर्देशात्। समानपदश्रुतेः करणत्वेनाघपपत्तेश्चान्वव दर्शपूर्णमासादौ क्लृप्तानामेवस्व

गौणानां नित्येपि नावश्यत्वोपपत्तेः धर्मेणेत्यस्यान्यपरत्वं शंक्यं न चात्वे मुमुक्षोः स्वगौणानामनिष्टत्वे
न तदुपयुक्तैरंगाश्रयसाहित्यसाधनानुष्ठापकत्वे अप्रामाण्यापत्त्या यावज्जीवादिवाक्यस्य मुमुक्षुवि
षयतया संकोचापत्तेः॥ पापक्षयस्य तु सर्वाभिलषितत्वान्निमित्तस्यैव प्रयोजकतया तस्या नैमित्ति
काप्रयोजकत्वेपि निमित्तप्रयुक्तनैमित्तिकानुषंगिकत्वे बाधकाभावः॥ न चोद्देश्यानेकत्वेः तत्वेपि द्विकर्म
कत्वाभावेनावाक्यभेदात् अतएव पापक्षयभावकत्वावगमोत्तरमेवांगान्वयात्पूर्वावगतनिमित्ता
न्वयानुरोधेन शक्त्यवच्छेदकत्व्यनंनवोत्पत्तिवाक्यएवांगान्वयस्य वक्ष्यमाणत्वात् तत्र चेष्टसामान्यस्ये
व भाव्यत्वात्तदवगमोत्तरत्वेपि न निमित्तसंबंधावगमोत्तरत्वं मंगान्वयस्यैतिवाच्यं सामान्यगतवि
शेषापेक्षायां अंतरंगत्वेन प्रथमं काम्यया वज्जीवबाक्यैकवाक्यतया विशेषावगमोत्तरमेवांगवाक्यै
कवाक्यतयांगान्वयांगीकारेण तत्रैव शक्त्यवच्छेदोपपत्तेः अतएव कामे निमित्ते च यस्याधिकारिणो

२१

यावंति प्रमाणांतरप्रमितान्यंगानि तस्य तावद्भिः सहितेतरांगैर्यात्देरूपत्कुर्यादिति महावाक्यार्थकल्पना का
म्ये सर्वांगसाहित्यं नित्ये यथाशक्त्यवच्छिन्नमित्यर्थलाभः॥ अतएव येथे वराककस्येव काम्यावाक्यस्य यावज्जी
ववाक्यस्य च सेमयाज्यसोमयाज्निरूपाधिकारिनेदं न प्रधानसाहित्यनैदपि यस्याधिकारिणो यावंति प्र
माणांतरप्रमितानि प्रधानानि तस्य तावतां कामे निमित्ते च विधायकत्वं तथात्वापातिनको पिदोषः॥ अ
तः सिद्धं निमित्तस्य कस्य अनुरोधेन यथाशक्त्यंगहानेनापि प्रयोग इति अतएव विध्यपराधे तदेव यागं कृत्वा
दक्षारेतव्यमिति द्विगुणस्य समाप्तिं विध्यपराधे प्रायश्चित्तं च दर्शयति॥ काम्येषु चैवं॥ काम्ये तु यद्यपि
फलसंबंधोत्तरमेवांगान्वयस्तत्प्रयोगविधिनानुष्ठानावगमोत्तरं प्रवृत्तिकारणत्वेनोपस्थितायाः काम
नाया अधिकारिविशेषणत्वकल्पने शक्त्यवच्छिन्नायाएव तत्कल्पनाद्करणे प्रत्यवायाश्रवणाच्च सर्वा
गोपसंहारसमर्थस्यैवाधिकार इति प्रत्युदाहरणमात्रं॥ क्रियाणां॥ एवं यथाशक्त्युपबंधे निरूपिते तत

धेयत्वेन प्रतिनिधिविचारे कर्त्तव्ये उपोद्घाततया इदं विचार्यते तत्र मूले तावत् द्रव्यस्य क्रियातोत्यंतभे
दाभावात् द्रव्यभेदे कर्मभेदापत्तेर्नीवाराद्युपादाने विहितक्रियासिद्धिरिति पूर्वपक्षे तेऽत्यंतभेदाभावे
पिऽत्यंतताभेदस्याप्यभावात्कर्तृदेशकालादिवद्द्रव्यभेदेपि तदैवेदं वलनं यजनमित्यादिप्रत्यभिज्ञाव
लात्क्रियैक्यप्रतीतिर्निष्प्युपादानेपि न क्षतिः। तत्र च जगतीतलवर्त्त्येकैकं कर्मव्यक्तिरभिव्यक्तिमात्रं तु निय
तेः अथवा शब्दांतरादिप्रमाणैरेव व्यक्तिभेदः। द्रव्यदेशकालकर्तृव्यत्त्यादिभिस्तु तस्या एव व्यक्तेरभि
व्यक्तिभेदमात्रं अथवास्तु तत्रापि व्यक्तिभेदः शब्दांतरादिप्रमाणैरेवाग्नेयत्वादिजातय एवाभिधेयतः इ
ति सिद्धांतितं ततः द्रव्यास्मितत्वेपि क्रियायाः तद्द्वैजात्यस्याशंकितुमशक्यत्वात्तत्त्वैक्यसिद्धं तस्य
चापूर्वापत्त्वापत्तेस्तस्याभिव्यक्तिजन्यत्वे च यजिपदेन तल्लक्षणापत्तेरूपेक्षितं अथ तदेवं विचारो वा
च्यः। सत्यपि शब्दांतरादिप्रमाणैराग्नेयत्वादि वैजात्ये विधेयतावच्छेदकाविजातीययागत्वावच्छि

न्नप्रतिव्रीहित्वादिनैव कारणत्वं वगतेस्तस्यैव तज्जात्यभिव्यंजकत्वावसायान्नीवाराद्युपादानेन तज्जा
त्यवच्छिन्नसिद्धिरिति प्राप्ते सत्यपि तज्जात्यवच्छिन्नं प्रति तत्त्वादिना कारणत्वेन तस्य प्रत्येकं तज्जात्यभि
व्यंजकत्वं व्रीहित्वादिना कर्मांतरेपि कारणत्वेन व्यभिचारात् अपि तु सामग्रीत्वेनैव सामग्रीव शक्तस्य
व्रीहित्वघटिता अशक्तस्य तु तदघटिताः अतश्च व्राद्यभावे नीवाराद्युपादानेपि वैजातीययागत्वापू
र्वत्वफलत्वावच्छिन्नं जायतएव फलं परं नित्य एव तावत्तन्म्येण जायते काम्ये तु आरंभोत्तरमशक्तस्य
शिष्टविगर्हणादोषपरिहारार्थं समापनेपि न फलोत्पत्तिः। सर्वांगोपसंहारेणैव तदुत्पत्तेः। प्रयोगसमा
प्त्यैकरणे दोषमात्रोत्पत्तेः। करणे फलांतराभावान्न पूर्वं सत्तिरिति केचित् नैमित्तिकत्वाविशेषात्तु तत्रा
पि पापक्षयकत्वं नेति तत्रारंभे नित्यत्वपि ध्येयं अकृतिप्रमाणत्वात्। काम्येऽप्यारंभोत्तरं नित्ये ततः पूर्वम
पिऽक्रतद्रव्याद्यंतरं प्रतिनिधेयं न वेति विचारायां अशक्तावगताने न प्रयोगेपि न गप्रहणे प्रमाणाभावः

तथाहि न तावद्द्रव्यादिशास्त्रं तस्य व्रीहित्वाद्यवच्छिन्नविधायकत्वेन नीवाराद्यविधायकत्वात् न हि तेषु व्री
हित्वमस्ति नापि कर्मशास्त्रं तदाक्षेपकं द्रव्यशास्त्रेण द्रव्यांतरसाधारणाक्षेपप्रतिबंधे व्रीह्यादिविधा
नाद्द्रव्यांतराक्षेपानुपपत्तेः ॥ न हि व्रीह्यादिशास्त्रं शब्दतो नियमविधिरपि त्वाक्षेपप्रतिबंधद्वाराफलतः ॥ अ
त एव यथैवाग्निविध्योः स्वविधिप्रयुक्तयोरेव लाभादाक्षेपप्रतिबंधे नाशक्तस्यमूत्रादेर्वा न तदाक्षेपो
पि तु अग्निविधयोरधिकारिविशेषणत्वमंगीकृत्य तद्वतरावाधिकारस्यैवं द्रव्याद्येशेऽपि प्रधानविधिना
अनाक्षेपात् एकत्र व्रीह्यादिर्द्रव्यवतरावाधिकारित्वकल्पनेन न द्रव्यांतरोपादाननिमित्तप्रयोगोऽस्य
गराव युक्त इति प्राप्ते द्रव्यशास्त्रेण द्रव्यांतरसाधारण्येनाक्षेपप्रतिबंधेऽपि व्रीह्याद्यानामग्निविधयो
रिव स्वतंत्रप्रयोगविधिविधेयत्वाभावात् प्रयाजादिवत् प्रधानविधेरेव व्रीह्यादिप्रयोगविधायकत्वात्प्रयो
गविधिविषयीभूतानां तेषामधिकारिविशेषणत्वानुपपत्तेर्निमित्तवलाद्दर्शनेऽत्यागेनापि प्रधानक

२

र्तव्यतावगतेस्तस्य च द्रव्यांतरमंतरेणायोगात् युक्तं तदाक्षेपकत्वं अग्निविधयोस्तु स्वतंत्रप्रयोग
विधिसिद्धयोरेतत्प्रयोगविधिविषयत्वाभावेन यथाशक्त्युपबंधविषयत्वाभावात् युक्तमधिकारि
विशेषणत्वमिति वैषम्यं नन्वेवमपि द्रव्यस्योत्पत्तिवाक्ये तस्य निमित्तावच्छेदयापूर्व मेव यागान्व
यान्यथाद्रव्यगम्यमानमितरावद्रव्यावच्छेदकत्वेनाद्रव्यावच्छिन्नजीवनादेरेव निमित्तत्वावगतेः
कथं द्रव्यांतरेणायागइति वाच्यं विशिष्टविधौ निमित्तान्वयात् पूर्वं भावनायामन्वितस्यापि द्रव्यस्य वि
शेषणाविधेयायागांगता बोधद्वारा यागगतफलवत्त्वस्य नाथकामयावच्छिन्ना वाक्याभ्यामेकवाक्य
त्वीकारेण निमित्तपापस्याघन्वयोत्तरमेव द्रव्यस्य यागांगताबोधेन प्रयोजनादिवत्तत्रापि यथा
शक्त्युपबंधोपपत्तेः ॥ अतस्तदा कर्मशास्त्रेणविसदृशसाधारण्येन द्रव्यांतराक्षेपाधृतः प्रतिनिधि
ः । तस्य चांगत्वाभावेऽपि उपकारकत्वमात्रेणग्रहणं बोध्यं एवं च कर्मबोदनयायत्किंचित् द्रव्यप्राप्तौ

युक्तमंतरेणसहस्रस्यवचनेनचपूर्तिकानांनियमइतिवक्ष्यते:।। नदेवता।। एवंसर्वत्रप्रतिनिधौप्र
सक्तेदेवतायांसनभवति: यदिहिअर्थमात्रस्यदेवतात्वंत्यागकालीनोच्चारणकर्मीभूतशब्दप्रतिपा
द्यत्वरूपंभवेत्ततस्तस्यशब्दविशेषापेक्षायांप्रतिपादकत्वेनविधिगतस्योपस्थितस्यैशब्दस्यनि
यमेपिरोगादिनातन्त्यदीच्चारणासंभवेतादृशार्थस्यत्यागांगत्वानयापात्तदोषकश्चोतल्लक्षणिक
शब्दांतरप्रसक्त्याभवेदपिप्रतिनिधि:।यदातुदशमाधिकरणवक्ष्यमाणानीत्याविधिगतशब्द
विशिष्टस्यार्थस्यतादृशाशब्दमात्रस्यवादेवतात्वंतदाक:प्रसंगशब्दांतरस्य:नहिदृविस्त्यागकाली
नोच्चारणकर्मत्वविशिष्टविधिगतशब्दत्वसमनियतेत्र्यखंडोपाधिरूपंद्रव्यदेवहोरस्विदंदेवता
त्वंशब्दांतरेसमस्तियदितुअर्थस्यापिदेवतात्यकथंचिदंगीक्रियेततत्रापितादृशंविधिगतशब्द
प्रतिपाद्यत्वसमनियतमेवतदंगीकृत्यप्रतिनिध्यभाव:समर्थनीय:।।अतएवयागस्यदेवतापेक्ष

२४

त्वापिविधेयत्वघटितत्वद्विषयेत्राक्षेपकत्वासंभवाद्देवताविधिरपूर्वविधिरेवतदसंभवेवयागपदा
र्थस्यलोपएवयदातुदेवतापचारेप्रजापतिरितिवचनेत्रभावेविधिविधयाप्रामाणिकंतदातत्येवा
नुष्ठानं:एवमग्नेरपिहोमाधिकरणस्यनप्रतिनिधित्राहवनीयादेस्त्राददाधानविधिसिद्धत्वादेव
क्रतुप्रयोगविध्यविषयत्वात्तेषामधिकारिविशेषणत्वप्रतीतेर्यथाशक्तिन्यायाविषयत्वाद्देवन
प्रतिनिध्याशंकायत्रतुलौकिकाग्नेरेववाचनिकमधिकरणत्वंयत्रवापदादेस्तत्रापितस्यापितस्यप्रयो
गविधिविषयत्वेत्रदृष्टार्थत्वान्नतस्यप्रतिनिधि:।।नहिपूर्वदेशविभागानुकूलव्यापाररूपप्रक्षेपमा
त्ररूपस्यहोमस्याधारापेक्षास्ति:अतएवतद्विधिरपूर्वविधिरेव:पदादिनात्राहवनीयादिवा
धेस्तुपतनप्रति वंधकत्वरूपाधिकरणतायाएववादृष्टोत्पादकत्वादेकेनतत्सिद्धे:समुच्चयायोगाद
नुसधेय:।अतएवतत्रप्रतिनिधेरदृष्टोत्पादकत्वेप्रमाणाभावान्नस:।।कश्चित्तुवाचनिकोब्राह्मणपाण्या

दिरभावे विधिरेवः एवंअर्थेष्वप्रकाशनार्थेष्वपि मंत्रेषु न प्रतिनिधिः शब्दांतरस्य मंत्रांतरस्य वाः
सद्युपायांतरेण ध्यानादिनार्थेन वगते तत्प्रतिपादकत्वस्याभावादेवानाकांक्षः अवगतेतु त
स्मिन्स्मारकानपेक्षत्वादेव न तदुपादानंः न चैवं मंत्रस्य तदुच्चार्थः स्तु तस्तत्र विहितमंत्रपाठानाप
त्तिः॥ तत्र नियमादृष्टसिध्यर्थं मंत्रजन्यस्मृतेरेवाभ्युदयकारित्वकल्पनेन मंत्रपाठावश्यकत्वात्ः प्र
तिनिधेस्तत्कर्मचोदनाप्ति सस्य नियमादृष्टजनकत्वे प्रमाणाभावाच्चेपाठ इति वैषम्यंः एवं अन्यस्मा
त्तददृष्टोन्यस्तो प्रमाणाभावेनादृष्टार्थप्रयाजादिक्रियायामपि न प्रतिनिधिः॥ दृष्टार्थावघातादिक्रिया
यास्तु स समस्त्येवः यत्तत्र कैश्चिददृष्टार्थस्य षोडशिग्रहणाभावादेरपि न प्रतिनिधिः॥ तेन षोडश्यभावे
युक्तत्र तु प्रयोगसंकल्पे कृते यदि देवाद्ग्रहणगमपि तत्र षोडशीकृतस्तदा षोडश्यमावस्याभावे तददृष्टा
र्थवाभावांतरं प्रतिनिधेयमित्युक्तंः तन्नः नातिरात्रे षोडशिनं गृह्णातीत्यनेन षोडशिग्रहणाभावेपि द्रवं

२५

गमात्रादेवक्रतूपकारसिद्धिरित्येव वगतः षोडशिग्रहणाभावस्यादृष्टोत्पादकत्वे प्रमाणाभावात्ः अतएव
वच तत्र षोडशिग्रहणे वृथा चेष्टाफलं नमायश्चित्तमात्रं॥ प्रतिषिद्धं॥ अनारभ्य कृतेन अयज्ञियावैमाषाव
रकाः कोद्रवाइत्यनेन माषादीनां यत्तो गत्वप्रतिषेधात्तत्र साक्षात्तेषां विधानं तत्रैव विकल्पार्थं प्रतिषे
धः॥ अथवा यत्र धान्यत्वादिना सामान्यधर्मेण विधानं तत्र स्वेच्छाप्राप्त माषाद्यंगप्रतिषेधो व्रीहिभिर्यजेत
नवैयमित्तिवत्ः अतस्वकर्मशास्त्रानुरोधेन माषादीनां प्रतिनिधित्वस्थलेसाधनत्वे यंगत्वाभावान्न प्रतिषे
धः॥ द्रव्यमाणायुक्त्या द्रव्यशास्त्रानुरोधेन माषादिरूपस द्रव्य प्रतिनिधित्वस्थलेत्रीह्यवयवत्वादिनैव तेषांग्र
हणाद्वर्जनीयतया माषाद्युपादानादंगत्वाभावेन न प्रतिषेधः॥ अतस्तेपि प्रतिनिधेया इति प्राप्ते अयज्ञि
या इत्यस्यार्थः प्रत्ययेन साधनत्वमात्रनिषेधार्हं शेषविहितातिरिक्तस्य तेस्वंत्रेव माषादिप्रतिषेधप्रतीते
र्न प्रतिनिधेयाः द्रव्यसामान्याभावे तु ग्राह्यास्वेति ध्येयंः अत्र च लक्षणया यत्तोद्देशेन माषनिषेध विधाना

न्नैकप्रसरतानंगः॥ तथा स्वामिनः॥ मृते तावद्यजमाने पत्न्यां वा नान्यतरेणान्यतरस्य प्रतिनिधिः यजमाने
मृते पत्न्या अग्न्यभावादेवानधिकारात्। पत्न्यां मृतायां यजमानस्यापि जायायै पूर्वमारिण्यै दत्त्वाग्नीनन्त्य
कर्मणीति प्रसे तावदाग्न्यभावादेव विवाहात्पूर्वमनधिकारात्। तत्राप्यविधुराधानपक्षे श्रौतस्मार्तवैदिकक
र्मणां पत्नीव्यतिरेकेणैव वा स्वनिकत्वेन पत्नीप्रतिनिध्यप्रसक्तेः॥ यदा तु नाग्नीनां पत्न्यै दानं तदापि तदा
पितदाहुरपत्नीकोऽप्यग्निहोत्रमाहरेदिति वचनात्पत्नीव्यतिरेकेणैवाग्निहोत्रमात्रानुष्ठानमिति न प्रति
निधिप्रसक्तिः॥ यदा तु कस्यचित्कर्मणो मध्येऽन्यतरस्य मृतिस्तदा तदाहापूर्वं निबतसमापनेऽवस्यमाणश
स्या प्रोषितादिवदेवानुष्ठानमिति निधिप्रसक्तिः॥ रोगादिना अशक्तौ कार्यं तिरख्याप्नेनेवान्यतराधिका
रिककर्मसु यद्यपि स्वामिनः कालादिवप्रयोगविध्यविषयत्वान्न तदेकत्वादिवदेव प्रतिसत्त्रमध्ये कस्य
चिद्यजमानस्य मरणे तत्प्रतिनिधिरन्यः कार्य एवं काम्यस्यापि प्रारब्धस्यावश्यं समापनीयत्वात्॥ यद्य

२६

पि वमुख्यकर्त्तुः प्रयोगविध्यविषयत्वान्न प्रतिनिधिर्नवा मृतेन तदुपादानसंभवस्तथापि सांगकर्त्तरि सतस्मृशावरः सत्र
मासीरन्निति वाक्ये न सामदृश्याविधानात्समदृश्यरूपांगसंपत्त्यर्थमन्योपादानमवशिष्टैः कार्यं न च तस्या
ख्यातोपात्ताधिकारिसंख्याविशेषत्वादानीयमानस्य च वृष्यमाणरीत्या फलभोक्तृत्वाभावादधिकारित्वानु
पपत्तेः कथं तमादाय सामदृश्यसंपत्तिः॥ फलभोक्तृत्वाभावेऽपि कर्तृनिष्ठत्वमात्रेणैव सामदृश्योपपत्तेः अतएव
वार्त्विज्येऽपि येयजमानास्त ऋत्विज इत्यनेन वचनेन जघन्यर्त्विक्पदेऽप्यार्त्विज्यलक्षणामंगाकृस्य तदुद्देशेन
यजमानानां कर्तृत्वविधानाद्यजमानपदस्य च शानजन्तत्या आत्मनेपदरूपत्वेन फलभोक्तृत्वविशिष्ट
कर्तृत्वाविवक्षया यथाशक्ति प्रयोगे भोक्तृत्वाभावेऽप्यानीयमानस्य कर्तृत्वसत्त्वात्संख्यासंपत्त्यविघातः न तत्स
संपत्त्यैवान्यायेनैवात्र प्रतिनिध्युपादाने एवं चन्यायप्राप्तेः पूर्वमेव प्रवृत्तेन पदिस्तातानां प्रमीयेत तयोस्य
नेदिष्ठः स्यात्तं तस्य स्थाने दीक्षयित्वा तेन सह यजेरन्नित्यनेन वचनेन नेदिष्ठत्वविधानार्थं पुनर्विधिः॥ अत
एवेदमधिकरणं शिष्यव्युत्पत्तिमात्रार्थः एतदभावेऽपि वचनेनैवान्यायप्राप्तेरुपपत्तेः॥ अथ च पत्नीमर

णोपि तेन सह यज्ञेरेत्रि त्रिपुलिंगानि ईशायजमानसाप्रदृश्येनैव च संख्यायामपि संपन्ने तत्कर्तृत्व
पदार्थानां च पत्न्यंतरेण यजमानैरेव वा सिद्धेर्नान्यानयनं: अत एव तादृशास्थले पत्न्या नाग्निनिर्ह
हि: ।। किंत्वन्यं तरेणैव: यजमानस्य तु मृतस्य पृथक्कृतस्वाग्निनिर्हरेहेपि आनाहिताग्निसाधार
ण्येनानीतस्याग्निसंसर्गे प्रमाणाभावात् ह्यग्निवदेव कर्तृत्वोपपत्ति: ।।सस्वामी।। ।। पूर्वासेपिणेद: आनी
यमानस्य न कर्तृत्वमात्रमपि तु स्वामित्वमपि: तस्यानापन्नत्वात्: दीक्षारूपफलिसंस्कारस्य च णा
श्रेति प्रायेन तावदृश्च सत्र फलं: तस्य वैगुण्ये सत्यनुन्यत्ते: ।। तद्विननाशनानतस्य सांगकर्तृत्वा
भावात्: अत एव न मृतस्यापि नाथवशिष्टानां: ससदृशस्वामिकसत्रकर्तृत्वाभावात्: अवशि
ष्टैस्तु त्रिष्टविगर्हणादोषपरिहारार्थमवश्यकर्तव्ये समापने सामान्यपापै: संख्यासंपत्त्यर्थमन्य: समा
नियते: अतएव प्रारंभनिमित्तसमापनसाध्यपापक्षयोपि अवशिष्टानामेव न त्वानीतस्य प्रारंभरूपनिमित्ताभा

२८

वात्. अनस्य कर्तृत्वमात्रमिति सिद्धं सत्रद्धर्मा कलिसंस्कारा ब्रह्मचर्यपयोव्रतादि
यत्तु आनीतस्य फलित्वाभावादप्राप्तकार्या कारित्वापत्तेर्न कर्तव्या: अवशिष्टानां
तु सत्र फलाभावेपि प्रारंभनिमित्तकपापक्षयस्य सत्वात्कर्तव्या: । अत एव फलिसं
स्काराणां प्रसक्तौ प्रधानं फलाधानयोग्यताजननार्थत्वाघदप्रधानकरणात्सूर्वे
मतिस्तवेदेवनेषां कलिसंस्कारा: पापक्षयस्य प्रधानजन्यत्वात्. न तु ऊर्ध्वमिति ध्ये
यं. दीक्षाकरणं तु आनीतस्याबनिकमप्राप्तकार्यमिति मा भैयपघिनतस्य फलि
त्वं तथा थन्येषां फलिसंस्कारकर्तृरिसामदस्य संपत्त्यर्थमानीतस्यापि ते कार्या: । न च
ब्रह्मचर्यादिषु पुरुषस्य संस्कार्यत्वेन कर्तृत्वस्यार्थिकत्वात् संख्यायाश्च वैध एव क
र्तृत्वेनि वेशात्फलिसंस्कारकर्तरि सामदस्याभाव: वैधवैधसाधारणावश्यकक।

तत्वद्वारेणैवलाघवात्सामदश्यस्यस्पसत्रांगलोपत्तेः। अनास्तसंपत्त्यैर्थे कर्तव्या
एकफलिसंस्काराः। ननु सप्तदशावरा इत्यनेन सत्रप्रयोगे कर्तृपरिच्छेदकत्वेन सा
प्तदश्यं विहितं न तु प्रत्येकं ननु तदार्थप्रत्येकपदार्थानां सप्तदशभिरकरणात्॰
न चानुमतिद्वारा सप्तदशानां सर्वत्र कर्तृत्वं तथात्वे फलिसंस्कारेष्वपि अनुमति
द्वारेणैव साप्तदश्योपपत्तेरानीते फलिसंस्कारकरणानापत्तिः। किंचैवं मृतस्यैव
पूर्वकालेनुमतिसत्वात्संख्यासंपत्तिसंभवेनानयनवैयर्थ्यं मृतकर्तृव्यपदा
र्थानुष्ठानार्थमानयनमिति चेत्॰ तेषां कर्मान्तरे धियावा ध्वर्यवादिसमाख्यया र
तरमन्यस्तेषामिति न्यायेन वा कर्त्रन्तरैरेव सिद्धेः अतश्चानयनएव प्रमाणा
भावे कुतस्त्यं संस्कारकल्पनमिति चेत्। तन्न्यायेन तदसिद्धावपि वचनेनैव

२८

तत्सिद्धेः अतश्चोक्तवचने दीक्षितमरणे निमित्ते दीक्षानेदीष्टसाहित्याद्यनेकगुण
विशिष्टनैमित्तिकव्यापत्तावन्यपदार्थप्रयोगस्यैवविधानान्न वाक्यभेदः। दीक्षा चा
प्राकृतकार्यापि वचनादेवविधीयते॰ तस्याश्चवयमनियमपरिग्रहरूपत्वा
द्भूमव्रतादिसिद्धिः। एवं च ये केचित्तद्भिन्नाः संस्कारास्ते न कार्या इति प्रतिभाति
सत्राय दीक्षितानामिति श्रवणाच्चनाहीनेतदानयनं सामान्यं एवं प्रतिनि
धौ विवरिते किं सति संभवे सदृशएव प्रतिनिधिरुतानिषादस्सदृशइति चिंतायां क
र्मचोदनयाय त्किंचिद्द्रव्यमात्राक्षेपाद्द्रव्यशास्त्रस्य च नीवारेषु व्रीहित्वाभावे
न सदृशनीवारादिनियामकत्वाभावान्न सदृशनियमः। नं च व्रीह्यवयवैर्नः
स्वावयवैरंशांतभेदाभावात्तदवयवानामेवकतिपयानां नीवारोपादानत

यानीवाराभिन्नतयाव्रीहिशास्त्रेणैवतद्विधानमितिवाच्यं॰तथात्वेव्रीहित्वे
पिनीवारोपादानेवैगुण्याभावप्रसंगादितिप्राप्तेव्रीहिशास्त्रेणव्रीहित्वजातेः
साधनत्वेप्रमितेअमूर्तायास्तस्याःसाधनत्वासंभवादर्थात्तत्परिच्छिन्नस्याव
यविनःसाधनत्वमवगम्यते॰तस्यापिवावयवोपादानव्यतिरेकेणसाधनत्वा
संभवात्तदवयवानामपिसाधनत्वमर्थाद्गम्यते।तज्जातीयावयवानामेवप्रकृति
पयानांविजातीयावयवान्तरोपेतानांनीवारासंभकत्वमितिन्यायमाशंक्यप्रयो
गेजातेरवयवविनोपवांतराणांचसाधनत्वासंभवेपिप्रकृतिपयावयवानामे
वतत्सयत्स्वर्थमवर्जनीयत्तपानीवारविजातीयतदवयवोपादानमितिस
दृशप्रतिनिधिनियमसिद्धिः।अतएवसादृश्यंसमानजातीयावयवारब्धत्वे

२९

नैवनियामकंनतुसमानजातीयधर्मान्तरेणतव्रीहिशास्त्राविषयत्वात्॰एवं
वव्रीह्यभावेसुसदृशंतदभावेसदृशंतदभावेमंदसदृशमित्यादिक्रमेणबोध्यं
निर्दिष्टस्यतु वैकल्पिकेषुखादिरेवधात्रिपालाशेवधात्रीत्यादिषुएकेन
प्रक्रान्तेप्रयोगेपदितस्यापचारस्तदावैकल्पिकांतरमवोपादेयंनतुपूर्वोपा
त्तसदृशं॰वैकल्पिकांतरस्याप्युद्देश्यतावच्छेदकसामानाधिकरण्येनविहित
स्यतस्मिन्नपिप्रयोगेअगत्वस्वरूपयोग्यतयामुख्यत्वेनजातिव्यक्तिसर्वावय
वानामेवसाधनत्वसंभवेपूर्वोपात्तारंभकककनियमयावयवमात्रग्रहणे
प्रमाणाभावादितिप्राप्तेतस्मिन्नपिप्रयोगेऽन्तरस्यांगत्वेतदभावकृतवैगु
ण्यपनेरवश्यंवैकल्पिकस्थलेतत्रद्वाकपयोस्तनघटितप्रयोगमात्रविषय

त्वावसायानप्रयोगे इ नरस्यांगत्वाभावेन पूर्वोपात्तसदृशमेवोपादेयं॰ अत एवाग्ने
येत्वादिव्याप्यधर्मानवच्छिन्नं प्रत्येव व्रीह्यादेः कारणत्वमित्युक्तं कौस्तुभेन त्रापि वैक
ल्पिकानामादितोव धारणमित्यस्य प्रामाणिकत्वे संकल्पोत्तरमेवानद्भावे तु एको
पादानोत्तरमेव तस्यापचार इति द्रष्टव्यं वचनात्तु यदि सोमं न विंदेत पूतिका
नभिषुणुयादित्यादौ किं सोमाभावे पूतिकत्वेन रूपेण पूतीकानां विधानमुत प्रति
निधिविधया दूतिकगतसोमावयवानां नियम इति विंतायां प्रतिनिधिनियमे
पूतिकपदस्यानरूनसोमावयवलक्षणापत्तेरभावो विधिरेवायं न च नियमविधि
लाघवानुरोधेन तदंगीकरणमप्यदोषः। निषादस्थपत्यधिकरणन्यायेनापूर्ववि
धिगौरवस्य फलमुखत्वात्॰ अभावे विधिपक्षेपि प्रतिनिधिनियमस्यार्थसिद्धत्वे

३०

नलाघवस्य मन्मतेपि सत्वाच्च॰ न ह्ययं त्वन्मतेपि शाब्दः प्रतिनिधिनियमः। अपि तु फलतः।
न च फलं ममाप्यविशिष्टमेव॰ किंच सोमाभावे सुसदृशस्यान्यस्यैव प्राप्तेर्मंदसदृशानां
पक्षप्राप्त्यभावादेव नियमविधेयत्वानुपपत्तिः। अतः पूतिकत्वेन रूपेण प्रतिकानांमपि
सोमाभावे विहितत्वात्तदपचारे पूतिकदृशमुपादेयमिति प्राप्तेनाभावे विधिरयं॰ तथात्वे पू
तिकात्वस्य तदवच्छिन्नव्यक्तेस्तदवयवान्तराणां च सोमावयवविजातीयानां कारण
त्वकल्पने गौरवापत्तेः। प्रतिनिधिनियमे तु कुप्तसोमावयवनिष्ठकारणतानिरूपितोपादान
कपूतिकपरिच्छेदकत्वेन प्रागोद्देशेन पूतिकत्वनियममात्रविधानात् पूतिकव्यक्त्यवय
वानां यागकारणताकल्पनालाघवं॰ अत एव लक्षणामि॰ पूतिकानभिषुणुयादित्यत्र
तु तृतीयाया अश्रवणाद्द्वितीयया यागप्रयोजकत्वस्यैव नि। रूक्तसंबंधेन लक्षणापिन

दोषः।यद्यपि वचनेन संबंधेन पूतिकत्वस्यैतद्विध्यभावेन पक्षे प्राप्तिः पूतिकानां मंदसदृ
शत्वेन सोमाभावे सुसदृशस्यैव प्राप्तेस्तथापि कर्मचोदनया यत्किंचित्प्रतिनिधिप्रसक्तौ
सदृशन्यायेन नियमकरणान्मूर्वमेवैतद्द्रव्यं न प्रवृत्त्यनियमोपपत्तेः।अत एव पूतिकगत
सामावयवनियमफलक पूतिकत्वनियमकरणेपि न पूतिकानां सुसदृशाभावे उपादा
नं किंतु सोमाभाव एव वचनस्यैव शीघ्रप्रवृत्तिकतया यो नियामकत्वात्।यदि सोमा
मित्यनुवादसामर्थ्याच्च।एवं च पूतिकापचारे सोमपूतिकोभयसदृशं ग्राह्यं पूतीकत्व
स्यापि कारणकोटौ प्रवेशात्।यत्तु शास्त्रदीपिकायामेतादृशविषये सोमसदृशमेव ग्रा
ह्यमित्युक्तं तन्नतंत्ररत्नविरोधादुपेक्षितं।तदभावे तु सोममत्र सुसदृशं पूतीकत्वावच्छि
न्नसंसर्गस्य सोमावयवांगत्वेन गुणलोपे वेति न्यायेन च हुत्वेति विशेषः।अत एव यत्र व्री

३९

ह्यादौ न दृष्यवत्वेनैव वत्वेनैव नीवारप्रतिनिवारप्रतिनिधिस्तत्र नीवारत्वस्थानं गत्वा
तदपचारे व्रीहिसदृशमेवोपादेयं न तूभयसदृशमित्यपि सुलभं।अत एव मूले उभय
विधप्रतिनिध्यपचारे अधिकरणद्वयं कृतं तन्न्यायास्पष्टत्वादुपेक्षितं मुख्या
धिगमे यदा सुस्थमलभ्यं मत्वा प्रतिनिधिमुपाददातु प्रवृत्तः उपादाय वा द्वित्राः।
सर्वे वा संस्काराः कृताः कार्यं न कृतं तत्र कार्याकरणात्पूर्वं मुख्यलाभे तमेवोपादाय पु
नः संस्कारानुकूलत्वात्तेनैव प्रधानं कार्यं मुख्यसंभवे विकल्पोपादानस्य वाचनिकस्या
थन्याय्यत्वात्।न च प्रतिनिधित्यागसंकल्पबाधः।द्रव्यांशे पृथक्संकल्पे प्रमाणा
भावात्।सत्वेपि वा यथाशक्ति शास्त्रार्थं संपादयिष्य इत्येव संकल्पात्।प्रधानानु
रोधेन पुनः संस्कारकरणस्य न्याय्यत्वाच्च।यदा तु प्रतिनिधिनैव कार्यं निष्पन्नं त।

दृष्टप्रयोजनाभावान्नमुख्यमुपादेयं। मुख्याभावनिमित्तकप्रायश्चित्तमात्रमेव तु का
र्यं। द्रव्यसंख्यार यदा नियोजनादिकार्यमात्रयोग्यो मुख्यस्तल्लक्षणादिसक
लसंस्कारस्तु योग्ये प्रतिनिधिस्तदा मुख्यस्यैवोपादानं संस्काराणां तु गुणलोपे
न मुख्यस्येति न्यायेन लोपेऽपि न दोषः। न चान्यत्र तथात्वेऽपि यूपस्य दृ[illegible]दृष्टसं
स्कारसमूहरूपत्वान्न संस्काराणां काष्ठांगत्वमिति वाच्यं॥ लाघवेन सकलसं
स्कारजन्यपरमापूर्वविशिष्टस्यैव यूपपदार्थत्वात्। अतएव यूपं तक्षतीत्यादौ
काष्ठस्यैव संस्कार्यत्वान्न काप्यनुपपत्तिः। यत्र तु प्रधानभूतनियोजनासमर्थमे
व मुख्यं तच्चेत्तदनादरेण प्रतिनिधिनैव कार्यसंपादानं दृष्टव्यं विधिरपि
यत्र तु अश्वशफपरिमाणं शेषकार्याद्यपर्याप्तः पुरोडाशस्त्वजातिमात्रभि

३२

व्यक्तिसमर्था व्रीहयो लभ्यन्ते तत्र तैरेव पुरोडाशः कृत्वा प्रधानमनुष्ठेयं। शेषकार्याणां लो
पः। न च बहूनां शेषकार्याणां पुरोडाशांगभूतैकव्रीह्यनुरोधेन लोपासंभवः। व्रीहीणा
मपि यागोद्देशेन विहिततया यागांगत्वेन पुरोडाशांगत्वाभावात्। न चोत्पत्तिशिष्टपुरोडाशा
वरोधं धाद्व्रीहिभिरिति तन्नीयाप्रयोजकत्वपरेति वाच्यं पुरोडाशरूपव्यापारकत्वे।
पि करणत्वस्य काष्ठैः पचतीत्यादिवदुपपन्नतरत्वेन लक्षणायां प्रमाणाभावात्। अ
तश्चैकप्रधानांगानुरोधेनानेकेषामपि अंगानां लोपो नायुक्तः॥ इति श्रीखंडदेवकृ
तौ भाट्टदीपिकायां षष्ठस्य तृतीयः॥ शेषात् दर्शादौ यदा सकलस्य पुरोडाशस्य द
धिपयसोरन्यस्य वा हविषः संपूर्णस्य नाशस्तदा प्रधानानुरोधेन हविरंतरोत्पत्तौ प्र
सक्तायां यस्य सर्वाणि हवींषि नश्येयुर्दुष्येयुरपहरेयुर्वा आज्येनैता देवताः प

रिसंख्यायज्ञेन। निष्क्रतेनाज्येनैव याग इत्यविवादं। अत्र हविर्नाशादेर्नां प्रत्येकं निमि
त्तत्वे वाक्यभेदापत्तेस्तु त्यन्न हविर्याग्यत्वमेवाद्यमिन्नवेदीति वह्लक्षणया निमित्तत्वं नतु
हविरलाभः। नाशाद्युल्लेखवैयर्थ्यापत्तेः। अत एवानुत्पन्नपुरोडाशाद्यसंभवे नाज्य
नियमः किंतु यत्किंचिदनियतप्रतिनिध्युपादानमेव। एकदेशनाशादेश्चयदि ध्रुव
दानग्रहणोत्तरं पात्रीस्थस्यकुंभीस्थस्य वा नाशस्तदा भाष्यकारमते नावद्यावदानस्यै
वहविर्विच्छेदकार्याभावेपित्तेनैव यागः। वार्तिककारमते तु यावन्निरुप्तव्रीहिप। ३३
रिमितपुरोडाशस्य यावद्दुग्धसान्नाय्यस्यैव वहविष्ट्वाद्धविर्नाशसत्वेन पात्रीस्थना
शेपि आज्येनैव यागः। एवं तन्मते ध्रुवदाननाशेपि हविर्नाशाविशेषाद्धविरंतरोत्प
त्तिप्रसक्तौ वचनादाज्येन यागः। भाष्यकारमतेपि नाहशविषये आज्येनैव यागो न

पुनः पात्रीस्थादवदानं। मध्यात्पूर्वार्द्धाच्चावद्यतीत्यनेन ध्रुवस्य यावदुपात्तस्य प्र
हणस्य पुरोडाशदेर्यो मध्यादिदेशस्तदुपादानतया तदुपरि तन्नभागस्यैवाव
देयत्वश्रयणात्। तस्य च नष्टत्वेन पुनरवदाने मध्यादेरेवावदेयत्वप्रसंगा
त्। अतस्तत्रापि हविरंतरात्यतिप्रसक्तौ आज्येन यागः। न च सर्वमेतत् हवि
षावच्छिन्ननाशादिना हविरयोग्यत्वस्य निमित्तत्वेद्धि त्त्वावयवनाशेपि आ
ज्येन यागापत्तिः। निर्विनष्टस्यैव नैमित्तिकानुष्ठापकतया नाहशनाशस्य नि
त्तनयावनिमित्तया च निमित्तत्वानुपपत्तेः। अंगुष्ठपर्वन्यूनावर्जनीयाति रि
क्तावयवनाशे तु भवत्येवाज्येन यागः। तदेवं मीमांसकमर्यादा। याज्ञिकास्तु
कौतानमस्यंतेन पामयमाशयः। एकदेशक्षाणवदेवैकदेशनाशस्य न निमि
त्तत्वं। एकदेशनाशेपि पुरोडाशाज्यपयोदधित्वादेः प्रत्यभिज्ञायमानत्वात्

तस्यैव हविषोवच्छेदकत्वेनयावन्निरुप्तव्रीहिपरिमितत्वादेस्तदनवच्छेद
कत्वात्॰ तन्नाशस्यावर्जनीयत्वाच्च॰ अतएकदेशनाशेप्यवशिष्टस्यैव यागः।
होमः परं मध्यापादानकत्वाभावेप्यवदानासंभवाद्धुतनं। वस्तुतस्तु याव
दवशिष्टं तस्यापि हविषात्तन्मध्यापादानकत्वं संभवत्येवेति होमोपिका
र्य एव॰ अतएवाश्वलायनः। अवदाननाशे पुनराप्यायतनादवदानमिति॰ अत
श्चयद्यपि मीमांसकमतं न्यायसिद्धं भवेत्तथापि स्मृत्यनुमितवचनेन न द्वाधो
गिनष्टे तु सुब्रह्मण्योहवनं॰ कृत्स्नहविर्नाशे तु अनेकहविष्कायामिष्टौ कृतिपय
हविर्नाशे हविरन्तरोत्पत्तिरेव। सर्वहविर्नाश एवाज्येन पुनरुत्पादितेन यागः
।अतएवापस्तंबः। यद्यप्यन्नदेवतं हविर्व्यापद्येतान्यद्विस्तंदैवतं निर्व
पेत्॰ यस्य सर्वाणि हवींषि आज्येनैतादेवताः परिसंख्यायजेतेति॰ यद्यपि चोत्तरवाक्ये स्क

तेचसर्वत्वमविवक्षितं तथापि पूर्ववाक्येनैवव्यापद्यापत्तेहविरुभयत्वेवदविरुद्धसर्वनाशस्यविभिन्नता॥
अपि वा॥ यत्र तु प्रयागांशप्युक्तानि शेषकार्याणि यथा स्विष्टकृदादौ तत्रोत्तरार्द्धादिनाशे उत्तरार्द्धांतराभा
दवशिष्टस्य प्रतिपत्त्यंतरगृहीतत्वाच्च न तावच्छेषेण करणं। नापिहविरन्तरोत्पत्तिः। अप्रयोजकत्वात्॰ किं
तु आज्येनैव समापनं॰ उक्तं वचनस्य श्रुतद्रव्यनाशेद्रव्यापेक्षामात्रेणैव प्रवृत्तेः। याज्ञिकमतेतु यदि प्र
त्तं तद्देवतमाज्येनशेषं संस्थापयेदित्या। श्वपर्णवचनाद्वं ध्येयं॰ अविशेषप्रवृत्तमपि इदमपेक्षानुरो
धात्स्विष्टकृदुत्परमेव॰ अतस्प्रयागांशाभावादिडादिष्वपि एव॰ इदं चोत्तरार्द्धत्वादिनानेकप्रतिपत्तिविधा
ने शेषत्वेनानेकप्रतिपत्तिविधाने तु शेषैकदेशविनाशेपि अवशिष्टेनैवावयवशः सर्वप्रतिपत्ति
करणमिति ध्येयं॥ ॥निर्देशात्॥ ॥शेषप्रसंगादिदं॰ दर्शपूर्णमासयोः शेषभक्षाः श्रूयंताः तत्रेडाभक्षे
यजमानपंचमा इडां भक्षयंतीति श्रुताः कर्तारः तथा प्राशित्रभक्षे प्राशित्रं ब्रह्मणे परिहरंतीति श्रूतः। चतुर्धा

करणभक्षेपिव्यादेशाम्नानाच्चत्वार ऋत्विजः। यजमानभागब्रह्मभागयोक्तविवाशं शुवाककालभक्षितु हविः
शेषा भक्षयंतीत्याम्नानेन बहुवचनेनाध्वर्यवसमाख्याबाधेपि कर्मकरत्वात्सर्वर्त्विजो भवंति। नचेडाभ
क्षेन्यायप्राप्तत्विकपुनश्रवणस्य परिसंख्यार्थत्वाभावात्। अत्र हि इडादेशेनकर्तृविशिष्टभक्षांतरविधानेपि
विशेषणाविधिवेलायां प्राप्ताप्राप्तविवेकेन भक्षो यजमानसाहित्यं च विधीयते। ऋत्विजां तु भक्षस्य
प्रयाजशेषाभिघारणन्यायेन कर्तृसंस्कारकत्वस्यापि वक्ष्यमाणत्वेनानन्यार्थत्वात्प्राप्तिसंभवेन न
विधानं। स्वत एवानतत्वाच्चाप्राप्तं यजमानसाहित्यं तु विधीयते। यदि तु करिष्यमाणकर्मणि वलाधा
नार्थत्वमपि भक्षस्येति धिमार्थ्यंते तदास्तु यजमानपंचमत्वग्रहणं पत्नीपरिसंख्यार्थं सर्वथा भक्षां
तरे कर्तृपरिसंख्याभावाच्छंयुवाककालेपि भक्षे ऋत्विज एव कर्त्तारः॥ अस्मिं[illegible]श्च पक्षेत स्मिन्पत्नी
यजमानयोर्निवृत्तिरत्रैवर्त्विजो हविःशेषान्भक्षयंतीति कल्पसूत्रकारवचनादवगंतव्या॥ अ

राम॰

३५

र्थसमवायात्॥ दर्शपूर्णमासयोः प्रायश्चित्ताधिकारो भिन्नेनुहोति स्कन्नेनुहोतीति श्रुतं तत्र कृत्स्न
भेद एवेदं उतैकदेशभेद एवोन उभयत्रापीति चिंतायां द्वयोः संघर्षे सति एकदेशभेदस्यावर्जनी
यत्वेन नित्यत्वान्निमित्तत्वान्निमित्तत्वानुपपत्तेः सर्व[illegible]भेद एवेदं चूर्णतादशायां प्रायश्चित्तमिति प्र
थमः पक्षः। संघर्षेण कतिपयावयवानां चूर्णीभावेपि भिन्नमिति प्रतीत्यभावात्कपालिकादिस्थूला
वयवविभाग एव भेदनस्यापि निमित्तत्वोपपत्तेस्तत्रैवायं होमः। अयं हि भेदनस्य निमित्तत्वेपि होम
स्य प्रयोजनापेक्षायां सन्निपत्योपकारकत्वलाभाय भिन्नकपालसंस्कारार्थः। कपाले हि भेदने नोक्तपरि
माणबाधाद्वैगुण्यप्रसक्तौ तत्परिहाररूपहोमेन संस्कारो नानुपपन्नः तस्य चानुपपन्नः तस्य चानुपयु
क्तस्य संस्काराद्योगात्सर्वभेदने चोपयोगायोगादेकदेशभेदनमेव निमित्तत्वं। अस्तु वा सप्तमीयसंस्का
र्यत्वपरैव। न तु निमित्तत्वार्थिकापि। न च भिन्नस्य कादाचित्कत्वान्नित्यानित्यसंयोगविरोधः रथंतर

स्यकादाचित्कत्वेपिसंमीलनादिधर्मविधिवदुपपत्तेरितिप्राप्तेभाष्युपयोगित्वेवातस्योपधानाव
त्पकत्वेभिन्नंकपालमक्षप्रक्षिपत्ति अन्यदुपदधातीतिवाक्यविरोधान्न्यायंस्वतंत्रोहोमाभिन्नं संस्का
रकः नापिप्रकरणपठितहोमानांतत्संस्कारकत्वं।एतेनप्राकरणिकहोमानुवादेनलौकिकस्यभिन्न
कपालस्येवाधिकरणत्वेनविधिराहनीयवाधेनेत्यपास्तं होमस्यप्राकरणिकस्यकपालोपधानोत्तरत्वा
दन्यदुपदधातीत्यस्यवैयर्थ्यापत्तेः।प्रायश्चित्तसमाख्यानुपपत्तेश्च अतएवेदंकर्मांतरं तच्च नैमि
त्तिकं आरादुपकारकं क्रतुवैगुण्यपरिहारार्थं क्रत्वंगत्वेनविधीयते अतः सर्वभेदनमेकदेशभेदनमु
भयमप्यत्रनिमित्तं॥ क्षाम॥ तत्रैवयस्यपुरोडाशौक्षायतस्तंयज्ञंवरुणोगृह्णातियदातद्धविःसंतिष्ठेत

रामः

अथतदेवहविर्निर्वपेदितिश्रुतप्रायश्चित्ते सर्वपुरोडाशदाहरूपक्षाणमेवनिमित्तं।अग्निपाके

३६

हविषिएकदेशक्षाणस्यावर्जनीयत्वात् नचावर्जनीयक्षाणातिरिक्तैकदेशक्षाणस्यैवनिमित्तत्वंत
स्यैवपरिच्छेत्तुमशक्यत्वात् नचतद्धविःसंतिष्ठतइतिश्रवणादवशिष्टेनहविषायागप्रतीतेरेकदेश
क्षाणस्यैवनिमित्तत्वं प्रयोगसमाप्तावेवैवंजातीयकशब्दप्रयोगस्यसर्वत्रदर्शनेनप्रयोगसमाप्तेरेवल
क्षणया प्रवृत्तिपिप्रतिपादनात् अतः सर्वक्षाणएवेदं पुनःप्रयोगरूपंप्रायश्चित्तं सर्वदाहेप्रायश्चित्तं
यच्चावदानेभ्योनप्रभवेदित्यापस्तंबेन सर्वदाहेअवदानापर्याप्तेकदेशदाहेवापुनःप्रयोग
विधानेनतद्भिन्नेकदेशदाहेप्रायश्चित्तानुपपत्तेः।अतएवैकदेशदाहस्यपरिच्छेत्तुंशक्यत्वेपिएतन्म
लभूतश्रुत्यैवतत्रप्रायश्चित्तासंभवः।नादशैकदेशक्षाणेतुनाज्याधिकरणन्यायेनाज्येन।दग्धा
वशिष्टेनवाप्रयोगसमाप्तिमात्रं एवंसर्वक्षाणेपिप्रयोगसमाप्तिराज्येनपुरोडाशांतरोत्पत्त्यावादृष्टव्या॥
यथाश्रुति॥ दधिपयसोरेकैकस्यनाशेप्रायश्चित्तमुक्तायस्याभयंहविरार्तिमार्छेदैंद्रंपंचश
रावमोदनंनिर्वपेदित्याम्नातं तत्रचनार्तिमात्रस्यनिमित्तता सर्वदैवकस्यचिदार्तिसत्वेननित्य

तया निमित्तत्वानुपपत्तेः। अतोऽग्निमंतर्वेदीति वल्लक्षणया हविरार्त्तिर्निमित्तमिति तावदविवादं अत
श्चतद्द्वेधोभयत्वमपि उभयपदवैयर्थ्यापत्तिलक्षणया निमित्तकोटिप्रविष्टमिति उभयहविरा
र्त्तिरेव निमित्तं न च तत्रैकवचनाद्विवक्षा श्रुतत्वादेकं प्रयोजनमस्तीति प्राप्ते ग्रहैकत्वाधिकरणन्या
येनोद्देश्यतावच्छेदकविशेषणस्येव निमित्तरूपोद्देश्यविशेषणस्यापि विवक्षायोगाद्विशिष्टलक्षणा
याश्चैकवचनाद्यनुरोधेनैवोभयपदानुरोधेन हविरादिपदेषु करणे प्रमाणाभावात् उभयपद
स्य चोभयमपि इत्येवं श्रुतेर्क्लृप्तैकैकनाशप्रायश्चित्तानां द्वयस्यामस्यात्कर्षणास्तावकतया द्युपपत्तेरुभ
यत्वस्यानिमित्तकोटिप्रविष्टत्वायोगादेकैकहविर्नाशेपि इदं प्रायश्चित्तं वस्तुतस्तु उभयार्त्तिरिवा
त्र निमित्तं न च तस्या अपि नित्यत्वान्निमित्तत्वानुपपत्तिः। प्रकरणादेव हविर्विशेषविषयत्वोपपत्तेः।
इतरथा भवन्मतेपि दधिपयोविषयत्वानुपपत्तेः। अतो दोहद्वयनाश एवेदं प्रायश्चित्तं हविःपदमिव

राम·
३०

विवक्षितं अधिकरणं तु हविःश्राप्यभावकत्वाचिंतया वस्तुतस्तु पक्षद्वयेपि न हविरादिपदे ल
क्षणा सर्वेषां पदार्थानामाख्यातार्थान्वयोत्तरं परस्परान्वयोपपत्तेः एवं च विशिष्टस्यानिमित्वाना
दरो निमित्ततावच्छेदकगौरवभिया अन्यतरविवक्षयापि निमित्तत्वानुपपत्तेरन्यतरपदस्य च आधा
नवाक्यगतध्वंसत्वस्येवानुवादत्वेनाप्युपपत्तेश्च द्रष्टव्यः॥ ॥होमाभिषव॥ ॥सोमे हविर्धाने ग्राव
भिरभिषुत्याहवनीये हुत्वा प्रत्यंचः परेत्य सदसि भक्षान्भक्षयंतीत्यत्र हविर्धानाधिकरणकग्रावकर
णकाभिषवस्य। आहवनीयाधिकरणकहोमस्य। प्रत्यग्गमनस्य सदोधिकरणकत्वस्य च। प्राप्तत्वात् हो
माभिषवसमानकर्तृकं भक्षांतरमेवेदं गुणाद्विधीयत इत्युक्तं। तत्र च होमाभिषवयोः क्लृप्तप्रयोजन
योरेव कर्त्रुपलक्षणत्वान्निमित्तत्वमिति तद्विशेषणस्यैकवाक्योपादानलभ्यसाहित्यस्याविवक्षित
त्वं। यदि त्वत्रार्थैकं निमित्तत्वं होमाभिषवकर्तुरेव तत्पादेयत्वात्तद्विशेषणं साहित्यं विवक्षित

मित्याशंक्येत॰ तथापि अविवक्षा॰ अतोभिषवमात्रकर्त्रा नेष्टुर्नेत्रादिना होममात्रकर्तृभिस्त्व
समाद्ध्वर्युभिरपि समभक्षः कर्त्तव्य इति प्राप्ते नियमं प्रति कर्त्तुः संस्कार्यत्ववादिना पार्थसारथि
मतेतदापत्तावपि पार्ष्ठिकेन विधिना भक्षं प्रति संस्कार्यत्वे उच्यमाने श्रूयमाणविधौ कर्तृ
णामुपादेयत्वाद्विशेषणविवक्षोपपत्तौ आर्थिकेन विधिनाविशेषणाविशिष्टस्यैव कर्तृरुद्दे
श्यत्वांगीकारेण साहित्याविवक्षानापत्तिः। अतोत्र मिलितयोरेव होमाभिषवयोरार्थिके नि
मित्तत्वं॰ यदि तु क्ताप्रत्ययस्य द्वितीयकाप्रत्ययांतपदोपात्तक्रियायामध्यन्वयो नाप्युसन्न इति
अभिषवसमानकर्तृकत्वं होमएव विशेषणं विशिष्टहोममानकर्तृकत्वस्य च भक्षणभावना
यामन्वय इत्युच्यते तदा सुतरां विशेषणविवक्षा॰ इतरथा अभिषवस्याप्यविवक्षाप
त्तेः॥ ॥पुनराधेय॥ ॥यस्योभावग्नी अनुगतौ आदित्योभ्युदियादस्तमियाद्वा पुनराधेय

राम॰
३८

मेव तस्य प्रायश्चित्तिरिति श्रुतं प्रायश्चित्तं किमेकैकाग्न्यनुगमेपि भवेदुत सर्वाग्न्यनुगतावेवेति चिं
तायां उभयत्वस्य निमित्तविशेषणत्वेन तत्वम्न्तेप्यविवक्षितत्वादेकैकाग्न्यनुगमेपि इदं प्रायश्चित्तं॰
न च हविरुभयत्ववदेकैकाग्न्यनुगमे आतपत्वादिप्रायश्चित्तांतराम्नानादस्योभयविषयत्वं॰ तस्या
दित्योदयाद्यभावविषयत्वात् न चैवमपि प्रकर[illegible]गादेवकारश्रवणान्मुनः पदयोगाच्च कर्मांतरत्वापु
पत्तेराधानस्य चोत्पत्तिवाक्ये सर्वाग्निजनकत्वस्यैव क्लृप्तत्वेन विधेयसामर्थ्यानुराधेन उद्देश्यपान
र्णयइति वाच्यं॰ उत्पत्तिवाक्येप्यग्नीनामुद्देश्यत्वेनाविवक्षितविशेषणत्वात्॰ अतएव योगसि[illegible]ध्यधि
करणन्यायेनाधानस्य प्रत्यग्निभिन्न एव प्रयोग इति प्राप्ते आयतनेषु संभारान्निर्वपतीत्यत्रायतनबहु
त्वस्य विवक्षितत्वादाधानस्यैकेनैव प्रयोगेण सर्वाग्न्युत्पादकत्वावगतेर्विधेयस्य सामर्थ्यानुसारेण
सर्वानुगमएवेदं प्रायश्चित्तं॰ अतएव दक्षिणा[illegible]ग्नेर्भिन्नयोनित्वपक्षाभिप्रायेणात्रोभाविति श्रवणंस

९

मानयोर्निर्त्वितु त्रितयाग्निनाशिवोध्यं॥ पंचशरावस्तु॥ ऐंद्रं पंचशरावपरिमितौदनमात्रविधाने। नचवा
क्यभेदः। पंचशरावौदनपदयोः समानाधिकरण्येनाग्नेयादात्र इतिवद्विशिष्टविधानोपपत्तेः। ओदन
पदस्य तात्पर्यग्राहकत्वेन पंचशरावमिति बद्धव्रीहिर्णैवौदनस्योक्तत्वाच्च। ऐंद्रमिति सान्नाय्यस्यैंद्रदेवता
कत्वस्यापि सत्वात्तावद्भूतामिति वत्याक्षिकानुवादः। अथवा तत्तदुत्पत्तिवाक्ये इंद्रमहेंद्रभेदेन सान्नाय
स्य भेदादैंद्रयागानुवादे नैव प्रतिनिधिविधानमिति प्राप्ते सुवंतपदद्वयस्य परस्परान्वयाद्व्युत्पत्तेर्वहु
व्रीहिणा सामान्यतो द्रव्योपादानेपि ओदनत्वादिस्वरूपेणोपादाने प्रमाणाभावात्तात्पर्यग्राहकत्वमंगीकृ
त्यैकत्रैव पदे विशिष्टलक्षणांगीकारेच क्वापि प्राप्तकर्मानुवादिनानेकविधाने वाक्यभेदानापत्तेर्वाक्य
भेदापादकगुणदेवकर्मांतरमिदं प्रायश्चित्तत्वेन विधीयते। समभिव्याहाराद् दिनैव। अग्नये दात्रइत्य
त्रापि तु न देवतामात्रविधिपक्षाश्रयणं। वाक्यभेदप्रसंगात्। अपितु भावनांतरविधिपक्ष एव। नचैव

राम॰
३९

मत्रापि भावनांतरत्वापत्तेर्यागांतरत्वानापत्तेः। उत्पत्त्यन्वयिनो गुणस्यवाजिनवद्यागभेदकत्वावश्यंभावात्।
अभ्युदितेष्टौ तु पूर्वदेवतापनयविधानाद्यवच्छेदश्रवणाच्च विशिष्यपूर्वयागीयत्वप्रतीतिर्भावनामात्रभेद
इति विशेषः। सप्तत्यामनेत्॥ ॥तदिदं कर्मांतरं द्रव्यनाशप्रयुक्तवैगुण्यपरिहारार्थत्वेन सान्नाय्यांगतया
विधीयते न तु तत्फलार्थं तत्स्थानि। तत्फलस्य पापक्षयादेः शिष्टविगर्हणनिमित्तकस्य वान्नाय्ययागे नैव
सिद्धेः साधनांतरानपेक्षत्वात्। न हि द्रव्यनाशे यागलोपः। द्रव्यांतरोत्पत्त्या आज्येन वा तत्समापनोपपत्तेः।
नच स्वर्गादिरूपस्य फलस्य वैगुण्ये सत्यनुत्पत्तेस्तस्य साधनापेक्षायामस्य विधानमिति वाच्यं। तथात्वे तत्का
मनाभावित तदनुष्ठाने निमित्तश्रुतेः संकोचापत्तेः। अतोपेक्षित वैगुण्यसमानार्थत्वे नैवास्य विधानं।
अपेक्षा च सान्नाय्ययागस्यैवेति तस्यैव विशिष्योपस्थितत्वात्तद्वाचकपदकल्पनाया वाक्यात्तदंगत्वमे
व। न तु प्रकरणात्सर्वांगमनुष्ठानसादेश्याद्दर्शमात्रांगं वा। अत एव नाशनिमित्तप्रयोगांतःपात्येवेदमंगं न

तुष्ठाए। निमित्तकं पुनः प्रयोगवत्प्रयोगबहिर्भूतं॥ विश्वजित्तु॥ ॥ त्यत्रप्रकरणे यः सत्रायागु
र्त्तेत्स विश्वजितायजेतेति श्रुते विश्वजितितु सत्रसंकल्परूपमागूरणंकृत्वायः सत्रंनकरोति
तस्येदंसत्रफलार्थत्वेनविधानं। नतुसत्रांगतयातथात्वे आगूरणस्य निमित्तत्वश्रवणवैयर्थ्या
त्॥ नचैवंसत्राकरणस्यापिनिमित्तांतःप्रवेशाङ्गोरवापत्तिः अतःसंकल्पमात्रेनिमि
त्तिकमिदंफलांतरार्थे विधीयत इति वाच्यं फलांतरकल्पनापेक्षया सत्रफलस्यैव सा
धनसाकांक्षस्यफलत्वकल्पनेलाघवात्। तत्त्वफलेयद्यपिनमुख्यमेवस्वर्गादिफलत्वेनक
ल्पयितुं शक्यं। तथात्वेवीतायांफलेच्छायांसंकल्परूपस्या। निमित्तस्यसत्वेननैमित्तिकस्यान
नुष्ठानेनिमित्तसंकोचापत्तेः। तथापिप्रारब्धाकरणनिमित्तदोषपरिहारायत्रैधातवीपास्या

नेविधीयते· अतएवतां दृशफलवाचकपद कल्पनेयेवाकरणविषयत्वसिद्धिर्न तस्यापिनि
मित्तांतः प्रवेशः। अतएवैकस्याप्यकरणे अन्यैःकर्त्रंतरंसंपाद्यासंपाद्यैव वासत्रप्रयोगेपि
अनेनैव विश्वजित्कार्य इत्येकवचनस्याप्युपपत्तिः॥ ॥वत्स॥ ॥सत्रेऽप्रवृत्तस्य
विश्वजिदित्यत्रेसान्नाय्येअप्रवृत्तस्येवव्रतमित्युत्स्यर्थमुत्तराधिकारणं· तदुपोद्घाततैवे
नेदं विचार्यते· दर्शपूर्णमासयोर्बर्हिषापौर्णमासेव्रतमुपैतिवत्सैरमावास्यायामितिश्रु
तेः· तत्र तृतीययावत्सकरणकभक्षणपरपर्यायव्रतविधिः। रागप्राप्तभक्षणानुवादिना
माषममांसंससर्पिष्कंव्रतंव्रतयतीतिवचनांतरप्राप्तभक्षानुवादिनवा वत्समात्रविधिरिति

प्राप्तेन तावद्वत्सस्य व्रतेहस्त्यादिवत्करणत्वेनापि भक्ष्यत्वेनाशक्यत्वात्· नापि मांसप्रद्युतित्वेन
विनावचनं विशसने प्रमाणाभावात्· अतः पुरा वत्सानपाकर्त्तो दंपती अश्नीयातामितिवच
नांतरैकवाक्यतालाभाय बर्हिषा पौर्णमास इत्येतस्याप्यागाच्च वत्सप्रातिपदिके नवत्साया
करणं लक्षयित्वा तृतीयां चेत्थंभूतलक्षणे व्याख्यायामावास्योद्देशेन वत्सायाकरणपूर्वका
लाव्रताश्रितत्वेन विधीयते व्रतं च प्रकरणप्राप्तमिति न कश्चिद्विरोधः॥ कालश्चेत्॥ यद्यपि
वत्सायाकरणं कालोपलक्षणं नतु स्वयमंगं परार्थत्वात्तथापि तदभावे कालस्यैव ज्ञातुमशक्यत्वात्तस्मान्नाप्यया
जिन एव वत्सायाकरणसत्वाद्व्रतं· अतएव एकपुरोडाशायामग्निषोमीयाभावेप्याग्नेयसत्वात्कालोपलक्षणसत्वे

त्यमेवचांतरंगतरस्यव्यंग्यत्वेप्येकांशमादायसमासोक्त्यादीनामपिवाच्यालंकारव्यपदेश

स्वभावनांतरेउपादेयत्वमामापादयतियथगृहीतंहविरभ्युदियादिषेवव्रतंवर्योयदिगृ
ह्रीतंहविरभ्युदियादथोतर्हिएतानेवतंडुलान्स्फलीकृतानदधिपयस्वेसादितिगाव्ह
यमर्थोविज्ञापतेतेनमध्यमादिभेरेनाग्नेयस्यवारत्रयमाहुतिः।दधिपयोयागयोस्त
स्यविद्यापिष्टसाध्याग्नेयाभ्यासेनसहतंत्रेणकरणंसहप्रपयतीतिवाक्यात्त्वप्रपण
मपितेषांसंप्रतिपन्नदेवताकानांसहैवः अतएवदधिपयसतयोःप्रपणाभावोपिसा
हित्यविध्यान्यथानुपपत्तैववप्रयणशाखासाहित्यवशेननत्सहरणावतः साहित्यंहिके
नविदावश्यकंतत्रसंप्रतिपन्नदेवताकत्वासदानवेलायामेनतदावश्यकत्वेप्रयण
वेलायामपितस्यैवसाहित्यसंप्रतिपत्तियाणिलकल्पनात्। अतस्वाभ्युदितेष्टिनेकर्मांतरस

वः प्रमाण्यांतरप्रमितस्तत्रफलचमसादौ नेरवकाशेनैमित्तिके न निसापनयाभावेपि
निसस्य बाधः अत एव यन्नयविध्यभावादेव पंचशरावबाधेक मांतरं यः पशुकाम
स्यात्सोमावास्यामिष्टोवत्सान पाकुर्यात् यो मध्यमास्त्वान्विष्मवे शिपिविष्टाय शृतेच
रुं ये स्य विष्टास्तान् ग्नये सनिमते श्याकपालये शिष्टास्तां निरीयप्रदान्नेदाधश्वनुमिति
वचनेन विहितायां पशुकामेष्टावपि चायनयनविध्यभावादेव कर्मांतरं यच्छू एतत्
लोकप्रसिध्यानुवादकत्वयैव कथं चित्तत्र व्याख्येयः अतस्थापनयविधेरेव पूर्वदेव
तासंबंधं पूर्वयागानामपनयं तेषां देवतोतं रांकोसोसापनद्वारा तद्देवतांतरसं
बंधमुपपादयत्कर्मांतरं त्वं प्रतिबध्यातिप्रकृतानामेव चमध्यमादीनादधि पयसो॥

६७ा ६

तत्र अतस्त्वासन्नयतः शाखाविनैव प्रस्तरप्रहरणं पौर्णमास्यां च यथाशक्तिप्रयोगे प्रस्तरा
भावेपि शूर्पालोपिचेतिन्यायेन शाखाप्रहरणं॥ ॥ ॥ इति श्री खंडदेव कृतौ भाट्टदी
पिकायां षष्ठस्य चतुर्थः॥ ॥ ॥अभ्युदये॥ ॥दर्शपूर्णमासयोर्यस्य हविर्नि
रुप्तं पुरस्ताच्चंद्रमा अभ्युदियात्सत्रेधा तंडुलान्विभजेद्ये मध्यमास्तानग्नये दात्रे पुरोडाश
मष्टाकपालं निर्वपेत् ये स्थविष्ठास्तानिंद्राय प्रदात्रे दधंश्चरुं ये णिष्टास्तान्विष्णवे शिपि
विष्टाय शृते चरुमिति श्रुतं तत्र निमित्तं तावच्चंद्राभ्युदयावच्छिन्नदिने प्रारंभ इति वक्ष्यते अस्य
च निमित्तत्वाभावे नैव दर्शरूपे सपि सिद्धमेव नैमित्तिकं पुनरत्र किं कर्मांतरं किं वा गुणांतर
युक्तं तदेवेति चिंतायां वाक्यभेदाभयादेकगुणात्मकमांतिरांपेवा तत्रांतोनतत्त्वं के विचार्यं

६७ा

६

प्राप्ते शंखवेलायां मार्गं नव्याभिसारादौ उपलक्षणापायेषु उपलक्ष्यानपायाद्दृत्याकरणाभा-
वेपि अच्छाधानरूपस्याभ्रावरूपत्वकालानपायात्सान्नाय्याभावेपि कर्त्तव्यमेव व्रतं॥ ॥प्रस्तरे
सह शाखया प्रस्तरं प्रहरतीत्यत्र प्रहरण एव शाखासाहित्यं प्रस्तरस्य न तु होम इत्युक्तं चतुर्थे
ततु न समप्रधानत्वेन प्रस्तरप्रहरणस्येव शाखाप्रहरणस्यापि शाखाप्रतिपत्तितया किंतु प्रस्त-
रप्रहरणे शाखासाहित्यं गुणत्वेनामैत्रावरुणग्रहस्येव पयःसाहित्यं सहयोगे प्रधानत्वस्य तु शा-
सनेन गुणत्वावगमादिति प्राप्ते शाब्दबोधे गुणत्वेप्यवयवेपि प्रयाजशेषाभिधारणन्यायेन आ-
र्थिकप्रतिपत्तितरविधिकल्पनेन प्रस्तरवत् शाखाया अपि कृतार्थत्वाविशेषेण प्रतिपादकत्व
अत एव शाब्दबोधे गुणत्वेप्यवयवामपि प्रस्तरप्रहरणकालप्रतिपत्त्यर्थमित्युक्तं न तु स्वय

षष्ठस्य तृतीय:

६।३।५

व्यक्तिसमर्था व्रीहयो लभ्यंते तत्र तैरेव पुरोडाशं कृत्वा प्रधानमनुष्ठेयं॰ शेषका-
र्याणां लोपः। न च बहूनां शेषकार्याणां पुरोडाशांगभूतानां पुरोडाशांगभूतैकव्री-
ह्यनुरोधेन लोपासंभवः। व्रीहीणामपि यागोद्देशेन विहितत्वयोगांगत्वेन पुरोडा-
शांगत्वाभावात्॰ न वोस्त्विति शिष्टपुरोडाशावरोधाद् व्रीहिभिरिति तृतीयाप्रयोज-
कत्वपरेति वाच्यं पुरोडाशरूपव्यापारकत्वेपि करणत्वस्य कार्यैः पवनीत्वादि-
वदुपपन्नत्वेन लक्षणायां प्रमाणाभावात्॰ अतश्चैकप्रधानांगानुरोधेनान्ये-
केषामपि अंगानां लोपो नायुक्तः ॥ इति श्रीखंडदेवकृतौ भाट्टदीपिकायां
षष्ठस्य तृतीयः ॥ शेषात् दर्शयं दैवदासकलस्य पुरोडाशस्य दधिपयसो-
रन्यस्य वा हविषः संपूर्णस्य नाशस्तदा प्रधानानुरोधेन हविरंतरोत्पत्तौ प्रस-

६

ज्ञायां यस्य सर्वाणि हविंषि नश्येयुर्दुह्येयुरपहरेयुर्वा आज्येनैता देवताः परिसं
ख्याय यजेतेति श्रुतेनाज्येनैव याग इत्यविवादं। अत्र हविर्नाशादीनां प्रत्येकं नि
मित्तत्वे वाक्यभेदापत्तेरुत्पन्नहविरयोग्यत्वमेवाऽर्दभं तः नाशस्य नित्यत्वया
च निमित्तत्वानुपपत्तेः अगुणपर्वन्यूनावर्जनीयातिरिक्तावयवनाशे तु भवत्येवा
ज्येन यागः। तदेवं मीमांसकमर्यादा। याज्ञिकास्तु नानं मन्यन्ते नेषामयमाशयः।
एकदेशक्षालनवद्देशनाशस्य न निमित्तत्वं। एकदेशनाशेपि पुरोडाशत्वस्य पयोदधि
त्वादेः प्रत्यभिज्ञायमानत्वात्। तस्यैव हविष्ट्वावच्छेदकत्वेन यान्नितु पत्नी हि परि
मितत्वादेस्तदनवच्छेदकत्वात्। तन्नाशस्यावर्जनीयत्वाच्च। अत एकदेशना
शेप्यवशिष्टस्यैव यागः। होमः हौंपरं मध्यापादानकत्वाभावे द्रवदानोसंभवात्तु

पं६

अधिकारी

पंछे:

श्रीगणेशाय नमः॥ द्रव्याणां॥ ॥एवं सकर्मके प्रयोज्यवर्गे निरूपितेऽधुना तत्राधिकारी निरूप्यते। तत्राधिकारो नाम फलभोक्तृत्वसमानाधिकरणं कर्तृत्वं। श्राद्धादौ पित्रादेः ऋत्विजो वाधिकारव्यावृत्त्यर्थं विशेषणद्वयं। न चैवं जातेष्टौ पितुः फलभोगाभावादधिकारानापत्तिः सत्यप्यकरणे प्रत्यवायिकरणस्य पूतत्वादिफलकत्वेन पापक्षयफलकत्वाभावादिति वाच्यं· प्रवृत्तिप्रयोजकफलेच्छासमानाधिकरणकर्तृत्वस्यैव विवक्षितत्वात्· जातेष्टिश्राद्धादावपि फलस्यान्यनिष्ठत्वेऽपि तदिच्छाया यजमाननिष्ठत्वादधिकाराविघातः। ऋत्विजामपि यजमानस्य फलं भूयादितीच्छायाः स्वनिष्ठकर्तृत्वसमानाधिकरणत्वादधिकारापत्तिरतः प्रवृत्तीत्युक्तं· दक्षिणाप्राप्तिर्मे भूयादितीच्छाया एव ऋत्विक्प्रवृत्तिजनकत्वेन उक्तविधेच्छायाः प्रवृत्तिप्रयोजकत्वाभावात्· अयं चाधिकारो विध्याक्षिप्तस्वेष्टसाधनत्वसमानाधिकरणस्वकृतिसाध्यत्वबललभ्यत्वाद्विधिप्रमाणकः। अयमेव चाधिकारविधिरित्युच्यते· तत्र चाधिकारस्येष्टरूपप्रवृत्तिफलघटितत्वात्तदेवेष्टरूपं फलं भावनायामस्ति न वेति प्रथमं विचार्यते· तत्र भा

द्र० प्र०

॥१॥

वनाया भाव्यापेक्षायां पदश्रुत्या धात्वर्थस्यैव सर्वत्र भाव्यत्वं न स्वर्गादेः। अपि तु तस्य साधनत्वमेव योग्यत्वात्· पश्वादेरिव स्वर्गशब्दस्यापि वेदनं स्वर्गे इत्यादिप्रयोगाद्द्रव्यवाचित्वमेव सुखविशेषदेशविशेषवाचित्वग्राहकस्यान्यपरत्वाच्च· कामशब्दस्त्वर्जनकामनानुवादः। अथवा स्वर्गकामशब्दः कर्तृविशेषणमेव यागाङ्गत्वेन विदधन्विशेषणीं तां कामनामपि तदङ्गत्वेन विधत्त इति न कश्चिद्विरोधः। न च विधिश्रुतिविरोधादिष्टभाव्यकत्वावगमः। विधेः प्रवृत्तिजननस्वरूपयोग्यत्वस्यैव वाच्यत्वेन फलोपधाननैयत्याभावात्प्रवृत्तिविरहेऽपि अरण्यस्थदण्डवद्विधेः प्रवृत्तिजनकत्वोपपत्तेः। न हि फलोपहितप्रवृत्तिजनकत्वं विध्यर्थः। विधिशातश्रवणापि केषांचित्प्रवृत्त्यदर्शनात्· अत एव प्रवृत्तिविषयस्येष्टसाधनत्वाक्षेपकत्वमपि विधेर्नप्रामाणिकं यदि तु प्रवृत्तिस्वरूपयोग्यत्वमात्रोक्तौ वाक्यस्य वैयर्थ्यापत्तिः शंक्येत तदा यागस्य समानपदश्रुत्या भाव्यत्वावगमेऽपि यागे भ्यमप्रमासाधारणप्रवृत्तिकारणेष्टसाधनत्वज्ञानस्यैवाक्षेपाद्भ्रमात्मकेष्टसाधनताज्ञानादेव प्रवृत्तिसिद्धेर्नेष्टसाधनता

क्षेपकत्वं। अथवास्तु स्त्रीकामः प्रायश्चित्तं कुर्यादितिवत्स्वर्गकामनाया अपि निमित्तत्वं। ततश्च निमित्ते नैमित्तिका
करणे प्रत्यवायमात्रं न तु करणे किंचिदिष्टं। अकरणे प्रत्यवायभियैव च पुरुषप्रवृत्तिसिद्धेर्न विधिवैयर्थ्यम
पि। सर्वथा यागस्यैव भाव्यत्वेनेष्टसाधनत्वाभावान्न प्रवृत्तिप्रयोजकप्रवृत्तिविषयजन्यफलेच्छासमानाधिक
रणकर्तृत्वरूपाधिकारसिद्धिरिति प्राप्तेन प्रवृत्तिस्वरूपयोग्यत्वमात्रं विध्यर्थः। वैयर्थ्यापत्तेः। नापीष्टसा
धनत्वानुमितेर्भ्रमत्वं। ज्ञानानां स्वतःप्रमाणत्वेन बाधकं विना भ्रमत्वानुपपत्तेः। अतश्चोत्सर्गसिद्धप्रमत्वनि
र्वाहार्थं यागेऽपीष्टसाधनत्वं विषयोऽपि वक्तव्य एवेति भावनाया मिष्टभाव्यकत्वमनपभ्रष्टमेव। यद्यपि कामना
या निमित्तत्वमंगीकृत्य विधेरकरणजन्यप्रत्यवायाक्षेपकत्वेन प्रवर्तकत्वमित्युक्तं तन्न। कामनायाः प्रवृत्ति
जनकत्वेऽपि निमित्तत्वे प्रमाणाभावात् स्त्रीकाम इत्यादावपि न तस्या निमित्तत्वं। प्रायश्चित्ताकरणे प्रत्यवायां
तरप्रसंगात् अपि तु प्रमाणांतरसिद्धकामनाजनितप्रत्यवायनाशार्थत्वमेवेति तत्रापीष्टसाधनत्वाक्षेपक

॥२॥

त्वमेव विधेः। अतश्च सर्वत्रानैमित्तिकस्थले अकरणे प्रत्यवायाक्षेपकत्वापेक्षया लाघवादिष्टसाधनत्व
मेव विधिना आक्षिप्यत इति तद्दशान्भावनायामिष्टभाव्यकत्वसिद्धिः। यथा चैवं सति नैमित्तिकस्थलेपापक्ष
यभाव्यकत्वं तथा यावज्जीवाधिकरणे निरूपितं। तच्चेष्टं स्वर्गपुत्रादिस्वर्गकामादिपदैः समर्थते। योग्यत्वात्का
मशब्दयोगाच्च कामना हि स्वरसतः फलेच्छायेवोपचारिकी। अतएव स्वर्गशब्दोऽपि श्रुतिस्मृतिपुराणादिषु शा
दुःखासंभिन्नसुखः भोगभोग्यदेशविशेषवाची आकृत्यधिकरणन्याये — नवातादृशसुखमात्रवाची न तु देहना
दिवाची तत्र साधुनिकप्रयोगस्यौपचारिकत्वात्। अतएव स्वर्गकामादिपदमपि लक्षणया स्वर्गपरं प्रथमाचक
मत्वपरेऽभिभावनान्वयोऽपपतेर्नान्योपसर्जनत्वेन स्वर्गस्य तदनन्वयाशंका। स्वर्गकामोऽधिकारित्वेनान्वीयतइ
ति स्वर्गादिवाचकद्वितीयांतपदाध्याहारेण तदन्वय इति केचित् तन्न फलापेक्षायाः प्राथमिकत्वात्। लक्ष
णया अध्याहारापेक्षया लघुत्वाच्च। एवं बल[illegible]वत्तरविधिश्रुत्याद्यनुरोधेन स्वर्गादेरेव भाव्यत्वावगतेः

सामान्यप्रवृत्तापदश्रुतिरपियागादेः करणत्वमेव लक्षणयाप्रतिपादयतीति सिद्धउक्तरूपाधिकारः॥ अ
त्रवोक्तविधेष्ठाफलान्यतरसमानाधिकरणं कर्तृत्वं अधिकार इति वोध्यं तेन नित्यस्य लेपापक्षये छायात्रव
त्तिप्रयोजकत्वाभावेपि नाधिकारविघातः॥ ॥फलार्थत्वात्॥ ॥सिद्धेधिकारे सकेषामिति विसते तत्र
स्वर्गकामत्वाविशेषाच्चेतनमात्रस्याधिकारः। न च तिरश्चां स्वर्गादिकामनासंभवः। परकीये छायाअभक्ष
त्वेन तदभावनिश्चयानुपपत्तेः। श्येनश्वादीनामप्युपवासादिदर्शनेन तदनुमानाच्च। न च सांगकरणासाम
र्थ्यादनधिकारः। शक्यमात्रस्यैव करणोपपत्तेरिति प्राप्ते भावनायाअंशत्रयान्वयोत्तरपश्वादिधिवलेना
धिकारिकल्पनात्स्वर्गावगतसांगप्रधानभावनानुष्ठानसमर्थ एवाधिकारी अतश्चासमर्थत्वाददद्रव्य
त्वान्न तिरश्चामधिकारः। विद्यमुक्तमणाद्यसमर्थत्वाच्च न पङ्गवंधबधिरमूकादीनां देवादीनां तु विग्रहाद्यभा
वादेव नाधिकारः। ऋष्यादीनां तु अनादित्वात् संसारस्य प्रवरवरणादौ अध्यंतरस्याविसंभवादधिकारो

कृ०म०

॥३॥

तेः न हि अग्न्यादेर्योदेवतात्वाद्यस्तद्गुणाम ध्यमादीनि द्रव्याणि। अष्टाकपालत्वाद्य।
लङ्घमादधिकृतयोरधिकरणत्वं चरुत्वं चैकत्वे नैकार्थविधानं प्राप्तिकमेणा संभवतिः न चा
ष्टाकपालकत्वस्याग्नेये प्राप्तत्वेनाविधानः तत्र प्राप्तत्वेपैंद्राग्ने अप्राप्ततया विधेयत्वाव
श्यकत्वात् न च दाक्षादिपदानां यौगिकत्वात्सामानाधिकरण्यादेवाग्न्यादिपदार्थेषु न्वयोपप
तेतिलदृष्टत्वा यूपप्राप्तिफलकगमनार्थो यूपच्छेदनानुकूलगमनार्थो वासत्तौ यूपस्वोसादिकेव अ
तएव यूपाहुतिरितिसमाख्याप्युपपद्यते। खलेवाल्यां च छेदनादीनामभ्येलोपेन यथाधात्स्वेसंस्कार
रूपसामर्थ्याभावेन यूपत्वानुसृतेरर्थलोपादेव न यूपाहुतिः॥ एवं परिधावपि॥ ॥स्थाणौ तुः॥
तत्रैव स्थाणौ स्थाणवाहुतिं जुहोति। तिप्रकृतौ विहितास्थाणवाहुतिः कार्या न वेति विंतायां स्थाणवा
हुतेर्यूपोत्पादकत्वे प्रमाणाभावादारादुपकारकत्वेन प्रसक्तायां गत्वावगतेः केत्तेष्वेवसानवात्र
यूपमच्छेष्यति स्वस्पतत्तायां तस्य कन्नोख्यातेनुषंगेण यूपोत्पादकत्वकल्पनासंभवति छेदनादि
भावायाच्च सतरां। न च स्थाणुसंस्कारद्वारा यूपोत्पादकत्वकल्पना। स्थाणोः सन्नम्यागुणत्वावग
मेन संस्कार्यत्वानुपपत्तेः। होमेन तस्य प्रतिपत्त्यजननेप्रयाजशेषन्यायासंभवाच्च न च यूपवियू
क्तस्थाणोः कश्चिदपयोगो येन संस्कार्यत्वमाशंक्येत। अत एव यस्य कस्यचिदेव स्थाणोरधिकरण ११

त्वेन प्राप्तत्वात्स्थाणवाहुतिरित्यपि सप्तमीसमासेनैव नामधेयं न च हुतिशब्दस्य होमोऽद्गणेपाठा
भावात्सप्तमीसमासानुपपत्तिः। तथात्वेपि संज्ञायामपि सप्तमीसमासविधानेन तदुपपत्तेः। न च तद
नामरण्येतिलकाइतिवदलुक्प्रसंगः। हलदन्तएव तद्विधानेनोकारान्ते तदप्रसक्तेः। अत एव कुम्भ
प्रहृतिनिमित्तेन सप्तमीसमासोपपत्तौ न कर्मषष्ठीभंग। कृत्सषष्ठीसमासांगीकारेण संस्कारक
र्मत्वकल्पना। इतरथा आधारस्यापि प्रयाजापचतुर्गृही नसंस्कारकत्वापत्तेः अतोपस्मिन्कस्मिं
श्चित्स्थाणौ खलेवाल्यादावपि प्रसंगमत्ता स्थाणवाहुतिः कार्यैवेति प्राप्ते सप्तम्या अधिकरणत्वे
न स्थाणोर्गुणत्वेपि प्रयोजनाकांक्षायां वैमृधन्यायेन पक्षांतरकल्पनया यूपोपयुक्तस्थाणुसं
स्कारार्थत्वावगतेस्तद्द्वारा यूपस्वोत्सादिकेवेयं इष्यते च गुरुध्वतायाश्चापि स्रजः पूज्जादिना संस्का
रः शिष्टेः अत एव होमजन्यं स्थाणुनिष्ठमेवादृष्टं स्थाप्रयजन्यावयविजनकत्वेति स्वसंबंधेन यू

फलोत्पादकं। अतएव प्रयाजानुनिष्पन्नस्याघारे वायं होमो न तु स्याद् एवंतरप्रयोजकः॥ एवं प्रोक्ष
णादिवददृष्टविशिष्टविधयापि संनिपत्योपकारकत्वलाभेनारादुपकारकत्वकल्पना युक्ताः प्रकरण
कस्य श्रुतिकल्पनायां गौरवात्। आघारे तु आरादुपकारकत्वेपि परप्रयुक्तद्रव्योपजीवित्वला
भात् ततसंस्कारकत्वकल्पना। वस्तुतस्तु प्रकरणाकरणकल्प्यश्रुतिकल्पना गौरवतिभियात्रा
पि चतुर्गृहीतं वा एतदभूत् तस्याघारमायोस्यन्नतस्येति कर्मपृथग्विंगीकारे प्यस्तु तएं संस्कारकर्मे
त्वांगीकार इतिन्यायस्तु घोतमेव सेय्यकपरंतु भिधूवाएतद्यत्स्य पदा घारो वर्म्मप्रयाजाइतिय
त्रांगत्वश्रुतेः प्रयाजांगत्वानंगीकारः अतो प्रयाजानुनिष्पन्नस्याणोः स्वत्लेवाल्पादावभावादलाघ
पूपत्वाभावाच्च न स्याद् एवाद्कृतिः॥ धूपाद्कुतेस्तु असत्यपि संस्कारकर्मत्वे धूपमच्छिष्यतेति वचनेन
साक्षादेवधूपत्वोत्पादकतया विहितत्वादकरणमिति विशेषः॥ ॥प्रयाजेव॥ स्वाहाकारप्रया

१२

जे सत्यपि स्वाहाकारं यजतीति वचनेन विरुक्तं यजतीति वत् स्वाहाकारदेवताविशेषो याज्यामंत्रवर्णो
ग्न्यादीनां प्रधानादिदेवतानां प्रसभितायमानानां प्रकाशनात् विशिष्टफलद्वदेवमंत्रांशे ततदेवताप्रका
शनार्थत्वावगते युक्त एव सौर्यादौ अग्निपदस्थाने सूर्यपदोहवदग्नीषोमादिपदानां बाधः न हि
तदा तत्रत्यास्याग्न्यादिपदानां स्वाहाकारवाचित्वकल्पने प्रमाणमस्ति। विशिष्टफलद्वतद्देवतास्मारकत्वे
पि प्रकृतयागांगत्वोपपत्तेः॥ अग्न आज्यस्य व्यंतिति मंत्रे णाद्ये अग्निपदत्वस्थित स्वाहाकारत्वमिति तु
ष्टेत तत्प्रधानादिदेवताः सर्वोपलक्ष्यमाणाः संतु प्रभवंत्विति सर्वोगीकारात्। अतः स्वाहाकारयाग
उद्देश्यांशे परमारादुपकारः स्यात् न तु मंत्रांशेपि विशिष्टफलद्वदेवतत्तद्देवताप्रकाशकत्वोपपत्तेः वस्तु
तस्तु न स्वाहाकारस्याहिताय यादेवतात्वाभिधानं स्वाहाकारशपद्रूप्य स्वाहाकारं यथा स्यात्तथा
णमुल्लत्वादिनापि संभवेनाकारांतत्वस्य संदिग्धत्वात्। अतः प्रथममविधिप्रकारत्वस्य यामंत्रव

षोमाद्यस्वाहापदवत्त्वं प्रहतिनिमित्तोः स्वाहाकारशब्दो नामधेयमेवेत्युक्तं कोस्तु भेदे देवताश्चास्मि
न्यागे मंत्रवर्णोप्राप्तापक्ष्यमाणा अग्न्यादय एवेत्युक्तवाकत्। अतश्चास्य यागस्य उद्देशात्प्रोपितद्देवत
तद्देवतासंस्कारको मंत्रांशोपि न तु स्विष्टकृद् मंत्रांश एव संस्कारकः। उद्देशांशेत्वाराद् उपकारकत्व
मिति सिद्ध एवायामर्थे तरविवक्षयास्माभिर्यतइति द्रष्टव्यं॥ ॥तथा॥ ॥दर्शपूर्णमासयोरग्नी
षोमाभ्यामाज्यभागौ यजतीति श्रुतं। तत्र संख्यया कर्मभेदे थेके कस्मिन्यागे अग्नीषोमयोर्व्यो
सज्यवृत्तिदेवतात्वं। द्वंद्वांते श्रूयमाणं च चतुर्थ्यो परस्परसहितानामेव तात्वप्रतीतेः॥ द्वित्वं
परमधिष्ठानाभिप्रायेण। अतश्च द्वयोरप्यग्नीषोमदेवतासंस्कारकत्वं। मंत्राः पुनर्भिन्नतात्मा
येनोभयलक्षकाः॥ द्विरुच्चारणञ्चाधिकतरः संस्कारो देवतांतरद्वावाहनस्वाहाकारादौ न विरु
ध्यते॥ अथवास्तु अग्नये सोमाय सोम्यभागाभ्यां चरंतीति शाखांतरवचनात्साम पिश

१३

त्वायामप्येकमेवं देवतात्वात्तद्धितस्य देवतात्वयो यदधिकरणाभेदकत्वे संभवति संबं
धांतरेणाधिष्ठानाभिप्रायत्वकल्पने प्रमाणाभावाच्च अतश्चैक आग्नेयोपरः सौम्यः॥
तत्र सौम्यदेवस्य देवतासंस्कारकत्वासंभवेपि आग्नेयस्याग्निदेवतासंस्कारकत्वं पूर्ववत्त
न चैकस्मिन्विधौ एकांशे आराद् उपकारकत्वमितरांशे संनिपत्योपकारकत्वमिति वैरूप्या
पत्तिः॥ आम्नविकमौनरवदार्थिकविधान्तरकल्पनयात्तदप्रपत्तेः॥ अत एव वक्ष्यमाणो
विधौ अग्नीषोमयोर्गुणत्वेनैवान्वयेन तत्पदेपि वैरूप्याभावाच्च अतो नापि संस्का
रकर्मत्वमिति प्राप्ते आवाहनादिमंत्रेषु सौमासूर्वीनरमेग्ने द्विः पाठात्सूर्वाग्नियदे
वतांनोभिन्नत्वइति क्रमपर्यालोचनयावगम्यते अभिन्नत्वेपि द्व्यासउद्देशांशं प्रति आग्ने
योदाविवगुणभूत एवरतरथाभशो द्वयोराज्यभागयोः प्रसंगभावेन प्रतिषेधानु

पपत्तेः॥ गृहमेधीये चाग्नेयस्याज्यभागस्य लक्षोपकारत्वाभावेनापूर्वत्वानापादकत्वात्सोम्यपुनः
श्रवणास्यैवैयर्थ्योपपत्तेश्च॥ सौम्यमाज्यविधानेनापूर्वत्वकल्पने तु आग्नेयीनां आरादुपकारकत्वेनवि
धौवैरूप्यापत्तेश्च। अतः प्रकृतावेवतस्य आरादुपकारकत्वात्सोदायोदाव घाग्निदेवत्यत्वमेवन
ह्याग्निर्देवतायावाधः सूर्यदेवतायावाऊह इतिसिद्धं॥ ॥पशावपाति॥ ॥दैक्षे अग्नीषोमीय
स्यवपयाप्रचर्याग्नीषोमीयं पशुपुरोडाशं निर्वपतीत्यत्रकृतः पशुपुरोडाशयागोपि नोद्देशांशे
नपशुदेवतासंस्कारकः उभयत्रतद्धितांतनिर्देशाविशेषात्तेभयोरप्यारादुपकारकत्वावसाया
त्। नच पशुयागस्य ज्योतिष्टोमांगत्वेन फलवत्वादस्यैवतदीयदेवतासंस्कारकत्वमितिवाच्यं॥ सोम
प्रकरणाविशेषेणतन्नापि विनिगमनाविरहात्। पशुपुरोडाशसमाख्यायाः पश्वंगकत्वेनतत्
उत्तरकालकत्वेनवोपपत्तेः॥ नच याभ्यासमाम्नांगत्वं तत्रवाथभिप्रेतः॥ अतः पूर्ववदारादुपकारकत्व

१४

वाग्यं। एवं च सौत्रामण्यामाश्विनसारस्वतसुत्रामदेवताकेषु पशुषु ऐंद्रवारुणसावित्राः पुरोडाशा
अपूर्वा विधीयमाना नोत्कृष्टा भवंति। इतरथा यज्ञेनतद्देवताः पशुयागास्तेनैवोत्कर्षापत्तिरितिप्राप्ते
वाचनिकपशुयागधर्मसंदष्टत्वात् स्यपतदंगत्वावगतेस्तद्यदेवतासंस्कारकत्वमेव अतएव
पशुपुरोडाशसमाख्यापि पश्वंगत्वेनैवोपपन्नेति नतस्य वपाभ्याससमाम्नांगत्वापत्तिरप्याशंक्या। प
शुपदस्यापि स्ववाक्यपशुत्वव्यपाभ्यासांशेवेमध्यन्यायाशंकापि। अतश्चवपयाप्रचर्येत्संपर्का
त्वाभेपएवसंयोगः क्रमायोर्वेत्यन्यदेतत्। यत्तु सौत्रामण्यामन्यदेवताकानामुत्कर्षापत्तिरिति। त
त्र ऐंद्रादिदेवत्यपशुषु न्यायादेवतद्देवत्यपुरोडाशसिद्धेर्विधिवैयर्थ्यं। तः अतश्चतद्वाक्ये नप
शुपुरोडाशायागोद्देशेनदेवतांतरविधिस्तथात्वे पुरोडाशापदे तद्द्रव्ययागलक्षणापत्तेः। किंतु
पुरोडाशोद्देशेनैवाभ्युदितेष्टिवत्। तत्र चयागापेक्षायां योग्यत्वेयेवपुरोडाशयागस्यैवातिदेश

प्राप्तस्य संबंधः॥ अन्यस्य पुरोडाशाद्द्रव्यकत्वाभावात्। अतस्तस्य कार्ये दृष्टभावेन प्राप्तस्यापि वाच
निकदेवतांतरसंबंधात् प्राकृतकार्यमात्रं वा बोधितस्य प्राकृतकार्यांतरकल्पनयातत्रैव निवेशान्नोत्क
र्षः॥ यानि तु सौत्रामण्यां प्रकरणे एव तत्तत्स्वदेवत्यानि आश्विनं ह्यातासादिनास्करणपयोद्रव्यका
णि ग्रहणानि विहितानि तानि तद्धर्मे द्रवायवायवादिग्रहणोरश्विवयागापेक्षायामतिदेशप्राप्ते
पशुपुरोडाशयाग एव देवताविशिष्टग्रहणमंत्रस्तद्द्रव्यविनियोगं विधिः॥ नान्यत्र। अश्वि
श्विनादिदेवसत्त्वस्यान्यत्रासंभवात्ः प्रधानमंत्रपशुयागेषु चोक्तविशिष्टयश्च वरोधेन
द्रव्यांतरनिवेशानुपपत्तेः॥ अतो विभिन्नद्रव्यदेवतासंबंधद्धपादुत्पन्नवाक्यशिष्टात्माग्याज्ञे
कोदन्नत्वन्यायेन पशुपुरोडाशयागस्यासाम्यासः संपद्यते। न त्वाश्विदेवत्यस्य प्राकृते
मेव कार्यं ऐंद्रादिवैवंत्यस्य प्राकृतमिति सूत्रभाष्यकारयोरभिप्रायः॥ वार्तिककारस्य तु न

१५

तावत्करादिद्रव्यस्य पशुपुरोडाशे विनियोगः संभवति तस्येतद्दिष्यभावे देवतांतर एवकरुद्
त्वनाश्विदेवस्य त्वस्य तत्र प्रथकतो विकृतो वा प्रसिद्धेः॥ वक्ष्यमाणरीत्या तत्र पुरोडाशाद्द्रव्यकत्वस्यो
धोपदेशिकत्वेन करादिद्रव्यस्य निवेशानुपपत्तेश्च नापातिदेशप्राप्तप्रयाजादीनि निवेशः॥ तत्रा
गमस्तत्कुप्तदेवतावरोधेन ग्रहणं गमस्तद्देवतायाः प्रसंगेनोपकारकत्वानुपपत्तेः॥ अतो पु
पाल्कमंतिरमेव प्राकृतपशुपुरोडाशाङ्गकार्याय तद्दर्शपूर्णमासप्रकृतिकं विधीयते। न चैवं आ
वाहनमंत्रे पादेवतास्मरणोपस्वाहाकारादिमंत्रेणादार्थ्ये पुनः स्मरणवत्पशुपुरोडाशस्यापि
पुनःकरणोपपत्तिः॥ प्रकृतावाम्नानाधनुरोधेन तथाकल्पनेपि विकृतावाम्नानाधनुरोधे
न तथाकल्पनेपि विकृताधारमंत्रेण प्राकृतमंत्रबाधस्यैवेहापि पशुपुरोडाशबाधोपपत्तेः
न चैवं पशुपुरोडाशसंसोत्रामण्यामप्राप्तेः कथं तत्रैंद्रादिदेवतांतरविधिः॥ कुथं विस्नाप्राव

पिवोपकारपृष्ठभावेनैवमवादार्थप्राप्तेः। प्रकृते च देवतांतरविधानेन प्राकृतोपकारकास्य
वस्तुतो न निर्देशात्तत्पृष्ठभावेन पशुपुरोडाशयागस्यातिदेशासंभवात्कथं तत्र देवतांतर
विवर्धनेति चेत्। अत एवैन्द्राग्न्यादिवाक्ये द्व्यदेवताविशिष्टप्राकृतपशुपुरोडाशयागस्यैव
गृहमेधीय आज्यभागौ यजतीतिवत्प्राकृतकार्यार्थतया विधेयत्वांगीकारेण तान्नवतद्वदि
ह पशुपुरोडाशस्यैवप्रत्यभिज्ञाभावः। यद्यपि सोमामैन्द्रं तद्देवसंबद्धं पदं स्वदेवताः प
शावंदसर्थवादस्यैव प्रत्यभिज्ञापकत्वात्। अतो प्राकृतकार्य एव पशुपुरोडाशः सुरादिया
गान्तकमोतरमेव प्राकृतकार्योयन्नो। अत एव नैलेषां पशूनां पुरोडाशा विधंते गृहपुरो
डाश्नां ह्येतेप शववृत्ति लिंगमपि पुरोडाशास्तत्र नान्यानि देवतास्मरणानि न विधंते अपितु प्र
कृतान्यान्येव तानीति व्याख्येयं॥ ॥चरुः॥ ॥अत्र निर्दृत्तं वैश्वलाधिकरणे चरुश

ब्दस्यौदनवाचित्वं वाक्यत्रेषा न तु लोकप्रसिद्ध्या स्थालीवाचकत्वं लोकप्रसिद्धेर्लाक्षणिकत्वेनाप्युपप
त्तेरिति स्यार्थस्य विचारितस्य प्रयोजनं वाधोपयोगितया कथ्यते। स्थालीवाचित्वे हि सौर्यं चरुं निर्वा
पेत्स्यात्स्यात्प्रत्यनदनास्यत्वाद्दृष्टानुपपत्तेः संबंधसामान्येत्तद्धितमगाकृत्वस्य स्थाली सूर्यदेवसहवि
पाकसाधनत्वेन विधीयते। ततश्च कपालस्य वाधः। वस्तुतस्तु न तदापि आग्नेयविकारत्वं एव प्र
माणाभावात्सान्नाय्यविकारत्वे च स्थाल्याः प्राप्तत्वेनाविधेयत्वात्संबंधसामान्ये तद्धितांगीकारे
प्रमाणाभावाच्च चरुशब्दलक्ष्यस्थालीहविर्द्रव्ये नैव विधीयते अतश्च प्राकृतस्य द्रव्यविषय एव वाधः
ओदनवाचित्वे तु तस्य हविष्ट्वेनैवं योग्यत्वात्पुरोडाशस्य वाधः। तत्रापि चरुशब्दस्य याज्ञिक
प्रसिद्ध्या अनवस्रावितांतरूष्मपक्वतंदुलप्रकृतिकौदनवचनत्वउपपत्तौ येस्थापितत्वात्तस्य
च स्थालीमंतरेणैकस्मिन्नपि कपाले पाकानुपपत्तेः। कपालस्यतद्दृताष्टत्वादेश्च अर्थलोपाद्वा

धः॥ अत एव स्थाल्याश्चरुपाकान्यथानुपपत्त्यैवार्थप्राप्तत्वेन कपालस्यानापन्नत्वाभावान्न कपा
लधर्मा आसादनप्रोक्षणादयस्तत्र कार्याः॥ एवं चरौ संयवनाभावात्तद्धर्मः प्रणीतास्तद्धर्मश्च न
भवंति। कृतं कर्मैवं एवं पेषणस्यापि पुरोडाशसिद्ध्यर्थत्वेन चरुसिद्धेस्तद्व्यतिरेकेणापि जायमान
त्वाच्चरौ पेषणस्य बाधः॥ एवमुपधानादीनां कपालधर्माणामपि। वस्तुतस्तु। केचित्वनुपद
धातोस्तत्र कपालत्वस्याग्निहोत्रवदविवक्षितत्वाद्धविःपाकाधिकरणत्वस्य च स्थाल्यामपि सत्त्वा
द्धविःपाकसाधनीभूतवस्त्वग्न्याद्युपसादेरिवोपधानस्यापि याज्ञिकाचारसिद्धस्यप्राप्तिरविरुद्धः। अ
त एव तत्र न पाकविशेषत्वस्यापि अग्निहोत्रादिवदेव विवक्षा। एवं पात्राण्यासादयती। सादावपि पा
त्रत्वस्याविवक्षितत्वात्तत्साधनताप्रयत्नस्यैवाविवक्षितत्वेन स्थाल्या अपि तद्धर्मप्राप्तिरविरु
द्धा। अतश्च चरौ एतावंतो धर्माः स्थाल्यासादनं। प्रोक्षणं। आदेवयजवहेति अंगारनिरूहणं। ध्रुवा

१८

सीमूहेन स्थाल्यधिश्रयणं। तस्यां लौकिकजलं तत्र तंडुलावधर्मास्यदूहेन तंडुलप्रक्षेपः॥ प
र्यग्निकरणं अविदहंत। अग्ने हव्यं रक्षस्वेति प्रैषौ। आप्यायतामित्यभिघारणं शृतउत्स्नात।
रुद्वासनं। आर्द्रे स्थ मृत्युरिति पुनरभिघारणमित्यादयः प्रत्येतव्याः वाच्यास्तु प्रणीताः। पेष
णं। स्थाल्याउपर्यंगारस्थापनं। कपालयोगजयः संवापः संयवनं पिंडीकरणं। प्रथनत्वक्क
रणं। हविष्यंगारभस्माधारो यः। आपनिनयनं। सदनकरणं। भस्माद्युद्धारः क्षुद्रकरणं न स्वप्रकृता
वाधिकत्वात्॥ यत्तु आत्मे सधस्था स्वसंजननमित्यादयः॥ अत्र सर्वत्रार्थलोपोद्धृत्यानुसंधेयः॥
इति श्रीखंडदेवकृतौ भाट्टदीपिकायां दशमस्य प्रथमः॥ ॥कृष्णलेषु॥ ॥कृष्णलचरौ
पाकः कर्तव्यो नेति चिंतायां कृष्णलानामेवहविष्ट्वात्तेषां च मध्यमेयपाणामंतरेणापि तत्त्वादर्थ
लोपादकरणं यत्तु घृते श्रपतीति तत्प्रकरणे वचनं तत्त्रिपणविधायकं। तततत्फ

लानुकूलव्यापारस्यैव पश्चाद्धर्मत्वेन स्थापितत्वात्संस्कृते रूपरसादिपरावृत्तिरूपविकृत्यास्य फ
लस्यासंभवेन श्रयणानुपपत्तेः ॥ अपितु कृष्णलानां घनताधिकरणकत्वधायकः श्रपयतिस्तु
तंडुलपाकेपि द्रवसंयोगस्याल्लक्षणयानुवादः ॥ अतएव न तत्राग्निसंयोगरूपोक्तापोपि
कार्योपि न तस्य छभावेन गार्हपत्योपि प्राप्यतेति प्राप्ते । घनताधिकरणकत्वस्यैव सतिवाक्यादि
वप्राप्तेरेवद्वाक्यवैयर्थ्यप्रसंगाद् अग्निसंयोग एवात्र पाकाविनाभूतत्वाल्लक्षणया घनताधिक
रणकत्वविशिष्टः शुद्धोवा विधीयते तस्य च लाघवात्साक्षात्तस्यैव प्रतिप्रसवतया विधिः ॥ य
द्यपि च नाग्निसंयोगमात्रस्य प्रकृतौ पृथक् विधिरस्ति तथापि श्रपणविधिनैव तद्विरा
मकक्रियांतरविधिवदस्यापि अर्थतो विहितत्वात्प्रतिप्रसवोपपत्तिः ॥ अतएव तन्मात्रा १९
गभूतस्य गार्हपत्यादेरपि पेषणादि प्रतिप्रसवांतरविधिन्यायेन प्राप्तेर्न किंचिद्बाधकं ॥ अ

तएवात्र मुख्यश्रपणाभावान्नान्ये श्रपणधर्माः कार्याः ॥ अपितु अग्निसंयोगांगभूता एव प्रधानं
नायमानं ह्यातिप्रायेनैतद्ध्येयं ॥ ॥ उपस्तरणः ॥ ॥ तत्रैवोपस्तरणाभिघारणे कार्ये न वेति
चिंतायां प्रकृतावदृष्टार्थत्वात्कार्ये एवं । नन्वोपस्तरणाभिघारणसमंत्रादुत्तिमेवेनां करोतीति
वाक्यशेषेण तयोः स्वादिमार्थत्वावगतेः कृष्णलानां चानदनीयत्वेन तदभावाल्लोप इति वाच्यं
देवतायामोगाभावेन तस्यार्थवादमात्रत्वात् । यद्यपि च प्रकृतावेषां नादृष्टार्थता कल्प्यते किं
तु चतुरवत्तसंपत्त्यर्थतैव तथापि कृष्णलचरावलोपः । न च तदापि चातुरवत्यादि कृष्णलान्य
वद्यति च तु रवत्तस्याध्यास इति वचने नावदानानुवादे न कृष्णलचतुष्कविधानात्तेन च चतुरवत्तसं
पत्त्यनुवादाल्लाघवात् द्वितीयचतुष्कस्यानापत्तेरवगतेरुपस्तरणाभिघारणसाधनीभूताज्यस्य
वाध इति वाच्यं । तथात्वे वाक्यानुवादानुपपत्तेः । न च खिन्नकृष्णलाभिप्रायेणानुवादः । प्रमाणाभा

वात्ः हवीरूपद्रव्यस्य चतुष्ट्वविधानस्यांगुष्ठपर्वमात्रस्यापन्नतयाप्रसंभवेन प्रधानमात्रेऽपि
वासोपतेश्च चतुरवत्तसंपत्त्यनुवादस्य द्रव्यस्य चतुष्ट्वावदानस्यापि चतुरवत्तसंपादकत्वमुप
स्तरणाभिघारणसाहाय्येनास्तीति नैव विरुध्यते। अतश्च चतुरवत्तसंपत्त्यर्थत्वादुपिकर्तेऽपि एवो
पस्तरणाभिघारणयोर्न हि तयोः प्रकृतौ सूक्ष्माणां पुरोडाशावद्यानां स्वविसंसर्गोपपतेराहवनीय
पातासंभवेन तद्द्वाहस्पर्शत्वाक्षुल्लेषु वतस्मसत्त्वाभावाल्लौ पद इति वाच्यं तत्पालेऽउपस्तरणाभिघा
रणयोरन्यतरेणापि तत्सिद्धाविकस्यापत्तेः। ध्यानावयाद्दोः संसर्गोपसन्नपातनदनापत्तेश्च प्रकृ
तौ चतुरवत्तसंपत्त्यर्थत्वाभावेऽपादोपयावदानादिसिध्यर्थे अभिघारणाद्यनापत्तेश्चेति प्रोक्षे
ह्रष्टाद्येत्वायासंसर्गे एवं तयोः प्रयोजनात् ननु चतुरवत्तसंपत्तिः। तस्य प्रकृतावविहितत्वा। चतुर
त्तं जुहोतीत्यस्मात् हि अवत्तोद्देशेन प्रसे यो विधीयते चतुःपदं तु उपस्तरणाद्यभिप्रायेण अनुवादः॥ १९

इतरथा विशिष्टोद्देशे वाक्यभेदात् गौरवाच्च। अतश्च चतुरवत्तस्योद्देश्यत्वेनैवाप्रसिद्धौ विधेयत्वे तु
सुतरामप्रसिद्धेर्न तत्संपत्त्यर्थतोपस्तरणाभिघारणयोः। अतो संसर्गमात्रार्थत्वादकरणं स्कन्ने
ष्वतयोरिति मूलानुयायिनः। वस्तुतस्तु चतुःशब्दस्य प्रमादपाठापत्तेरुद्देश्यतावच्छेदककोटिप्रवि
ष्टत्वमस्त्येव कारकतातिरिक्तसंबंधेन विशिष्टस्य चतुरन्तत्वान्न वाक्यभेदः। अत एवोद्देश्यतास
धानुपपत्त्या चतुरवदानस्य विधिवन्मना। अत एव यथायां संस्कृतावदानविधानेऽपि प्राकृतस्य चतुरव
त्तस्य प्राप्त्येर्यद्यपि चतुरवत्तातिनिर्देशसंगच्छते इतरथा असंसर्गार्थसंस्कृते वोपस्तरणाभिघार
णप्राप्तेः अवत्तातिनिर्देशापत्तेः। अत उपस्तरणाभिघारणयोः प्रकृतौ असंसर्गवच्चतुःसंख्यासंप
त्तिरपि प्रयोजनं। तत्त्वेनाथान्विशेषः। अदसंसर्गास्येव मुख्यप्रयोजकता वैतुष्यवत् दृष्टार्थत्वात् च
तुःसंख्यायास्तत्सत्त्वस्यैव। अतश्च यत्रैव नावघातादयो वैतुष्याभावे नियमादृष्टं न प्रयत्यन्ते। अपि तु

तत्संभव एव। तथा असंसर्गप्रयोजनसत्त्व एव चतुःसंख्यासंपत्त्या उपस्तरणाभिघारणे प्रयुज्ये
ते नान्यदा। अतश्च पञ्चावत्तिषु नियमादृष्टार्थमवदानाकरणे चतुःसंख्यासंपत्त्यर्थमुपस्तरणा
भिघारणकरणं एकं केवलधानादियागेऽपि सवनीयहविःषु संप्रतिपन्नदेवताकत्वात्पुरोडाशाद्य
र्थे तदनुष्ठानं। वपाहृदयादौ तु कतिपयावयवसंसर्गस्यैव संभावित निवृत्त्यर्थे तदावश्यकत्वेऽपि
चावदानसंपत्त्यर्थेन द्विर्द्विरपि कस्यचन प्रकारादिसंमतत्वासंगच्छते। एवं एककपाले सर्वहोमे।
ऽपि चतुरवत्तादिसंपत्त्यर्थेन द्विर्द्विः। न त्वापि संसर्गस्य संभावितत्वात्। प्रकृते तु संसर्गस्यासंभा
वितत्वात्प्रकृतोपस्तरणादिकरण एव तत्संभावनान्निवृत्तिस्तयोः॥ ॥भक्षणं॥ ॥प्रकृ
तौ शेषभक्षाः शेषप्रतिपत्त्यर्था इति वक्ष्यते। शेषप्रतिपत्त्यर्थत्वेऽपि च प्रधानशेषन्यायेन चतुःकरि
ष्यमाणकर्मणि क्वमाथो अपास्यपुरुषच्छोतन्न च प्रतिपत्तेः प्रयोजकत्वस्य सत्त्वात्पञ्चावत्तेषु कर्तव्या

२०

एव ते। यदा तु पञ्चत्वाविंतया शुद्धकन्प्रासर्थत्वं तदा ते तत्र भवंति न वेति चिंतायां पञ्चत्वानामनद
नीयत्वेन प्रासयोग्यत्वादर्थलोपाद्बाधः। न चाद्विरवयस्य निरवधयं तो भक्षयंति चतुश्चषाकारमिति
वचनेन प्रतिप्रसवः। योग्यातयात्राऽस्यैव द्विरवयाधारस्याभक्ष्यविधानात्। द्विरवयस्य निरवध
यं तर्दलस्य हिरण्यं पलक्षेलर्थात्। यदा तु भाष्यानुसाराद्द्विरवयास्येति नयज्यते तदाऽस्यैव निरव
वानंदंतासयोगः। अत एव कञ्चषाकारमिलयनुवादः। आज्यभक्षणे तदावश्यकत्वात्। अतश्चा
प्राकृतमिदं भक्षणमारादुपकारकमधिकरणाभ्नत्वाऽज्यप्रतिपत्तिर्वेति न तत्र प्राकृतानां भक्षधर्मा
कार्या इति प्राप्ते। प्रधानाच्चयस्याभ्यर्हितत्वाद्द्विरवयस्यैव भक्षणं न त्वाज्यस्य निरवधयतं इलस्य
दंतेन पीडनमकुर्वंतद्दलस्यार्थात्। अतो लाघवाद्विभंशस्यैव प्रतिप्रसवो विधिः॥ स च चतु[illegible]
चूषाकारत्वविशिष्टस्य प्रधानाच्चयानुरोधेन पंचमविधिप्रकारस्यानंगीकारात्। वस्तुतस्तु स्वसंपत्ता

न्याभिप्रायेण चतुर्भूषाकारत्वस्याप्यनुवाद एव। अतश्च पेषणन्यायेन कार्य एव भक्षधर्मो भक्षाश्व
कृत्ताविंतोत्रु घाटने तु प्राप्तभक्षानुवदिनं दं तत्संयोग एव निषिध्यत इति विवेकः॥ ॥एकधोप
हारः॥ ॥कृष्णलचरौ वैवेकधा ब्रह्मण उपहरति। निष्कृष्टं तत्र एकधाशब्दस्योकप्रयत्नसा
ध्यत्वाख्येसकृत्त्वे एककालकृत्वाख्ये सहत्वे वा लोके प्रयोगात् किमनेन विधीयत इति चिंतायां
प्रकृतौ द्रव्यप्राशित्र चतुर्धाकरणशंवाककालभक्षाणां मध्ये सकृत्त्वविधानाद्राघस्यैव करण
मितरेषां निवृत्तिः सहत्वविधानाद्धि सर्वेषां योग्यपर्यंतत्वानियमे प्राप्तेऽयत एवायं विधिः साधा
रणोऽत एवातिदेशेन हविःसंस्कारकृतयाप्राप्तानां भक्षाणां वाधेप्रमाणाभावात् सहत्वमेव सर्वेषां
विधीयते अल्प चतश्छेषभक्षणार्थानां तत्तद्दरणानामेवोद्देशेन सहत्वं विधीयते भक्षणेनानाका
लीनत्वस्य वक्ष्यमाणत्वात्। ब्रह्मसंबंधश्च वक्ष्यमाणन्यायेनानुवाद इति न विशिष्टोद्देशः। अतः सह

२१

त्वविधानात् कालस्यैव प्रत्याम्नानात् बाधः॥ ॥सर्वत्वं॥ ॥तत्रैव सर्वं ब्रह्मणे परिहरतीति श्रुतं
तद्देनेन ब्रह्मभागस्य सर्वस्य परिहरणीयत्वविधाने तस्य वा परिहरणीयस्य सर्वत्वविधाने विशिष्टो
द्देशात् वाक्यवैय्यर्थ्याच्च सर्वोद्देशेन ब्रह्मसंबंधो विधीयते परिहारस्य च पूर्ववाक्ये उद्देश्यत्वेन प्रसभि
ज्ञायमानत्वादाश्रयत्वं अतश्च परिहरतीत्ययमनुवादः। अत एव पूर्ववाक्ये परिहारस्य कर्मोपेक्षा
यां कृष्णलशेषस्य पूर्वं प्रकृतस्य प्राधान्यानोपस्थितस्यान्वितत्वात् तत्परिहार एवाश्रयो न त्वन्वाहः।
यदि परिहारः। अथवा यपरिहरणोद्देशेनैव ब्रह्मसंबंधः प्रकृतिप्राप्तेः पूर्वं विधीयते तत्फलं च अ
वच्छेदकावच्छेदेन ब्रह्मसंबंधविधानात् ब्रह्मभागस्य तत्संबंधप्राप्तावपि पुरुषांतरभागस्य तत्सं
बंधसिद्धिः सर्वत्ववादः॥ अतश्च भागांतरे पुनः प्रत्याम्नानात् पुरुषांतरस्याबाधः। एवं च निरवधपं
तोदं ताभक्षयंतीति वहुवचनं व्याख्येयं एतद्व्याद्वा पुरुषांतरबाधो वैकल्पिकः पूर्वपक्षसावि

शिष्टप्राकृतत्वमद्रष्टविधानाच्चनवाक्यभेदः॥ ॥पुरुषायनयानत्॥ ॥सर्वेषांशेषाणां
युगपदुपसंहृतानांयुगपदेवब्रह्मणाभक्षमुतततत्प्राकृतकालइतिचिंतायांपरिहारस्यभ
क्षार्थत्वात्तेनैवानेनसहत्वंनामांतरेणविधीयतेइतरथासर्वेषांवाक्येब्रह्मसंबंधस्यापिपरि
हारमात्रेविधानापत्तेःपुरुषांतराणामपिभक्षापत्तिरितिप्राप्ते॥सर्वत्वस्यपरिहारमात्रेवि
धावदृष्टार्थत्वापत्तेयुक्तंभक्षेपुरुषांतरनिवर्तकत्वंसहत्वस्यतुपरिहारमात्रेविधावप्यदृष्टा
र्थत्वाभावाद्युगपत्सर्वब्रह्मणोपरिहृतत्वेततत्कालेनैवभक्षणोपपत्तेर्भक्षणेप्राकृतकालबाधः॥
एकार्थत्वात्॥ ॥प्रकृतौपुरोडाशस्यचतुर्धाकरणंबर्हिषदकरणंचविधायइदंब्रह्मणइद
होतुरिदमध्वर्योरिदमग्नीधइतिव्यादेशआम्नातःसएकपालेषुसर्वेष्वेवब्रह्मणाभक्षणोप
लाक्षकर्तव्यः॥ नहिहोत्रादिसंबंधाभावेइदंहोतुरित्यादिव्यपदेशोयुज्यते अतश्चोद्यावर्त्तेनी

३३

याभावादिदंब्रह्मणइत्यपिननचैवंचतुर्धाकरणस्यापिप्रयोजनाभावःसर्वपरिहरणीयोद्देश
नसहत्वविधानादेवतदावश्यकत्वात्यदितुतत्तत्कालकर्तव्यभक्षणार्थपरिहरणीयानामेवसह
त्वविधिरितिविभाव्यतेतदामास्तुतत्रस्यादस्यानर्थक्यमपिवर्हिषत्करणंतुसर्वेषांत्वात्कृष्णलानांवतु
र्धाकरणोत्तरकालाभावाच्चानिवर्तेतरत्यभ्यदेनत्॥ ॥ऋत्विक्दानं॥ ॥ऋत्विक्कर्म्या
दक्षिणांददातीतितत्रकृतंदक्षिणादानंनारादुपकारकं अपितुदृष्टार्थत्वलाभायापेक्षिता
नस्पर्शमेवानियमादृष्टस्यकल्पनीयत्वाच्चनधर्मविधिवैयर्थ्यं अतःसर्वेस्वतएवानतत्वेन
नतत्सिध्यर्थंदक्षिणाप्रदानमितिसिद्धं अतएवनान्नर्गोदीयतइतिनिषेधानुवादोपिविध्यंतरशे
षत्वात्संगच्छते॥ ॥शेषभक्षाः॥ ॥शेषभक्षास्तत्रतत्रविहिताःयासंस्थागाद्ध्वविप्रतिपत्तयोः
प्रयोजनशेषस्यायेनकर्तुःकरिष्यमाणकर्मणिवलाधानार्थोश्वनत्वानसर्पा॥ तस्यापकृ

तावानुषंगिकेष्वपि प्रयोजकत्वाभावात् अस्तुवादृष्टप्रयोजनत्वाविशेषात्त्रयाणामपि प्रयोज
कत्वं न त्वानतिमात्रस्य: अतः सत्रे तद्भावेपि प्रतिपत्त्यापर्थकर्तव्या एव:॥ ॥वरण॥ ॥प
रिक्रयवद्वरणमपि क्रत्विगानत्वार्थत्वात्सत्रेन कार्यमेव न हि तद्दृष्टरूपक्रत्विकसंपत्त्यर्थं
क्रत्विकत्वस्यादृष्टरूपत्वे प्रमाणाभावस्य तत्तादर्थ्यसाधिनत्वात् न वाक्रतुयाज्यावरणवत्व
तन्त्रादृष्टार्थे प्रमाणाभावात्: सिद्धमपि चैवमादि वाधलक्षणे शिष्यहितार्थं कथ्यतइति विवेक
उदवसायनीयः॥ ॥अनारभ्य सत्राउदवसायदृष्टशमनीयेन सह तदुक्षिणेन वजेरन्नूर
तिमुर्तसोयं दृष्टशामनीयः प्रकृतिविकृतिसाधारणसत्रमात्राङ्गं उत सत्रोदवसानेनिमित्ते
नैमित्तिकोयं स्वतंत्रइति चिंतायां सत्राणां फलवत्वाद् फलोयं वृहस्पतिसवन्यायेन सत्राङ्गं य
घपि वा सत्रोदवसानं निमित्त तथापि अन्यच प्रतिग्रहे छिन्न्यायेन सत्राङ्गं न चोत्पूर्वकस्यावसा

२३

नेस्तद्विषयकव्यापारोपरमवाचित्वादंगत्वे चास्यापि तद्विषयकव्यापारत्वावश्यमनावश्यातःक
रणसंभवेन सत्रत्वावच्छिन्नविषयकव्यापारसामान्योपरमस्याकदापि निश्चेतुमशक्यत्वात्: अ
नस्त्वयापि तद्व्यक्तिप्रयोगोपरमएवोदवसानपदार्थो वाच्यः॥ सच ममापि संभवतीति युक्तमेग
त्वं वृहस्पतिसवादिवत् न चैवमंगप्रधानयोरेककर्तृत्वाघजमानैरेवकरणापत्तौ दक्षिण
त्वानानुपपत्तिः॥ तस्या अदृष्टार्थत्वांगीकारेणकर्मकरेभ्योपि दानाद्यभ्यो दानोपपत्तेः॥ वस्तु
तस्तु अंगत्वेपि प्रयोगवकें हि भेदेन त्वेन दृष्टविशामनीयस्य क्रत्विकर्तृकत्वोपपत्तेर्वृहस्पति
सववद्दक्षिणत्वानं न विरुध्यंते ये यतेजमानास्त क्रत्विजइत्यनेन न हि सत्रप्रयोगमध्यवसा
विंज्याहे नैवावान पयप्रयोगमध्यवर्तिपूपोपसदांक्षीदे त्रोनसक्षदद्वारतित्वादिविधिव
घजमानविधानाद्वृहस्पतिसवपूपादावातिदेशाव धर्मप्राप्तिवदिंहापि क्रत्विगंतरस्यैव

भाष्युपपत्तिः॥ अतश्च दक्षिणाम्नानस्यात्युपपत्तेरंगमेव षष्ठे ग्रामनीयरति प्राप्ते सन्नादवसायस्य
ऋतुखर्वेकस्यावसानेः सन्नत्वाविच्छिन्नोपधेयफलव्याप्त्यदेवयकस्याधारसामान्योपरमवाविवा
त्तस्यपि सन्नोत्तरस्याग्नेकत्वेन्नत्वे एतत्सन्नोपधेयफलव्याप्तेर्व्यापारांतराभावेनोदवसानोपपत्तेरं
गत्वे च तदसंभवाद नंगत्वं वाजपेये नैष्ठासस्यार्थपौर्णमासीमिस्तोदौ तु प्रयोगसमाप्तिमात्रस्ये
वोक्ते नांगत्वविघातः॥ अतः सन्नोदवसाने निमित्ते नैमित्तिको यंपुरुषार्थतया विधीयते अत
श्च तदकरणे प्रत्यवायः करणाच्च पापध्वंसः प्रयोजनं अंगत्वे सन्नाधिकारिभिः संहत्य सन्न।
त्विगंतरसंपादनेन करणं अनंगत्वे तु वस्यति अत एवातिदेशिकस्य कर्तृकत्वस्य साक्षाद्दृष्टा
दिनाबाध फलकत्वाद् व्यायसंगतिः॥ ॥निर्धातु॥ ॥अनंगत्वेपि संहत्यैव करणं आ
ख्यातोपात्तस्याबहुत्वस्योपादेयेकर्तृगामित्वेन सत्रवाक्यार्थविवक्षितत्वात् कथं चिन्माप्त

त्वेपि सहत्य प्रयोगसिध्यर्थं सत्ष्टीरूपदर्धाति सोमेनेयजेते त्यादि यद्वृश्टि च विधं गणकारेण प्रयो
जनसिध्यर्थं विध्युपपत्तेश्च॥ स्थितं तावद् पर्यवसितं॥ ॥तन्मान्यात्॥ ॥अनंगत्वे अंगत्वे
पि वोदवसानसमानकर्तृकत्वानुरोधाद्यजमानैरेवाखिलं त्वं कर्तव्यं न च तस्य प्रधानमात्राभि।
प्रायत्वेनोपपत्तिः॥ सांगे समानकर्तृकत्वश्रवणेनाश्ववमध्येन चरंती सा द्वाव भिराहवनीयादे
त्रिकेन यजमानकर्तृकत्वेनांगेष्वपि कर्तृत्विकर्तृकत्व बाधात्॥ दक्षिणादानस्याह ष्टार्थत्वेना
प्युपपत्तेश्चेति प्राप्ते प्रयोजककर्तृत्वेनापि प्रकृता विवयजमानकर्तृकत्वोपपत्तेरंगत्वेपि वा
सोर्याद्वावि व अतिदेशप्राप्तं कर्तृत्विकर्तृकत्वाधे प्रमाणाभाव॥ एवं च दक्षिणा कृतिरयां जस्येनो
पपद्यते॥ स्थितादनंतरं। न षष्ठ ग्रामनीये संहत्य प्रयोगः। बहुत्वस्य प्राधान्येनाविधेयत्वात्॥
उदवसाने हि अनेकेषां सत्रकर्तृणां कर्तृत्वं प्राप्तमेव अतस्तत्समानकर्तृकत्वादेव षष्ठग्रा

मनीयेपि तत्प्राप्तिका अन्यस्यादि पूर्वकालत्ववत्समानकर्तृकत्वमप्यनुशासनवलाद्धाव्यं न चाम
यहुत्वेनास्वभावत्वात्कत्वाकांक्षाप्रकारक्रमस्य चेमनुतक्रियायाऽतंत्रसंपन्ननुवादासाक्रतावदे
यचतुष्कस्यानाय समवगतेरुपस्तरणाभिघारणसाधनीभूतान्यस्यवाधदतिवाच्यं तथात्वेवा
स्यानुवादानुपपत्तेः॥ न च विशिष्टक्रदभिप्रायेणानुवादः॥ प्रमाणाभावात्ः द्वीरूपद्दृष्टफलचतुष्क
विधानास्यांगुष्ठपर्वमात्रस्यानापन्नतयापिसंभवेन प्रधानमात्रोपि वीसोपत्तेश्च चतुरवत्त
संपन्ननुवादस्तक्रफलवत्वच्छवदानस्यापि चतुरवत्तसंपादकत्वमुपस्तरणाभिघारण
साहुष्यिनास्त्री तिनैव विरुध्यते अतश्चतुरवत्तसंपन्नसप्तलाद्यधिकत्वे एवोपस्तरणाभिघार
णो। नहितयोः प्रकृतौ सूक्ष्माणां पुरोडाशावयवानां क्वचित्संसर्गोपपत्तेरगृहवनीयपातासंभवेन
तद्यावृत्तसर्वत्रान्यत्र फलेषु वत्तत्वसत्वाभावाद्वोपदतिवाच्यं तथात्वेउपस्तरणाभिघारणयो

२५

रन्तरेणापतत्सिद्धाविकल्यापत्तेः॥ धानावयवांदौ संसर्गोपसत्यातरनापत्तेश्च प्रकृतौ चतुरव
त्तसंपन्नसर्वत्वाभावेवपादोपं चावदानादिसिध्यर्थं अभिघारणाद्वक्षनापत्तेश्चेति प्रासेहच्छार्थत्वा
यासंसर्ग एव तयोजननं न तु चतुरवत्तसंपत्तिः॥ तस्य प्रकृता वविहितत्वात् चतुरवत्तं जुहोतीत्य
त्रहि अवत्तोद्देशेन प्रक्षेपो विधीयते चतुःपदं तु उपस्तरणाद्यभिप्रायेण अनुवादः॥ एतरथावि
शिष्टोद्देशो वा॥ रक्रियायामन्वयेपूर्वकालत्वसमानकर्तृत्वयोः संसर्गत्वेनैव बोधोपपत्तेर्नेनपोक्त
स्यातिरिक्तात्वात्किरितिवाच्यं पदार्थानुशासनप्रवृत्तपाणिन्यादेः संसर्गानुशासकत्वविरोधात्
किं च क्त्वाप्रत्ययानिम्न तथात्वस्यैवातरक्रियासंबंधः क्त्वा च संसर्गेतास्वयेपाहककत्वकल्पनेपवा
च्छार्थभाव एवेनिरुक्तोभयसंसर्गेणोतरक्रियायामन्वेतातिविवेद् व्यं तत्रनतावदाघः क्त्वात्ता
नत्वेनैवतास्वर्यग्राहकत्वे अगृहीतसंकेतस्यापिनासुर्युपरायत्तेः॥ तासर्वे ग्राहकत्वप्रकार

कर्तृज्ञानत्वे आत्माश्रयापत्तेः॥ एकत्वादिशून्यद्वितीयादेः कर्मत्वादिसंसर्गतासत्त्वे तादृशकर्तृत्वेनैवो
पपत्तौ प्रातिपदिकार्थस्यैव कर्मत्वादिसंसर्गेण क्रियायामन्वयार्थं तैः कर्मत्वादेः द्वितीयादेः शू
न्यनापत्तिश्च। अत एव नांशः संख्याख्याताद्येकत्वसमानाधिकरणकर्मत्वादिसंसर्गेण क्रिया
न्वयापत्तेः॥ अतोनुशासनबलात् कर्मत्वादिवदेकत्वपूर्वकाद्यत्वादेरपि वाच्यत्वं अस्तु वा न तथा
पि न दोषः॥ अतस्तत्तावदनुवादः॥ एकेन पदेनानेकेषामुपादानेन प्रतीयमानकर्तृत्वसाहित्यमपि
न तावदवसाने विवक्षितं निमित्तविशेषणत्वात्तुः सत्त्वे संहृकर्तृत्वे पितृसागे साहित्ये विनैव
कर्तृत्वाच्चयो पि द्वंद्वसंयोगादिरूपोऽभ्यासेन्यवृत्तिः धर्मः स तद्भावः प्रत्येकवृत्तेव किमुत यदास
त्रे बहुवचनानुरोधात् सोऽकर्मेवकर्तृत्वं कर्तृणां परं समुच्चयस्तदानत्यागे साहित्याभाव कः
संदेहः आख्यातोपात्तबहुत्वावगतसाहित्यं तु बहुत्वस्याविवक्षितत्वे अविवक्षितमेव। उदवसा

साने हि यादृशा निरपेक्षाः कर्तारस्तादृशा एव समानवर्तृकत्वबलेन ष्टष्टशामनीयेव गम्यन्ते अ
तः प्रथमावगतनैरपेक्ष्यबलेन साहित्याविवक्षानन्नैरपेक्ष्यानंगीकारेपि प्रत्यवंतोपात्तसमा
नकर्तृकत्वाविरोधाद्बहुत्वस्य तदवगतसाहित्यस्य चाविवक्षोपपत्तिः॥ विशिष्टविध्यगौरवम
येन संभवत्याप्तिकस्य बहुत्वस्यानुवादांगीकारात् अत एव ष्टष्टशामनीयमात्रविधानाद्वि
धेर्लाघवं न वसरकारविध्यन्यथानुपपत्त्यादिना संभवत्याप्तिकस्यापि सामादेः सक्त्वाद्बसा
दिरूपप्रयोजनसिध्यार्थं विशिष्टविध्याश्रयेण वर्द्धितिपि साहित्यस्य सिध्यर्थं बहुत्वविध्याश्र
यणमिति वाच्यं सोमादिपदं वैष्णव्येमियात तथाप्रयोपि प्रकृते न बहुवचनस्यावजनायन
यानुवादत्वोपपत्तेः॥ अत एकेकश्चेनैव ष्टष्टशामनीयः कार्यैरिति न तन्नप्राकृतकर्तृकत्वबा
धः॥ ॥वामेष्टोः॥ ॥सारस्वते सत्रे बप्लाः संप्रसत्रिणा प्राप्यतयैकामाया छाक्पात्रं निर्वे

थंतितस्यां अखंडपुरुषावधेनुकेदृक्षारितिष्कृतं तंत्रनतावद्दिदृक्षोरवसानवत्सस्तत्र पापाते
निमित्ततायेनतद्देवकामेष्टिः प्रसेकमेव ऋत्विगंतरोपादानेन कूरणमार्गं केतसरस्वतीवि
नत्रानादारम्यपुष्पाक्षप्रस्नवणयर्थतंसत्रदेशाविधानादेव पोष्टेरर्थमाप्राप्या अनुवादमात्रत्वा
त् अतो न तावल्लौकिकं करणं सत्रवत्तु संदृष्टापि करणे किं ऋत्विगंतरं समुपादेयं न वेति चिं
तायां दानस्यादृष्टार्थत्वकल्पनामिया ऋत्विगानमनार्थत्वावगतेः ऋत्विगंतरोपादानं न
वास्य सत्रत्वेनातिदेशिकस्य ऋत्विक्यजमानाभेदस्य प्राप्तेर्न ऋत्विगंतरोपादानमिति
वाच्यं अस्य संवत्सरांगत्वेन सत्रत्वाभावात् अत्र हि सारस्वते सत्रे पौर्णमास्युत्तरप्रतिप
द्दिर्शो संज्ञक एकाहः अमावास्योत्तरप्रतिपदि चातुर्संज्ञकः॥ अनयोः शुक्लकृष्णभेद शीके
क्ष्णः पक्षे पौर्णमासदर्शवत्क्रमेण कृप्तिः॥ तत्र च सोमयागस्येव प्राधान्यं अस्त्केवालं च सो

त्याकोऽयपाधिनामयनवद्दर्शपूर्णमासयोरपि कामेष्टेरंगत्वम विवादमेव नवत्तथापि प्रकृ
तौ ह्यादशाहे आर्त्विज्यएव यजमानजमानविभेस्तस्यत्वांगमात्रविषयत्वात्कामेष्ट्यंगेषूपित
स्तत्वविरोधइतिवाच्यं प्राकृतऋत्विक्कर्तव्यपदार्थेषु यजमानकर्तृकत्वप्राप्तावपि यूपाव
टस्तरणावर्हिस्त्वयिन अप्राकृतकायापन्नायां कामेष्टौ तत्प्राप्त्यनुपपत्तेः॥ कथंचित्प्राप्ताव
पि वा कामेष्ट्यतिदेशेनैष्टिकेन ऋत्विगंतरस्य विशेषविहितस्य प्राप्तत्वेन तस्य बाधा
च्चयद्यपि हि अतिदिश्यमानपदार्थविषयेहृयोरपतिदेशयोः सामान्यविषयत्वं तथापि
ऐष्टिकातिदेशो कामेष्टेरेवोद्देश्यत्वात् तस्य वविशेषविषयत्वं एवं सत्यपि यादियजमाना
स्त ऋत्विजः सत्रस्सारस्वतसत्रेहृपदेशो भवेत दासोमिकाद्वेषादेश्यादिष्वेष्टैककुवेद
वाधस्यैवावभृथांगेषु अभिराहवनायवाधस्येव चोपदेशिकयजमानभेदेनैष्टिक

ऋत्विग्गतरवाधोभवेन्नत्वेतदस्तितस्यद्वादशाहेपठितत्वेनेहसत्त्रातिदेशेनैवप्राप्तेः॥ नवत
यपितस्यप्रधानीयत्वादेष्टिककामेष्ट्यतिदेशासंकोचकत्वेनतस्यस्वरूपेणप्रधानीयत्वेपियज
मानाभेदस्याविस्पष्टत्वभावेनप्राप्तेस्यांगमात्रविषयत्वेनप्रधानीयत्वाभावात्॥ अतःकामे
ष्टौऋत्विग्गतरस्याबाधइतिप्राप्तेप्राकृततत्त्ववनादिपदार्थानामासादनार्थबर्हिःष्ठभावेने
नैवप्राप्तेषूपावटस्तरणबर्हिःषेनप्रायकंप्रमाणंनवातस्यमृत्तत्वंतरवर्तिनोम्नप्रसगे
नोपकारकत्वंप्रकृतेत्वयजमानाभेदस्यद्वादशाहिकऋत्विक्कर्तव्यपदार्थमात्रोद्देशेनवि
धानात्कामेष्ट्यांगभूतऋत्विक्कर्तव्यपदार्थेषुप्रापकप्रमाणाभावेपिकामेष्टेःसत्रत्वमहा
प्रयोगसद्भवतित्वात्सत्रादौयजमानैःकृतस्यऋत्विक्त्वाध्यवसायस्यसत्रसमाप्तेःकामेष्टावत
रकर्तव्यसत्रपदार्थोसिध्यर्थमावश्यकत्वात्तेनैवकामेष्टावुपकारसिद्धेर्नेष्टप्रकृत्स्वसिध्यसि

२८

र्थवरणमरणाक्षेपः॥ प्रकृतेतोहिनऋत्विक्षुयजमानभेदःसाक्षाद्विहितः॥ अपितुऋत्विक्त्वाध्य
वसायसिध्यर्थंवरणमरणमात्रानात्वार्थिकः॥ अतएवतदध्यवसायसत्राथमपिस्वतएवसिद्धे
पशुपुरोडाशेचोदकेनप्रयाजादेरिवकामेष्ट्यतिदेशेनापिनवरणमरणादेस्तुदेर्थमतिदे
शः॥ अतएवयत्रसौमिकवेदेतरमपूर्वोदर्शपिकारःशुनस्तत्रसौमिकवेद्यैवप्रसंगसि
द्धेनैष्टिकवेदिरपिनहितत्रसौमिकवेदिरंगतस्याःप्रकृतांगप्रधानमात्रार्थत्वेनविहि
तायाआपूर्वागेउपदेशातिदेशाभ्यामप्राप्तेः॥ अतस्तत्रप्रसंगसिद्धिरेवकामेष्टेस्तुदेशांत
रायवात्वात्प्रसंगासिध्यनुपपत्तेरैष्टिकीवेदिरविशेषः॥ ऋत्विक्षुतुप्रसंगसिद्धेर्नेऋ
त्विग्गतरमितिसिद्धं॥ ननैवंऋत्विग्गतरवाधस्यप्रसंगासिद्धत्वयादाशमिकेवाधलक्षणा
नाक्रांततयाध्यायासंगतिः॥ अश्वादिदानस्यप्राकृतान्वाहार्यादिदक्षिणावाधक

तस्यापवादात्प्रसंगस्योपपत्तेः॥ यत्तु यत्किंचित्प्राचीनामभिप्रायेऽशे भागधर्मत्वपक्षे तन्मध्यगारंभकेवे
ष्टते अपूर्वपदार्थेऽप्युपांशुत्वमिव यजमानाभेदस्यापि ऋत्विक्कर्तव्यप्रयोगवमेत्वात्तत्प्रयोगारंभकेवे
ष्टतकामेष्ट्यादिपदार्थेऽपि प्राप्त्युपपत्तिरिति सिद्धांतोपपादनं तन्मध्यगधर्मत्वपक्षेऽपि यत्रास्त्वातिदेशे
न तद्विरुद्धधर्मप्राप्तिर्यथा दाक्षिणायां गारेऽतद्व्यतिरिक्तापूर्वपदार्थेष्वेव तद्धर्मप्राप्तेः कामेष्टौ च स्वाति
देशेन ऋत्विग्गंतरस्यैव प्राप्ततयापेक्षितं॥ ॥द्वेष्ये च॥ ॥दर्शपूर्णमासयोः पत्नीसंयाजयन्कपा
लमभिजुहुयाद्वैश्वानरं द्वादशकपालं निर्वपेत्तस्यैकहायनो गौर्दक्षिणा तं सद्वेष्याय दद्यादिति श्रुतं
तत्र किमिदं दक्षिणादानमदृष्टार्थमुत ऋत्विगानत्यर्थमिति चिंतायां दक्षिणाशब्दस्यानतिकरद्रव्या
वाचित्वेन तद्दानस्यानत्यर्थत्वप्रतीतेर्नादृष्टार्थत्वकल्पनोचिता न चास्याः प्रयोगमध्यवर्तिनिमित्ता
नंतर्यवत्वेन प्रयोगमध्यवर्तित्वात्प्रधानदक्षिणयैव प्रसंगसिद्धेर्दक्षिणांतरानपेक्षत्वादेव नानस

३०

र्थता दक्षिणाविधानान्यथानुपपत्त्या आनतिविशेषकल्पनेन नतंर्यैलोपपत्तेः असक्तवाद्दक्षिणान्नानव
त्वाद्दस्याः प्रयोगबहिर्भूतत्वमेव निमित्तानंतर्यं तु ज्ञाते त्वेव बाधनेन विनविरुध्यते न वै वमपि ऋत्वि
गाचार्यौ नातिचारिता व्याविति स्मरणादृत्विजां द्वेष्यत्वानुपपत्तेर्द्वेष्यसंप्रदानकदानस्यानत्यर्थत्वा
नुपपत्तिः॥ ऋत्विक्संपत्स्य युक्ततरं तस्य द्वेषनिषेधेऽपि पूर्वकृतद्वेषस्यार्त्विज्ये बाधकाभावात्॥ स स्पि
द्वेष्यस्यार्त्विज्ये निषेधेन तस्य पुरुषार्थतया निषेधमुल्लंघ्यापि क्रतुकरणे वैगुण्याभावात्क्रत्वर्थ
त्वेऽपि वा निषेधस्य सामान्यविषयत्वेन दाक्षिणाम्नानवलकल्प्यद्वेष्यनियमविधिना विशेषविषयं
त्वावाधोपपत्तेश्च अतोऽस्य दक्षिणात्वात्कर्तव्याए वान्वाहार्यधर्माः पाकादयस्तत्र्यैलोपान्निवर्तंते इति
प्राप्ते न तावदत्र प्राकृतदक्षिणादानानुवादेन गुणमात्रविधिः संभवति प्राकृतदानकार्यस्यान
कार्यस्यानतेः प्रधानाधाचाहोर्पौपेवनिष्पन्नत्व यापाकृतदानस्येहाप्राप्तत्वात् तदनुवादेनानि

कगुणविधानासंभवाच्च अतश्चावश्यं तच्छब्दवाच्यं गुणद्रव्यविशिष्टं द्रव्यं द्वेष्यश्च संप्रदानमिति
उभयं विशिष्टं दानांतरमेवात्र विधेयं। तदपि च न प्राकृतकार्यार्थं तयोस्तस्य पूर्वमेव निष्पन्नत्वा
त् द्वेष्यकर्तृकत्वं नेयत्तस्य दर्शपूर्णमासयोः प्रमाणांतरासिद्धतया तत्संप्रदानकत्वस्य संने
यस्यासंभवेनानतिविशेषस्यापि कल्पयितुमशक्यत्वाच्च द्वेष्यं संप्रदानकदानात्मानवलादे
वास्यां प्राप्तायाश्चित्तेष्टौ प्रयोगवहिर्भावं द्वेष्यकर्तृविधिनिमित्तानंतर्यवाधं प्रयाजादौ घंशेतिदे
शंचानपेक्षितं प्रकल्प्यान्यत्सर्वत्वकल्पनेन तु तत्वैवं गौरवं तन्नहीदं फलमुखं एतत्कल्पनमंतरे
णानतिरखुध्यमानत्वात्। अतो वरमदृष्टार्थमेवेदं दानं प्रयोगमध्यक्रियमाणायाएव प्राय।
श्चित्तेष्टेरंगं दक्षिणाशब्दस्तत्तच्छब्दापेक्षितार्थसमर्पकार्थवादेष्कलो द्वेष्यानतिकरत्वमात्रेणाग ३१
साकथंचिन्नेयः॥ अतो न्वाहार्यधर्मोणामप्रसक्तत्वादेव निवृत्तिः॥ अध्यायसंगतिस्तु पूर्वपक्षे

पाकल्लोपात् इष्ट्वा॥ ॥अस्थि॥ ॥यदि सन्नायसंदीक्षितानामप्रमायेतततं दग्धाक्षमाजि
ने अस्थान्युपनह्य योस्यनेदिष्ठः स्यात्तं तस्य स्थाने दीक्षयित्वा तेन सह यजेरन्ततः संवत्सरे अस्थी
नि याजयेयुरिति श्रुततत्र यो यमस्थियाजयेदिति वदस्मामेवाधिकारप्रतीतेस्तेषां च स्वरूपेणात
द संभवे पितदपलक्षितस्यामृतस्यैवाधिकारः॥ न च तस्य कर्तृत्वासंभवः॥ मुक्त्वाचारंभादावस्मा
मेव प्रयोज्यकर्तृत्वोपपत्तेः॥ द्रव्यासाधारणे च जीवजीवद्दशायामेव सर्वैर्मरणसंभाषनयास्व
स्वांतरेषामनुमतिद्वारा एककर्तृत्वोपपत्तेः॥ अन्यथा मृतस्य स्थाने आनीतेन सह सत्रप्रयोगसामाग्र्या
वपि अनुमत्यभावात् तदीयसंसृष्टद्रव्यत्यागानुपपत्तेः॥ अतो मृतस्यैवाधिकारः॥ याजनं तु सत्र
प्रयोगसमाप्तिकर्तृभिरेव कार्यं ततः संवत्सर इत्यादिना प्रयोगसमाप्तियाजनयोः समानक
र्तृकत्वे प्रतीतेः॥ यदि तु ततः शेषाशानंतर्यस्यैव प्रतीतिर्न तु समानकर्तृकत्वस्यापातिविभा

यतेनतोऽस्त्वनियमः॥ अयं च नैमित्तिकोऽपि न सर्वांगविभिन्नाधिकारकत्वात् अपि तु मृतस्ये
वस्वत्वं न फलार्थः॥ अत एव षष्ठोक्तरीत्या मृतेस्तत्र फलासंभवेऽपि एतत्फलोत्पत्तौ वाधकाभाव
रस्य वधेयमिति प्राप्ते न तावदस्यामेव कर्तृत्वं यागानुकूलक्षमतापाश्रयत्वरूपस्य तस्य तेषु सं
भवात्॥ अतस्तत्रयापि तत्संबंधिमृतजीवल्लक्षणायां तस्याधिकारी वाच्यः॥ ततश्च अशक्ता जीव
दवस्थायां निमित्ताभाव एवानुमतिकल्पनात् फलकल्पकल्पनाचेत्साधनेकदोषभियावरं अस्मिप
देन स्वसंबंधिनो जीवत एव पुरुषांश्च स्मृत्या तेषामधिकारः॥ किंचाजीवदवस्थायामनुम
त्यापि किं तदनंतरमेव स्वत्वसमुत्पत्ति उत मरणोत्तरं नाद्यः जीवदवस्थायां त्यागानापत्तेः॥ ना
न्त्यः॥ अनुमतेः क्षणिकत्वेन मरणोत्तरस्वत्वोत्पादकत्वानुपपत्तेः॥ अत एव मरणोत्तरकालीन ३२
सत्प्रयोगसमाप्तावपि षष्ठोक्तरीत्या मृतस्यानधिकारात् तदर्थं द्रव्यं च यत्कृत्स्नवस्थायद्रव्ये

णैव जीवद्भिः प्रयोगसमाप्तिः कार्येति ध्येयं अतश्च यानुमतिकल्पनायाश्चानुपपत्तेः मृतस्य कथ
मप्यधिकारासंभवेनाक्षिप्य पदेन लक्षणया जीवतामेवाधिकारः॥ अस्तु उपहूनकर्तृत्वादि किं च शक्य
संबंधः॥ अयं वक्ष्यमाणसत्रीणां अयं चाच्यास्ति यागेन सत्ररूप एव सत्प्रमृत्यामिति नैयायिके तु
रिति णिजंतप्रयोगवलेनैव कर्मभेदावगतेः॥ सत्ररूपत्वेऽपि तत्र यजमानाभेदस्यैवासिद्धेः एवं तप्रयो
गानुपपत्तेः॥ विधाने वाक्यभेदात् यजयजातिवोदनाचोदितत्वात् अतश्च तद्धनात्कर्मोत्तरमेवेदं त
त्र चाव्यक्तत्वसाहश्यादिति देशोनैव कृत्स्निकप्राप्ते रूपर्णानानुवाद एव एतद्विचारस्य चाग्निमा
धिकरणेऽयोधनत्वाद ध्यायसंगतः॥ ॥यदितु॥ ॥जीवदधिकारपक्षे न किं विद्याधनीयं मृ
ताधिकारे तु भवति केषांचिद्वाघ इति पूर्वाधिकरणप्रयोजनमयाध्यायसगतमुच्यते तत्रैव
कर्तृसंस्कारापि वा फलिसंस्कारास्तेमृतस्यानुमतिद्वारा कर्तृत्वेन फलित्वेन चावस्थंभवं सेवत

त्रापयेस्वर्यकर्तृकामंत्रप्रोक्षणादयस्तेषां द्वारात्मद्रव्यार्थत्वेनाप्युपकारकत्वेसत्यनुमतिद्वारा
कर्तृत्वेन फलित्वेन चावश्यंभवत्येव॥ एवं कर्तृकास्तदा यत्र द्वारा संस्कारका अभ्यंजनादयस्तेषु
तरां भवत्येव येतु वेयनादयः द्वारभूतविशेषसाध्यास्तत्संस्कारकावा तेषां केशादि तदवयवा
भावेलोपएव लक्षणसूत्रं दोनयकथमंतन्ताराद्पकारकत्वपवविषयं तन्नानुमतिद्वारा प्रधान
द्वाध्वर्युकर्तृकत्वेपिमन्तकर्तृकत्वोपपत्तेः॥ अपितु वाक्संस्कारकत्वपवविषयं एवं दक्षिणाया
पा अपि दक्षोसत्त्र पेत्वाद्दक्षायाश्वयमानियमपरिग्रहानुकूल्याददृष्टरूपत्वाद्यमानियमर्थोत्क्षम
न आदिसाध्ययोस्तत्संनिधानायेस्वतदभावेलोपाद्दक्षिणोयादेरपिलोपः॥ ॥ अस्तुवर्थेतु॥ ॥
येतु यात्नमानाः कत्वयोपदायोस्तिसर्वे अनुमतिद्वारामन्तस्यापि कर्तृत्वसंभवाद्ध्वर्युपाकाएव ३३
प्रधानावुन॥ यतु मल्लेन्मकं यजमानोन्वारंभतियजमानसंमितोदुवरीभवतीत्याएंदीयत्रयजमा

मानस्यगुणत्वंतत्रास्यामेवमृत्वान्वारंभाद्यावचेतनामपिस्यान्नापचतीतिवदन्वारंभानुकूला
स्पनिष्ठव्यापाराश्रयत्तयाकर्तृत्वोपपत्तेरास्यिभिरेवान्वारंभादिकार्यमिकर्तृत्वमेदंवाध्वर्युकर्तृतोहि
शुक्रंयजमानोन्वारंभतद्सौदीयजमानपदवाच्योयागकर्ताजीवात्मेवकर्तृत्वेतोव्यतिशरीर
स्यत्ववछेदकत्वमात्रंनकर्तृत्वं आत्मनश्चकर्तृत्वं अन्वारंभानुकूलकसाश्रयत्वेनेवनचम
तस्यतादृशाकर्तृत्वसंभवः जीवच्छरीरावछेदेनेवात्मकस्यसातनियमात अन्वारंभानुकूलस्थि
तिनिष्ठव्यापाराश्रयत्वरूपस्यकर्तृत्वस्यप्रकृतावतुतेः॥ अतोवरं प्रधानस्वानुमतिद्वारकंम
नात्मकर्तृत्वमुपपाद्याध्वर्युणैवतेकार्याः॥ ॥कात्यपति॥ ॥जीवदधिकारयस्येयसत्त्रप्रकरण
एवसांगसत्रोपरमपर्यंतव्रताद्याश्रिताहगुणाकामाविहितास्तेऽग्रत्वादास्यियागस्यतत्करण
वेलायामपिकार्याः॥ मृताधिकारपक्षेतु तस्यानंगत्वात्कथंचिदंगत्वेपिवामृताविनिष्ठकामात्रा

न्नैव गुणकार्यो ऽनुमन्त्रे प्राश्नेन गुणकामनायां यद् कामयेत वर्षुकः पर्जन्यः स्यादास्यादीनां मताधि
कारपक्षे ऽप्रवृत्तिरुक्तं तद् दृष्टमएव तेषां विकृतावप्रवृत्तेरुक्तत्वात् उक्तत्वाच्चित्तथाकथने प्रयोज
नाभावादपेक्षितं॥ ॥इष्टार्थो॥ ॥सूक्तवाकगतानामायुरादिफलानामकाम्यमानानामपि
ऋत्विक्प्रयुक्तप्रहरणजन्यत्वेनानुषंगिकत्वादितरथा प्रकृतावेव कामनाभावेन तत्सद्भावानापत्ते
र्मताधिकारपक्षेपि आनुषंगिकतया जननोपपत्तेः प्रयोक्तव्यान्येव तस्य दानीति प्राप्ते अस्तु अपि त
त्कामनाया आनुष्ठापकत्वे स्वरूपेण तस्या आशास्तृत्वेन प्रकाशनतया अपेक्षितत्वान्मन
स्य चैतत्सूक्तप्रहरणजन्यफलेच्छाबाधितत्वान्न तत्सद्पाठः॥ न च वप्रकृतावपि यस्य तत्सू
लेच्छात्त च तत्सद्पाठानापत्तिः॥ अवश्यकर्तव्यप्रहरणे आनुषंगिकफलेच्छाभावस्य चैतने असं ३४
भवात् अतएव मन्तस्येच्छासंभवादिच्छाविषयाभूतफलाभावेन न तत्सद्पाठः॥ ॥स्रुवो॥ ॥यंका

मयेत पापीयान्स्यादिति मन्त्रे चित्तरां तस्य पापीयान्पापीयान् वषट्कुर्यात् तु यं कामयेत वसीयान्स्यादिति उच्चैस्तरां त
स्य वसीयान्स्य पाव षट्कुर्यादित्यादि वषट्काराश्रितानां गुणकामानां होतृ कामनयैवानुष्ठानाद्यजमा
नानिष्टकामनाभावेपि तन्निष्ठफलोत्सर्गो गुणोपहतत्वोपपत्तेर्मताधिकारपक्षेपि तेषां करणं च
विकृतौ गुणकामानामप्रवृत्तिः वषट्कारस्य एष वै सप्तदशः प्रजापतिर्यज्ञे अन्वायत्त इत्यनारभ्या
धीतवचनेन साक्षाद्यज्ञोद्देशेन विधानात्समर्णता न्यायाभावेन प्रकृतिविकृतिसाधारण्येन
पदिष्टतया विकृतावपीदृशगुणकामप्राप्त्युपपत्तेरिति प्राप्ते न तावदिदं फलं ऋत्विगांतर्भावे
कांवन ऋत्विज आशिष आशासते यजमानस्यैव तदाशासितृत्वेन यजमाननिष्ठत्वस्यैव
ननीयस्थापितत्वात् न चैतदाशासनमात्रेण यजमाने फलोत्पत्तिः प्रकृतो ऋत्विगिच्छायां सत्याम
पि स्वेच्छायामसत्यां यजमाने गुणविषये होतुरप्रवर्तनाद्यजमाने च्छाया एवैतादृशगुणविष

येनुष्ठापकत्वावगतेर्नैमित्ताधिकारपक्षे तेषां करणं तदेतानि सर्वाण्यधिकरणानि मतस्यथाधे
कारे जावंतां वेलेतदधिकरणप्रयोजनानि ॥ ॥सर्वस्वारस्य॥ ॥ अस्ति सर्वस्वारो नाम यज्ञो मरण
कामो ह्येतेन यजेत यः कामयेतानामयः स्वर्गं लोकमियामिति वाक्येन स्वर्गार्थतया विहितः ॥ अत्र हि न
मरणफलं तस्यानिष्टत्वात् अनेकोद्देशे वाक्यभेदाच्च अतो मरणकामः इत्यस्यांगीकृतमरणः इत्य
र्थः ॥ आर्भवप्रस्तूयमाने अग्निं प्रविशतीत्यनेन चोपायविधानान्मरणमत्रांगतयो विधीयते अत
एव मरणोत्तरकालं सहकर्तारः समाना यो नैतिचितां प्रतिनास्याच्छियज्ञब्रह्मकर्तृत्वासंभवात्मरणांतस्यैवस्व
र्गसाधनत्वाच्च समापनार्थं इति प्राप्ते आर्भवे प्रस्तूयमाने औदुंबरी सदस्यो नवास सा परिवेष्टव्या त
याः परि समापयतमेयत्तमिति सर्पिण्याग्निं प्रविशतीति वचनेन समापने प्रेषविधानात्तस्य चदृ
ष्टार्थत्वलाभायलैंगिकसमाप्तिविधिकत्वावगतेस्तद्बलेन चरुतस्यापि ऋत्विक्प्रयोजकत्वोपपत्तेः ३९

समापनीय एव क्रतुः यतु केश्चित्प्रैषस्यैवास्य स्वाध्यायाध्येत्र्यन्वयदृष्टिवत्समापनविधायकत्वमिष्य
ते तत्त्वाप्रमाणाद्वृत्तिसंबोधनेन विधिशक्तिप्रतिबंधात्कर्मकाले प्रयोज्यत्वानापत्तेश्चोपेक्षितं वस्तुतस्तु
सत्समापनप्रेषाभावेपि सकलक्रत्वर्थत्वे एव वृणभरण्योः प्रकृतावाविवानुष्ठानात् तद्बलेन च जावद
वस्थायामिव मृतावस्थायामपि ऋत्विजां कर्तृत्वोपपत्तिः ॥ अत एव ज्योतिष्टोमादिकर्मांतरेष्वप्यन्
येवादिष्टांतरामरणे ऋत्विग्भिः समापनं एवं च प्रैषस्य विधिकल्पकत्वाभावेपि समापनस्यारकत्वेन
नैवदृष्टार्थतेति ध्येयं ॥ ॥गतं॥ ॥सत्रे यजमाने अस्य यज्ञे मृताधिकारपक्षे यथावाधावाध
विवेकः स सर्वो यत्रद्रष्टव्यः ॥ ॥जीवत्सवचनं॥ ॥ सत्रे त्वेव प्रायणीयादिरो जीवद्दृष्टांतस्य तत्वाके
आयुराज्ञासनादेः करणं न वेति विचारायामायुषी मरणाभ्यपगम्ये मा प्रार्थनायत्वाल्लोप इति प्राप्ते
आरंभकाले पर्यंतं जन्मांतरे वा आयुष आशासनसंभवान्नलोपः ॥ एव अन्येषामपि फलायाना सुत

रांदेवयज्यामित्यादावाम्नि[...]न्मानिजन्मांतरे वा आम्नासनसंभवाद्लोपः॥ ॥क्रिया॥ ॥स
त्रैवरपाभरपायोर्दृष्टार्थत्वाल्लोपेभिहिते यत्सकृत्तावद्दृष्टार्थं तु यान्यावरणं आग्नेयायस्या
नं च तत्स्रनेकार्यमेवेति प्रसदाहरे पामान्नांसोमेहि ऋतु यान्यावरणं मदृष्टार्थमेव एवमोग्ने
यायहिरण्यं ददाति। सपिनद्यत्रे प्राक्षदक्षिणादानानुवादेनो मयविधिः संभवति। वाक्यभेदाप
तेः॥ अतोदानांतरमेवावश्यं विधेयं। तदपि चन वैश्वामित्रो होते त्यादि विशेषविहितातिरिक्तऋ
त्विक्षु आग्नेयत्वविधिकल्पनयातदानस्यार्थ। उक्तविधिकल्पनानिरपेक्षदक्षिणादौ नैवनिराकां
क्षायामानत्वौविधिकल्पनसापेक्षदानस्य जनकत्वेनान्वयायोगात्। न च पक्षप्राप्ताग्नेय॥ ३६
।ऋत्विगानसमर्थमेव तद्विध्युपपत्तौ तादृशऋत्विगानसंर्थमेव तद्विध्युपपत्तेर्नाग्नेयविधिकल्प
नंमपापातिवाक्यं। हिरण्यमग्नेयजुहोति। सावुपयुक्तहिरण्यप्रतिपत्त्यर्थत्वेनापि दानस्या

दृष्टार्थत्वोपपत्तौ नादृष्टऋत्विगानसमर्थत्व एव प्रमाणाभावात्। अतो विनिगमनाविरहाद्दृ
ष्टार्थमेवेदं दानं अत एव नाग्नेयाध्याये नेदं वंवशसंपन्नऋत्विगाग्नेयस्यैव ग्रहणं आग्ने
यत्वस्यापूर्वसाधनतावच्छेदकत्वेनाकांक्षेस्तन्न्यायाभावात्॥ ॥गुण॥ ॥यत्राप्रकृतौ ग
पाविशिष्टाकर्मस्वतंत्रविधिनाप्राप्तयोगविधिनाविहितं तत्र विकृतौ विशेषणाभावे गुणालो
पे विशिष्टालोपाद्विशेष्यस्यापि कर्मणो लोप इति प्राप्ते उपकारदृष्टभावे न प्रदेयोर्थो नामाति
देशात्तस्यापि विशेषणाबाधे विशेष्यबाधस्यान्याय्यत्वात्तस्यापि च प्रकृतौ विकृतौ वा विशिष्ट
विधौ विशिष्टस्यानतिरिक्तत्वाद्विशेषणबाधेपि प्रकृतौ विकृतौ वा न विशेष्यलोपः। अत एव
प्रकृतौ निर्वापानुवादेनाग्निहोत्रहवण्या हवींषि निर्वपतीति च नेन विहितायाः अग्निहो
त्रहवण्याः पवमानेष्टिष्वग्निहोत्राभावेनासंभवेपि न निर्वापलोपः। न चाग्निहोत्रहवण्या द्रव्य[illegible]

अश्रवणावलेनसंतत्त्वावगतेरग्निहोत्रस्य ततः पूर्वमकरणे पि कथमग्निहोत्रहवणीत्वस्य
तास्त्वाधः अस्तुवा॥ अवयवार्थस्यापि प्रतीयमानत्वाधोगरूढत्वं तथाथग्निहोत्रं होष्यते नयेति
व्युत्पादयमाने ष्टिष्वपि अवयवार्थसंभवाद्धिशेषणवाधानुपपत्तिः॥ नचमाविव्युत्पत्तेः पुरोडाश
कपालादावगतांगीकारे पि भाविनि प्रमाणाभावेनात्म्यत्तदंगीकारे प्रमाणाभावाद्रा व्युत्पत्ते
रेव प्रकृता वाप्रितायाइहासंभवाद्विशेषणवाधोपपत्तिः॥ नाहृयवमाने ष्टिषु प्रतव्युत्पत्तिः संभ
वतितद्दर्शहोमस्यकर्मोत्तरत्वेनाग्निहोत्रत्वाभावादितिवाच्यं प्रकृतावपि खडे पौर्णमासमा
धानेतदहः क्रियमाणसे ष्टिसाध्वारंभणीमयस्यदर्शकाले पौर्णमासप्रयोगे भूतव्युत्पत्तेरसंभ
वेनभावि व्युत्पत्तेरेवाश्रयणीयत्वात् पूर्वपर्वण्यपि मानवस्तुत्वे अग्निहोत्रहोमस्य पौर्णमासोत्तत
रंविहितात्वाच्चवस्तुतस्तु प्रोक्षणाद्यपवर्ग्युरंतत्वान्निवापकस्यापिकालस्य वाधः अपि तु स्वरू

३८

पयाग्यतयाहोमसाधनत्वमात्रवोधः॥ तच्चाकृते पि होमे अस्त्येवेति चेन्न पुरोडाशकपालस्या
येननिनिर्वापवाकेर अग्निहोत्रसंबंधित्वश्रवणात अयुक्तत्वावगतेने निर्वापाग्निहोत्रहवण्या
प्रयोजकः अतस्तद्वदेव येनकेनचिन्निर्वापः॥ अतएवाग्निहोत्रहवण्याग्निहोत्रं जुहोतीत्यत्रप
रिधिंपरिदधातीतिवत्पुरोडाशकपालन्यायाभावादग्निहोत्रस्यप्रयोजकत्वावगतेराग्नि
होत्रप्रयोगेभूतव्युत्पत्तेरसंभवे पि नाग्निहोत्रहवणीवाधः॥ यात्विकास्तु आधानांगसंभार
हरणकाल एवपात्राणामुत्पादानाद्वाधवेनमाग्न्यग्निहोत्रहवण्यैवपवमानेष्टिषु निर्वापादि
कंकुर्वंति॥ ॥मुष्टि॥ ॥वाजपेयेवार्हस्पत्यो नैवारश्चरुः सप्तदशशरावो भवतीति श्रुतः त
त्रातिदेशप्राप्तेनिर्वापेष्किंमुष्टि चतुःसंख्ययोभरुत्पयोरव्यतिदेशप्राप्तयोर्वाधउत चतुःसं
ख्यायाएवोत मुष्टीनामेवेति चिंतायां चतुरोमुष्टीन्निर्वपतीतिप्रकृतौ विहितस्यमुष्टिसंख्या

यो मुष्टिरिति देशिकयोरपि देशिकाभ्यां सप्तदशशरावसंख्याशरावपरिमाणाभ्यां बाधः प्रत्याम्ना
नेनानिर्वापांगभूतयोरपि मुष्टिसंख्ययोर्निर्वापस्वरूपे वैयर्थ्येन फलतो यागार्थेन तया समान
विषयत्वोपपत्तेः। तत्रापि संख्यया संख्यायाः परिमाणेन परिमाणस्येति प्रथमः पक्षः। द्वितीय
स्तु मुष्टिसंख्ययोर्यागोपकारकत्वेपि निर्वापसंबंधित्वेनैवम्नवणान्तयागांगभूताभ्यां संख्या
परिमाणाभ्यां निर्वापांगभूतयोः संख्यापरिमाणयोर्बाधो युक्तः सप्तदशशरावपरिमितद्र
व्यस्य तु चतुर्मुष्टिपरिमितनिर्वापेण संस्कारायोगाद् द्वयोर्विरोधावश्यंभावे अन्यतरबाधे
नैवोपपत्तावुभयप्रमाणाभावः। न च चतुर्मुष्टिपरिमितत्वेन निर्वापस्यापि सांपि विरोधप
रिहारोपपत्तौ नावश्यमन्यतरस्यापि बाधो युक्त इति वाच्यं चतुःसंख्यायाः प्रकृतौ यागीय
यावद्द्रव्यसंस्कारनिर्वापवृत्तिमुष्टिपरिच्छेदकत्वेनावस्या[illegible]नुपपत्तौ अन्यतरबाधस्यावश्य

३८

कत्वात्। तत्रापि मुष्ट्यानाम्ना धान्यातदंगभूतसंख्याया एव बाधः। न्यथाति चतुः शब्दो विशेष्यनिष्ठो
नस्वतः संख्यायाः क्रियान्वयं गमयति विशेष्यं च मुष्टिपदोपात्तपरिमाणमेव न तु तद्विशिष्टं व्रीहिद्र
व्यं तथैवानुभवात् विशेष्यबाधाच्च अत एव मुष्टिशब्दस्य परिमाणविशिष्टद्रव्यपरत्वेन विशेष्य
निष्ठत्वेपि संख्याया एकदेशान्वयोपि नानुपपन्नः। अतस्तत्संख्यायाः परिमाणं प्रत्यंगत्वात् तस्या
एव बाधः। वस्तुतस्तु द्वितीयांत मुष्टिपदसमानाधिकरणं संख्यापदं परिमाणविशिष्टव्री
हिराशिमेव विशेष्यतया संगृह्णातीति यद्यपि न परिमाणस्य संख्यां प्रति प्राधान्यं तथापि सं
ख्यायाः परिमाणपरिच्छेदद्वारैव तत्सारमितद्रव्यपरिच्छेदकत्वात् परिमाणस्यांतरंगतया बाधा
नुपपत्तिः। अतो मुष्टिगतं चातुःसंख्याबाधितत्वात् सप्तदशशरावपरिमितव्रीहीणां यावन्मुष्टिनिर्व
पिः कार्यैव इति सिद्धांतस्तु ना[illegible]द्वितीयांताधाद्यस्मादुद्देश्यतया निर्वापं प्रति कर्मत्वं उद्देश्यपानेकत्व

मितकवाक्यभेदापत्तेः॥ अपि तु द्वित्वनीयायासकुन्यायेन करणत्वं लक्षयित्वा प्रातिपदिकत्वाक्यार्थ
द्वयस्यैव संख्यापरिमाणरूपस्यानिर्वाधभावनान्वयित्वं अत एव नानयोरन्तुणान्यायेन विशेष्य
निघ्नत्वमपि गुणद्वयावशिष्टनिर्वापभावनाविधानाद्वाक्यभेदः॥ गुणद्वयस्यैव वैशिष्ट्यं आरु
ण्यवत् द्रव्यपरिच्छेदद्वारेणेति न कश्चिद्विरोधः॥ एवं च संख्यापरिमाणयोः परस्परं समंगांगि
भावे अंतरंगवहिरंगभावे वा प्रमाणाभावादन्यतरबाधेन नियामकापेक्षायां प्राथम्यात्संख्याया
अबाधे मुष्टिपरिमाणस्य तु बाधः॥ न च प्राथम्यं न घन्यत्वाद्देः प्रक्रंतो विद्यमानत्वेपि च्छिकृता
वत्तिदेशेन युगपत्सर्वांगप्राप्तेस्तस्याभावात्कथं तस्य नियामकत्वमिति वाच्यं विकृतावभा
वेपि प्रकृतिदृष्टस्यैव तस्य नियामकांतराभावेन नियामकत्वोपपत्तेः॥ अतः संख्यानुरोधात्सप्ता

३९

दचतुःशराव परिमितं पात्रं कृत्वा तेन वचचतुर्वारं निर्वापः॥ अथ यद्यपि भाष्यकारादिभिः कर्का

दिभिश्च सर्वैर्निर्णीतः॥ मम तु प्रतिभाति साक्षात्साधनीभूतानां ब्रीहीणामेव एषां मुष्टीनां च वाधापेक्षया
संख्याया एव एकस्या मुष्टिपरिच्छेदद्वारा निर्वापसाधनीभूतायां बाधः उचितः॥ वस्तुतस्तु चतुःसंख्या
कमुष्टिसाधनकं वैधनिर्वापाद्वस्ताउभयसंपादनसंभवेन न तस्या अपि बाधः॥ यात्रीययावद्व्या
संस्कारकनिर्वापद्वैतिमुष्टिपरिच्छेद[illegible]स्यपक्षेतावार्थिकत्वे द्विहवाधेयदोषात्॥ अत एव द्वेमिंवि
निस्तत्रे कात्यायनादिसूत्रेषु वोपदेशिकाभ्यां संख्यापरिमाणाभ्यां आतिदेशिकतदुभयबाध
पक्षयित्वा तदभावः सिद्धांतितः॥ त्वनत्वं तुरश्वरो वेति॥ ॥औत्पत्तिके॥ ॥धावापृथिव्यांधेनु
मालभेते वायव्यं वत्समेंद्रमृषभमित्यादावातिदेशिकस्याजत्वस्य न बाधः॥ धेन्वादिशब्दानां धाना
दिगुणमात्रशक्तत्वे नाजत्वे सत्युपपत्तेः॥ न च गव्येव धेन्वादिशब्दानां प्रयोगाद्गोत्वातिगुणे वृत्ति
तन्मात्रवृत्तिगुणेषु वैजात्येन प्रमाणाभावेन गोरपि शक्यतावच्छेदकभवे शैशीरत्वात्॥ अत्राहुः येन दृष्टा

तिअन्नमपमभिसादावन्य[ ]ाविधेचादिशब्दप्रयोगाच्चागम्येवप्रचुरप्रयोगात्तुगुणविशिष्टायांत
स्यांनिरूढलक्षणायायोदिशब्दवतःपंकजशब्दस्यतुपद्मभिन्नेप्रयोगाभावात्स्वयोगरूढिस्वीका
रेप्यदोषः अतश्चलक्षणायांप्रमाणाभावादतिदेशानुरोधेननिरूढगुणविशिष्टमन्नद्रव्यमेवग्राह्य
मितिप्राप्तेपदान्तरसमभिव्याहाराभावेविधेनुपरमात्रश्रवणेसर्वत्रगोवृत्तिधानादिगुणस्यैवप्रतीति
र्धेचादिशब्दानांशोणादिशब्दवद्गोमात्रवृत्तिविजातीयधानादिगुणएवशक्तिःकेनाद्यंचाश्वरूपमात्र
वृत्तिरक्तत्वव्याप्यजातिरेणस्वरवद्गोमात्रवृत्तिधानादिनिष्ठमनुभवसिद्धं अस्तु वा क्षुतत्वागुणवि
शिष्टगव्येवशक्तिःअजादिपदसमभिव्याहारेतुधेन्वादिपदस्यलक्षणा अतश्चगोरूपादिष्टगुणाभि
मत्वादपदिष्टत्वादेववाजस्यबाधः॥ ॥नैमित्तिके॥ ॥पत्रंतुवायव्यंश्वेतमालभेतेत्यादौश्वेतादि ४०
शब्दानामजादिसाधारणवाचित्वंतत्रनाजत्वस्यबाधइतिरूढशरहरयामेतत्॥ ॥प्रतिषेधे॥ ॥

साधस्केखलेवालापूपेभवतीतिश्रुतंतत्रातिदेशप्राप्तंखादिरत्वंनिवर्ततेनवातथाचित्रेष्टौद
धिमधुघृतंपयोधानाउदकंतण्डुलास्तत्संसृष्टंप्राजापत्यमित्यत्रतण्डुलेव्रीहियवनियमोनिवर्ततेन
वेतिचिंतायामाद्योदाहरणेतावत्पूपकार्येखलेवालीयथावस्थितावविधीयतेयूपस्पर्देकार्येलक्ष
णापतेः॥किंतुयूपोद्देशेनखलेवालीत्वंखलेवारणाक्रियारूपंसंस्कारकतयाविधीयतेनत्वादृष्टा
